No 121 in typed list

M.E

		Bhagawad Gita with	Title
		Commentary	Author
			Editor
			Year, Vols.
0			Publisher
371		Moth-eaten	Remarks

0/371



गीता०स०
१

॥ श्रीकृष्णाय नमः ॥ ॐ अस्य श्रीभगवद्गीतामालामंत्रस्य भगवान्वेदव्यास ऋषिः ॥ अनुष्टुप्छं
दः श्रीकृष्णः परमात्मा देवता ॥ अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे इति बीजं ॥ सर्वधर्मान्
परित्यज्य मामेकं शरणं व्रजेति शक्तिः ॥ अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुच इति कीलकं ॥
नैनं छिंदंति शस्त्राणि नैनं दहति पावक इत्यंगुष्ठाभ्यां नमः ॥ न चैनं क्लेदयंत्यापो न शोषयति मारुत इति त
र्जनीभ्यां नमः ॥ अच्छेद्योयमदाह्योयमक्लेद्योऽशोष्य एव चेति मध्यमाभ्यां नमः ॥ नित्यः सर्वगतः स्था
णुरचलोयं सनातन इत्यनामिकाभ्यां नमः ॥ पश्य मे पार्थ रूपाणि शतशोथ सहस्रश इति कनिष्ठिका
भ्यां नमः ॥ नानाविधानि दिव्यानि नानावर्णाकृतानि चेति करतलकरपृष्ठाभ्यां नमः ॥ नैनं छिंदंति शस्त्रा
णीति हृदयाय नमः ॥ न चैनं क्लेदयंत्याप इति शिरसे स्वाहा ॥ अच्छेद्योयमदाह्योयमिति शिखायै व
षट् ॥ नित्यः सर्वगतः स्थाणुरिति कवचाय हुं ॥ पश्य मे पार्थ रूपाणीति नेत्रत्रयाय वौषट् ॥ नानावि १

गीता०स०
२

पेण वहिनी कर्णेन वेलाकुला ॥ अश्वत्थामविकर्णघोरमकरा दुर्योधनावर्तिनी सोत्तीर्णा खलु
पांडवै रणनदी कैवर्तकः केशवः ॥ ७ ॥ मूकं करोति वाचालं पंगुं लंघयते गिरिं ॥ यत्कृपा तमहं
वंदे परमानंदमाधवं ॥ ८ ॥ यं ब्रह्मा वरुणेंद्ररुद्रमरुतः स्तुन्वंति दिव्यैः स्तवैर्वेदैः सांगपदक्रमोपनि
षदैर्गायंति यं सामगाः ॥ ध्यानावस्थिततद्गतेन मनसा पश्यंति यं योगिनो यस्यांतं न विदुः सुरासुर
गणा देवाय तस्मै नमः ॥ ९ ॥ इति ध्यानं ॥ ॐ नमो भगवते वासुदेवाय ॥ शेषाशेषमुखव्याख्या
चातुर्यं त्वेकवक्त्रतः ॥ दधानमद्भुतं वंदे परमानंदमाधवं ॥ १ ॥ श्रीमाधवं प्रणम्योमाधवं विश्वे
शमादरात् ॥ तद्भक्तियंत्रितः कुर्वे गीताव्याख्यां सुबोधिनीं ॥ २ ॥ भाष्यकारमतं सम्यक् तद्व्या
ख्यातृगिरस्तथा ॥ यथामति समालोच्य गीताव्याख्यां समारभे ॥ ३ ॥ गीताव्याख्यायते यस्या
ःपाठमात्रप्रयत्नतः ॥ सेयं सुबोधिनी टीका सदा ध्येया मनीषिभिः ॥ ४ ॥ ॥ २

श्री

स्थानि दिव्यानीत्यस्त्राय फट् ॥ श्रीकृष्णप्रीत्यर्थे जपे विनियोगः ॥ अथ ध्यानं ॥ पार्थाय प्रतिबोधितां भ
गवता नारायणेन स्वयं व्यासेन ग्रथितां पुराणमुनिना मध्ये महाभारते ॥ अद्वैतामृतवर्षिणीं भगवती
मष्टादशाध्यायिनीं अंब त्वामनुसंदधामि भगवद्गीते भवद्वेषिणीं ॥ १ ॥ नमोस्तु ते व्यास विशालबुद्धे फु
ल्लारविंदायतपत्रनेत्र ॥ येन त्वया भारततैलपूर्णः प्रज्वालितो ज्ञानमयः प्रदीपः ॥ २ ॥ प्रपन्नपारिजाता
य तोत्रवेत्रैकपाणये ॥ ज्ञानमुद्राय कृष्णाय गीतामृतदुहे नमः ॥ ३ ॥ सर्वोपनिषदो गावो दोग्धा गोपालनं
दनः ॥ पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत् ॥ ४ ॥ वसुदेवसुतं देवं कंसचाणूरमर्दनं ॥ देवकी
परमानंदं कृष्णं वंदे जगद्गुरुं ॥ ५ ॥ पाराशर्यवचः सरोजममलं गीतार्थगंधोत्कटं नानाख्यानककेस
रं हरिकथासंबोधनाबोधितं ॥ लोके सज्जनषट्पदैरहरहः पेपीयमानं मुदा भूयाद्भारतपंकजं क
लिमलप्रध्वंसिनः श्रेयसे ॥ ६ ॥ भीष्मद्रोणतटा जयद्रथजला गांधारनीलोत्पला शल्यग्राहवती कृ

इह खलु सकललोकवंदितचरणः परमकारुणिको भगवान् देवकीनंदनस्तत्त्वज्ञानविजृंभिता
शोकमोहविभ्रंशितविवेकतया निजधर्मत्यागपरधर्माभिसंधिमर्जुनं धर्मज्ञानरहस्योपदेशा
प्लवेन तस्माच्छोकमोहसागरादुद्दधार ॥ तमेव भगवदुपदिष्टमर्थं कृष्णद्वैपायनः सप्तभिः श्लो
कशतैरुपनिबबंध ॥ तत्र च प्रायशः श्रीकृष्णमुखनिःसृतानेव श्लोकानलिखत् ॥ कांश्चित्तत्स

॥ धृतराष्ट्र उवाच ॥ धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ॥ मामकाः पांडवाश्चै
व किमकुर्वत संजय ॥ १ ॥

गतये स्वयं व्यरचयत् ॥ यथोक्तं गीतामाहात्म्ये ॥ गीता सु
गीता कर्तव्या किमन्यैः शास्त्रविस्तरैः ॥ या स्वयं पद्मनाभस्य मुखपद्माद्विनिःसृता इत्यादि ॥ त
त्रतावत् धर्मक्षेत्र इत्यादि विषीदन्निदमब्रवीदित्यंतेन ग्रंथेन श्रीकृष्णार्जुनसंवादप्रस्तावाय
कथा निरूप्यते ॥ ततः परमासमाप्तेः धर्मज्ञानार्थसंवादः ॥ तत्र धर्मक्षेत्रे कुरुक्षेत्रे इत्यनेन श्लो

केनधृतराष्ट्रहस्तिनापुरस्थितंस्वसारथिंप्रतिकुरुक्षेत्रवृत्तांतेपृष्टेसंजयोहस्तिनापुरस्थितो
पिव्यासप्रसादाल्लब्धदिव्यचक्षुःकुरुक्षेत्रवृत्तांतमात्मनःप्रत्यक्षंवदन्॥धृतराष्ट्रायनिवेदयामासतत्रा
द्वैत्यादिना॥धृतराष्ट्रउवाच॥धर्मक्षेत्रइति॥भोसंजयधर्मभूमौकुरुक्षेत्रे॥मत्पुत्राःपांडुपु
त्राश्चयुयुत्सवोयोद्धुमिच्छंतःसमेताःमिलिताःसंतःकिंकृतवंतः॥१॥संजयउवाच॥दृष्ट्वेति॥

संजयउवाच॥दृष्ट्वातुपांडवानीकंव्यूढंदुर्योधनस्तदा॥आचार्यमुपसंगम्यराजावचनम
ब्रवीत्॥२॥पश्यैतांपांडुपुत्राणामाचार्यमहतींचमूं॥व्यूढांद्रुपदपुत्रेणतवशिष्येणधीमता॥३॥

पांडवानामनीकंसैन्यंव्यूढंव्यूहरचनयाव्यवस्थितंदृष्ट्वाद्रोणाचार्यसमीपंगत्वाराजादुर्योधनोव
क्ष्यमाणंवाक्यमुवाच॥२॥तदेववचनमाह॥पश्यैतामित्यादिनवभिःश्लोकैः॥भोआचार्य
धु पांडवानांविततांचमूंसेनांपश्य॥द्रुपदपुत्रेणधृष्टद्युम्नेनव्यूढांव्यूहरचनयाध्यधिष्ठितं॥३॥ २

अत्रशूराइति॥अत्रास्यांचम्वां॥इषवोबाणाअस्यंतेक्षिप्यंतेएभिरितीष्वासाधनूंषिमहां
तइष्वासायेषांतेभीमार्जुनौतावदत्रातिप्रसिद्धौयोद्धारौताभ्यांसमाःशूराःसंतितानेवनामभि
र्निर्दिशति॥युयुधानःसात्यकिः॥४॥किंच॥धृष्टकेतुरिति॥चेकितानोनामैकोराजा नरपुंग

अत्रशूरामहेष्वासाभीमार्जुनसमायुधि॥युयुधानोविराटश्चद्रुपदश्चमहारथः॥४॥
धृष्टकेतुश्चेकितानःकाशिराजश्चवीर्यवान्॥पुरुजित्कुंतिभोजश्चशैब्यश्चनरपुंगवः॥५॥
युधामन्युश्चविक्रांतउत्तमौजाश्चवीर्यवान्॥सौभद्रोद्रौपदेयाश्चसर्वएवमहारथाः॥६॥

वोनरश्रेष्ठःशैब्यः॥५॥युधामन्युश्चेति॥विक्रांतोयुधामन्युनामैकः॥सौभद्रोअभिमन्युः॥
द्रौपद्यांपंचभ्योयुधिष्ठिरादिभ्योजाताःप्रतिविंध्यादयःपंच॥महारथादीनांलक्षणं॥ए
कोदशसहस्राणियोधयेद्यस्तुधन्विनां॥शस्त्रशास्त्रप्रवीणश्चमहारथइतिस्मृतः॥

अभितान्योधयेद्यस्तु सं प्रोक्तोतिरथस्तु सः ॥ रथी त्वेकेन यो युध्येत्तन्न्यूनोऽर्द्धरथो मत इ-
ति ॥६॥ अस्माकमिति ॥ निबोध बुध्यस्व ॥ नायका नेतारः संज्ञार्थं सम्यक्ज्ञानार्थमित्य-
र्थः ॥७॥ तानेवाह भवानिति ॥ द्वाभ्यां ॥ भवान्द्रोणः ॥ समितिं संग्रामं जयतीति ॥ तथा सौम-

अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम ॥ नायका मम सैन्यस्य संज्ञार्थं ता-
न्ब्रवीमि ते ॥७॥ भवान्भीष्मश्च कर्णश्च कृपश्च समितिंजयः ॥ अश्वत्थामा
विकर्णश्च सौमदत्तिस्तथैव च ॥८॥ अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः ॥
नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः ॥९॥ दत्तिः सौमदत्तस्य पुत्रो भूरिश्रवाः ॥८॥

अन्ये चेति ॥ मदर्थे मत्प्रयोजनार्थं जीवितं त्यक्तुमध्यवसिता इत्यर्थः ॥ नाना अनेकानि
शस्त्राणि प्रहरणसाधनानि येषां ते ॥ युद्धविशारदा निपुणा इत्यर्थः ॥९॥ ४

ततः किमित्यत आह ॥ अपर्याप्तमिति ॥ तत्तथाभूतैर्वीरैर्युक्तमपि भीष्मेणाभिरक्षितमप्यस्मा-
कं बलं सैन्यं अपर्याप्तं तैः सह योद्धुमसमर्थं भाति ॥ इदं तु एतेषां पांडवानां बलं भीमेनाभिर-
क्षितं सत्पर्याप्तं समर्थं भाति ॥ भीष्मस्योभयपक्षपातित्वादस्मद्बलं पांडवसैन्यं प्रत्यसमर्थं
भीमस्यैकपक्षपातित्वादेतद्बलं प्रति समर्थं ॥१०॥ तस्माद्भवद्भिरेवं वर्तितव्यमित्याह ॥

अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितं ॥ पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितं ॥१०॥
अयनेषु च सर्वेषु यथाभागमवस्थिताः ॥ भीष्ममेवाभिरक्षंतु भवंतः सर्व एव हि ॥११॥

अयनेष्विति ॥ अयनेषु व्यूहप्रवेशमार्गेषु यथाभागं विभक्तां स्वां स्वां रणभूमिमपरित्य-
ज्यावस्थिताः ॥ संतो भीष्ममेवाभितो रक्षंतु यथान्यैर्युध्यमानः पृष्ठतः केश्चिन्न हन्यते तथा
यारक्षंतु ॥ भीष्मबलेनैवास्माकं जीवनमिति भावः ॥११॥ ॥

गीता०स०
५

तदेवं बहुमानयुक्तं राज्ञो वाक्यं श्रुत्वा भीष्मः किं कृतवानित्याह ॥ तस्य राज्ञो हर्षं संजनयन् कुर्वन् पि
तामहो भीष्म उच्चैर्महान्तं सिंहनादं कृत्वा शंखं दध्मौ वादितवान् ॥ १२ ॥ तदेवं सेनापतेर्भीष्म
स्य युद्धोत्सवमालक्ष्य सर्वतो युद्धोत्सवप्रवृत्तमित्याह ॥ तत इति ॥ पणवा आनका गोमुखाश्च

तस्य संजनयन् हर्षं कुरुवृद्धः पितामहः ॥ सिंहनादं विनद्योच्चैः शंखं दध्मौ प्रतापवान् ॥
॥ १२ ॥ ततः शंखाश्च भेर्यश्च पणवानकगोमुखाः ॥ सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत् ॥
॥ १३ ॥ ततः श्वेतैर्हयैर्युक्ते महति स्यंदने स्थितौ ॥ माधवः पांडवश्चैव दिव्यौ शंखौ प्रदध्मतुः
॥ १४ ॥

वाद्यविशेषाः सहसैव तत्क्षणमेवाभ्यहन्यन्त वादिताः स च शंखादिशब्दस्तुमुलो
महानभवत् ॥ १३ ॥ ततः पांडवसैन्ये प्रवृत्तं युद्धोत्सवमाह ॥ तत इति पंचभिः ॥ स्यंदने रथे
स्थितौ संतौ कृष्णार्जुनौ शंखौ प्रकर्षेण दध्मतुः वादयामासतुः ॥ १४ ॥ ॥ ५

तदेव विभागेन दर्शयन्नाह ॥ पांचजन्यमिति ॥ पांचजन्यादीनि श्रीकृष्णादिशंखनामानि ॥ देव
दत्तं नाम शंखमर्जुनो दध्मौ ॥ वृकवदुदरं यस्य स वृकोदरो भीमकर्मा महाशंखं पौंड्रं दध्मा
विति ॥ १५ ॥ अनंतविजयमिति ॥ नकुलः सुघोषं नाम शंखं दध्मौ सहदेवो मणिपुष्पकं च ॥

पांचजन्यं हृषीकेशो देवदत्तं धनंजयः ॥ पौंड्रं दध्मौ महाशंखं भीमकर्मा वृकोदरः ॥ १५ ॥
अनंतविजयं राजा कुंतीपुत्रो युधिष्ठिरः ॥ नकुलः सहदेवश्च सुघोषमणिपुष्पकौ ॥ १६ ॥
काश्यश्च परमेष्वासः शिखंडी च महारथः ॥ धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः ॥ १७ ॥
द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते ॥ सौभद्रश्च महाबाहुः शंखान्दध्मुः पृथक् पृथक् ॥ १८

१६ ॥ काश्यश्चेति ॥ काश्यः काशिराजः ॥ कथंभूतः परमः श्रेष्ठः इष्वासो धनुर्यस्य सः ॥
१७ ॥ द्रुपद इति ॥ हे पृथिवीपते धृतराष्ट्र ॥ १८ ॥ ॥

पृथक्शंखानां नादस्त्वदीयानां महाभयं जनयामासेत्याह ॥ सघोष इति ॥ धार्त्तराष्ट्राणां त्वदी-
याणां हृदयानि विदारितवान् किं कुर्वन्नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन् ॥ प्रतिध्वनिभि
रापूरयन् ॥ १९ ॥ तस्मिन्समये श्रीकृष्णमर्जुनो विज्ञापयामास इत्याह ॥ अथेति ॥ चतुर्भिः ॥

स घोषो धार्त्तराष्ट्राणां हृदयानि व्यदारयत् ॥ नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन् ॥ १९ ॥
अथ व्यवस्थितान्दृष्ट्वा धार्त्तराष्ट्रान् कपिध्वजः ॥ प्रवृत्ते शस्त्रसंपाते धनुरुद्यम्य पांडवः ॥ २० ॥
हृषीकेशं तदा वाक्यमिदमाह महीपते ॥ सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत ॥ २१ ॥
यावदेतान्निरीक्षेहं योद्धुकामानवस्थितान् ॥ कैर्मया सह योद्धव्यमस्मिन् रणसमुद्यमे ॥ २२ ॥

॥ व्यवस्थितान् युद्धोद्योगे स्थितान् कपिध्वजोऽर्जुनः ॥ २० ॥ तदेव वाक्यमाह ॥ सेनयोरिति ॥
॥ २१ ॥ न तु त्वं योद्धा न तु प्रेक्षकः ॥ तत्राह कैरिति ॥ कैर्मया योद्धव्यं ॥ २२ ॥ ॥

धार्त्तराष्ट्रस्य दुर्योधनस्य प्रियं कर्तुमिच्छंतो य इह समागतास्तान्यावदहं पश्यामि तावदुभयोः सेनयोर्म-
ध्ये रथं स्थापयेत्यन्वयः ॥ २३ ॥ ततः किं प्रवृत्तमित्यपेक्षायां ॥ संजय उवाच ॥ एवमिति ॥ गुडाका निद्रा त
स्या ईशेन जितनिद्रेणार्जुनेनैवमुक्तः सन् ॥ सेनयोर्मध्ये रथानामुत्तमं रथं हृषीकेशः स्थापितवान् ॥ २४

योत्स्यमानानवेक्षेहं य एतेऽत्र समागताः ॥ धार्त्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः ॥ २३ ॥ संजय उ-
वाच ॥ एवमुक्तो हृषीकेशो गुडाकेशेन भारत ॥ सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमं ॥ २४ ॥
भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षितां ॥ उवाच पार्थ पश्यैतान्समवेतान्कुरूनिति ॥ २५ ॥
तत्रापश्यत्स्थितान्पार्थः पितॄनथ पितामहान् ॥ आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखीं-
स्तथा ॥ २६ ॥ पितामहद्रोणमहीक्षितां राज्ञां च प्रमुखतः संमुखे रथं स्थापयित्वाऽमुना प्रकारेण
पार्थं दृष्ट्वा एतान् कुरून् पश्येत्युवाच ॥ २५ ॥ ततः किं प्रवृत्तमित्यत आह ॥ तत्रेति ॥ पितॄनिति पितृव्यानि

गीता०स०
७

त्यर्थः ॥ पुत्रान्पौत्रानिति दुर्योधनादीनां ये पुत्राः पौत्राश्च तानित्यर्थः । सखीन्मित्राणि सुहृदः कृतोप-
कारांश्चापश्यत ॥ २६ ॥ ततः किं कृतवानित्यत आह । तानिति । आविष्टो व्याप्तः ॥ २७ ॥ किमब्रवीदित्यपेक्षा-
माह । दृष्ट्वेममित्यादि यावदध्यायसमाप्तिः । हे कृष्ण योद्धुमिच्छं तं पुरतः सम्यगवस्थितमिमं स्वजनं दृष्ट्वा मम

श्वशुरान्सुहृदश्चैव सेनयोरुभयोरपि ॥ तान्समीक्ष्य स कौंतेयः सर्वान्बंधूनवस्थितान् ॥ २७ ॥ कृपया पर-
याविष्टो विषीदन्निदमब्रवीत् ॥ २७ ॥ अर्जुन उवाच ॥ दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितं ॥ सीदंति मम
गात्राणि मुखं च परिशुष्यति ॥ २८ ॥ वेपथुश्च शरीरे मे रोमहर्षश्च जायते ॥ गांडीवं स्रंसते हस्तात्त्वक्चैव
परिदह्यते ॥ २९ ॥ न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ॥ निमित्तानि च पश्यामि विपरीतानि केशव ३०

दीर्याणि गात्राणि करचरणादीनि । सीदंति विशीर्यंते ॥ २८ ॥ किंच । वेपथुश्चेति । वेपथुः कंपः । रोमहर्षो रोमांचः
संस्रते निपतति परिदह्यते सर्वतः संतप्यते ॥ २९ ॥ अन्यच्च न चेति । विपरीतानि निमित्तानि अरिष्टसूचकानि श- ७
कुनानि पश्यामि ॥ ३० ॥ ॥

किंच न चेति । स्वजनं आहवे युद्धे हत्वा श्रेयः फलं न पश्यामि ॥ ३१ ॥ विजयादिकं फलं किं न पश्यसी-
ति चेत्तत्राह । न कांक्ष इति । एतदेव प्रपंचयति । किं न इति सार्द्धाभ्यां । यदर्थमस्माकं राज्यादिक-
मपेक्षितं त एते प्राणान्धनानि त्यक्त्वा त्यागमंगीकृत्य युद्धायावस्थिताः । अतः किमस्माकं

न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे ॥ न कांक्षे विजयं कृष्ण न च राज्यं सुखानि च ॥ ३१ ॥
किं नो राज्येन गोविंद किं भोगैर्जीवितेन वा ॥ येषामर्थे कांक्षितं नो राज्यं भोगाः सुखानि च ॥ ३२ ॥
त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च ॥ आचार्याः पितरः पुत्रास्तथैव च पितामहाः ॥ ३३ ॥
मातुलाः श्वशुराः पौत्राः श्यालाः संबंधिनस्तथा ॥ एतान्न हंतुमिच्छामि घ्नतोऽपि मधुसूदन ॥ ३४ ॥

कं राज्यादिभिः कृत्यमित्यर्थः ॥ ३३ ॥ ननु कृपया त्वमेतान्न हंसि तर्हि त्वामेते राज्यलोभेन हनिष्यं-
त्येव । अतस्त्वमेवैतान्हत्वा राज्यं भुंक्ष्व । तत्राह सार्द्धेन । एतान्नेति । घ्नतोऽपि अस्मान्घातय

तोप्येतान्त्रैलोक्यराज्यस्यापिहेतोस्तान्स्वयमहंहंतुंनेच्छामि । किंपुनर्महीमात्रप्राप्त्यर्थमित्यर्थः ॥ ३५
ननुचाग्निदोगरदश्चैवशस्त्रपाणिर्धनापहः ॥ क्षेत्रदारहरश्चैवषडेतेह्याततायिनः । अग्निदाना
दिभिःषड्भिरपिहेतुभिः एतेतावदाततायिनः । आततायिनांवधोयुक्तएव । आततायिनमायान्तंह
न्यादेवाविचारयन् । नाततायिवधेदोषोहंतुर्भवतिकश्चनेतिवचनात् । तत्राहसार्द्धेन ॥ पापमिति । आत

अपित्रैलोक्यराज्यस्यहेतोःकिंनुमहीकृते ॥ निहत्यधार्तराष्ट्रान्नःकाप्रीतिःस्याज्जनार्दन ३५ ।
पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः ॥ तस्मान्नार्हावयंहंतुंधार्तराष्ट्रान्सबांधवान् ३६ ।

तायिनमायान्तमित्यादिकमर्थशास्त्रंहि तच्चधर्मशास्त्राद्दुर्बलं । यथोक्तंयाज्ञवल्क्येन । स्मृत्योर्विरो
धेन्यायस्तुबलवान्व्यवहारतः ॥ अर्थशास्त्रात्तुबलवद्धर्मशास्त्रमितिस्थितिः ॥ तस्मादाततायिनाम
प्येतेषामाचार्यादीनांवधेस्माकंपापमेवभवेत् ॥ अन्याय्यत्वादधर्मत्वाच्चतद्वधस्य ॥ ३६ ॥ ॥

नचैहसुखंस्यादित्याह ॥ स्वजनंहीति ॥ ननुतवैवैतेषामपिबंधुवधदोषेसमानेसतियथैवैतेबंधुवधमं
गीकृत्ययुद्धेप्रवर्त्तंतेतथैवभवानपिप्रवर्त्ततांकिमनेनविषादेनेत्यतआह ॥ द्वाभ्यां ॥ यद्यपीति ।
राज्यलोभेनोपहतंभ्रष्टंविवेकंचेतोयेषांतएतेदुर्योधनादयोयद्यपिदोषंनपश्यंतितथाप्यस्माभि

स्वजनंहिकथंहत्वासुखिनःस्याममाधव ॥ यद्यप्येतेनपश्यंतिलोभोपहतचेतसः ॥ ३७ ॥
कुलक्षयकृतंदोषंमित्रद्रोहेचपातकं ॥ कथंनज्ञेयमस्माभिःपापादस्मान्निवर्त्तितुं ॥ ३८ ॥
कुलक्षयकृतंदोषंप्रपश्यद्भिर्जनार्दन ॥ ३९ ॥ कुलक्षयेप्रणश्यंतिकुलधर्माःसनातनाः ॥
धर्मेनष्टेकुलंकृत्स्नमधर्मोभिभवत्युत ॥ ४० ॥ दोषंप्रपश्यद्भिरस्मात्पापान्निवर्त्तितुंकथन्नज्ञेयं ।
निवृत्तावेवबुद्धिःकर्त्तव्येत्यर्थः ॥ ३९ ॥ तमेवंदोषंदर्शयति ॥ कुलक्षयइति सनातनाःपरंपराप्राप्ताः
तत्रापिकृत्स्नमपि ॥ अवशिष्टंकुलंअधर्मोऽभिभवतिव्याप्नोतीति ॥ ४० ॥ ॥

तत्स्वाधर्मोभिभवतीति ॥ एवंसतिसंकरइतिएषांकुलघ्नानांपितरः पतंतिहियस्मात्लुप्ताःपिं
डोदकक्रियायेषांते ॥ ४२ ॥ उक्तंदोषमुपसंहरति ॥ द्वाभ्यां ॥ दोषैरेतैरिति ॥ उत्साद्यंतेलुप्यंतेजाति ल
धर्मावर्णधर्माः ॥ कुलधर्माश्चचकारादाश्रमधर्मादयोपिगृह्यंते ॥ ४३ ॥ उत्सन्नेति ॥ उत्सन्नाःकुलधर्मा

अधर्माभिभवात्कृष्णप्रदुष्यंतिकुलस्त्रियः ॥ स्त्रीषुदुष्टासुवार्ष्णेयजायतेवर्णसंकरः ॥ ४१ ॥
संकरोनरकायैवकुलघ्नानांकुलस्यच ॥ पतंतिपितरोह्येषांलुप्तपिंडोदकक्रियाः ॥ ४२ ॥
दोषैरेतैःकुलघ्नानांवर्णसंकरकारकैः ॥ उत्साद्यंतेजातिधर्माःकुलधर्माश्चशाश्वताः ॥ ४३ ॥
उत्सन्नकुलधर्माणांमनुष्याणांजनार्दनः ॥ नरकेनियतंवासोभवतीत्यनुशुश्रुम ॥ ४४ ॥

येषामित्युत्सन्नजातिधर्मादीनामुपलक्षणं ॥ अनुशुश्रुमःश्रुतवंतोवयं ॥ प्रायश्चित्तमकुर्वाणाः १०
पापेषुनिरतानराः ॥ अपश्चात्तापिनःकष्टान्निरायान्यांतिदारुणानित्यादिवचनेभ्यः ॥ ४४ ॥

बंधुवधव्यवसायेनसंतप्यमानआह ॥ अहोइति ॥ स्वजनंहंतुमुद्यताइतियतएतन्महत्पातकं
कर्तुमध्यवसायंकृतवंतोवयंअहोबतकष्टमित्यर्थः ॥ ४५ ॥ एवंसंततःसन्मृत्युमेवाशासानः
आह ॥ यदीति ॥ अकृतप्रतीकारंतूष्णीमुपविष्टंमायदिहनिष्यंतितर्हितद्धननंममक्षेमतरं

अहोबतमहत्पापंकर्तुंव्यवसितावयं ॥ यद्राज्यसुखलोभेनहंतुंस्वजनमुद्यताः ॥ ४५ ॥
यदिमामप्रतीकारमशस्त्रंशस्त्रपाणयः ॥ धार्तराष्ट्रारणेहन्युस्तन्मेक्षेमतरंभवेत् ॥ ४६ ॥
संजयउवाच ॥ एवमुक्त्वार्जुनःसंख्येरथोपस्थउपाविशत् ॥ विसृज्यसशरंचापंशोकसं
विग्नमानसः ॥ ४७ ॥ मत्यंतंहितंभवेत् ॥ पापानिष्पत्तेः ॥ ४६ ॥ ततःकिंवृत्तमित्यपेक्षायां
संजयउवाच ॥ एवमिति ॥ संख्येसंग्रामेरथोपस्थेरथस्योपरिउपाविशत् ॥ उपविवेशशो
कसंविग्नप्रकंपितंमानसंचित्तंयस्यसः ॥ ४७ ॥ ॥

इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेसुबोधिन्यां
टीकायांश्रीधरस्वामिविरचितायांप्रथमोऽध्यायः॥१॥ततःकिंवृत्तमित्यपेक्षायांसंजयउ
वाच॥तंतथेति॥अश्रुभिःपूर्णेआकुलेईक्षणेयस्यतं॥तथोक्तप्रकारेणविषीदंतमर्जुन

इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेऽर्जुन
विषादोनामप्रथमोऽध्यायः॥१॥संजयउवाच॥तंतथाकृपयाविष्टमश्रुपूर्णाकुलेक्षणं
विषीदंतमिदंवाक्यमुवाचमधुसूदनः॥१॥श्रीभगवानुवाच॥कुतस्त्वाकश्मलमिदंवि
षमेसमुपस्थितं॥अनार्यजुष्टमस्वर्ग्यमकीर्त्तिकरमर्जुन॥२॥ ॥

प्रतिमधुसूदनइदंवाक्यमुवाच॥१॥तदेववाक्यमाहकुतइति॥कुतोहेतोःत्वाइतित्वांविषमेसंक
टेइदंकश्मलंसमुपस्थितं॥अयंमोहःप्राप्तः॥यतआर्यैरसेवितंअस्वर्ग्यमधर्म्ममयशस्करंच॥२॥ १०

तस्मात्क्लैब्यमिति॥हेपार्थक्लैब्यंकातर्यंमास्मगमः॥नप्राप्नुहि॥यतस्त्वय्येतन्नोपप
द्यते॥योग्यंनभवति॥क्षुद्रंतुच्छंहृदयदौर्बल्यंकातर्यंत्यक्त्वायुद्धायोत्तिष्ठपरंतापनशत्रु
तापन॥नाहंकातरत्वेनयुद्धादुपरतोस्मिकिंतुयुद्धस्यान्याय्यत्वादित्यर्जुनउवाच॥३

क्लैब्यंमास्मगमःपार्थनैतत्त्वय्युपपद्यते॥क्षुद्रंहृदयदौर्बल्यंत्यक्त्वोत्तिष्ठ
परंतप॥३॥अर्जुनउवाच॥कथंभीष्ममहंसंख्येद्रोणंचमधुसूदन॥इ
षुभिःप्रतियोत्स्यामिपूजार्हावरिसूदन॥४॥ ॥

कथमितिभीष्मद्रोणौपूजायामर्हौयोग्यौतौप्रतिकथमहंयोत्स्यामि॥तत्रापिइषुभि
ः॥यत्रवाचापियोत्स्यामिइति॥वक्तुमनुचितंतत्रबाणैःकथंयोत्स्यामीत्यर्थः॥४
हेअरिसूदन॥शत्रुसूदन॥४॥तर्हितावद्देहयात्रापिनस्यादितिचेत्तत्राह॥गुरूनिति

गीता॰स॰
११

गुरून्द्रोणादीन्अहत्वा परलोकविरुद्धो गुरुवधस्तंअकृत्वा इहलोके भिक्षान्नमपि भोक्तुं
श्रेय उचितं विपक्षे तु न केवलं परत्र दुःखं इहैव तु नरकदुःखमनुभवेयमित्याह ॥ गुरू-
नहत्वा इहैव तु रुधिरेण प्रदिग्धान्प्रकर्षेण लिप्तान्अर्थकामात्मकान्भोगानहं भुं-
जीय अश्नीयां ॥ यद्वा ॥ अर्थकामानिति गुरूणां विशेषणं ॥ अर्थतृष्णाकुलत्वादेते ता-

गुरूनहत्वा हि महानुभावान्श्रेयो भोक्तुं भैक्ष्यमपीह लोके ॥ हत्वार्थका-
मांस्तु गुरूनिहैव भुंजीय भोगान्रुधिरप्रदिग्धान् ॥५॥ ॥

वद्युद्धान्न निवर्त्तेरन् ॥ तस्मादेतद्वधः प्रसज्येतैवेत्यर्थः ॥ तथा च युधिष्ठिरं प्रति भीष्मे-
णोक्तं ॥ अर्थस्य पुरुषो दासो दासस्त्वर्थो न कस्यचित् ॥ इति सत्यं महाराज बद्धो-
स्म्यर्थेन कौरवैरिति ॥५॥ ॥ ११

किंच ॥ यद्यप्यधर्ममंगीकरिष्यामः ॥ तथापि किमस्माकं जयः ॥ पराजयो वा भवेदिति न ज्ञायत इ-
त्याह न चेति ॥ एतद्द्वयोर्मध्ये नोस्माकं कतरत् किन्नाम गरीयोऽधिकतरं भवतीति न विद्मः ॥ तदेवद्वयं द-
र्शयति ॥ यद्वा ॥ एतान्वयं जयेम जेष्यामः यदि वा नोऽस्मानेते जयेयुर्जेष्यंतीति ॥ किंचास्माकं जयोपि
फलतः पराजय एवेत्याह ॥ यानेव हत्वा जीवितुं नेच्छामस्त एवैते संमुखेवस्थितः ॥६॥ तस्मात्कार्पण्येति ॥

नचैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुः ॥ यानेव हत्वा न जिजीविषामस्तेवस्थिताः
प्रमुखे धार्त्तराष्ट्राः ॥६॥ कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसंमूढचेताः ॥ यच्छ्रेयः स्यान्निश्चि-
तं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नं ॥७॥

कार्पण्यदोषोपहतस्वभावः ॥ एतान्हत्वा कथं जीविष्या-
म इति कार्पण्यं दोषः स्वकुलक्षयकृतः ताभ्यामुपहतोऽभिभूतः स्वभावः शौर्यादिलक्षणो यस्य सोहं त्वां
पृच्छामि ॥ तथा धर्मे संमूढं चेतो यस्य सः ॥ युद्धं त्यक्त्वा भिक्षान्नमपि क्षत्रियस्य धर्मो वाऽधर्मो वेति संदिग्ध

खिन्नः सन्नित्यर्थः । अतो मे यन्निश्चितं श्रेयो युक्तं स्यात्तन्मे ब्रूहि किं च तेऽहं शिष्यः शासनार्हः अतस्त्वां प्रप
न्नं शरणागतं मां शाधि शिक्षय ॥ ७ ॥ त्वमेव विचार्य यद्युक्तं तत्कुर्विति चेत्तत्राह । न हीति । इंद्रियाणामु
च्छोषणं मच्छोषकरं महीयं शोकं यत्कर्माऽपनुद्यात् ॥ अपनयेत् । तदहं न प्रपश्यामि यद्यपि भूमौ निः

न हि प्रपश्यामि ममापनुद्याद्यच्छोकमुच्छोषणमिंद्रियाणां । अवाप्य भूमावसपत्नमृद्धं राज्यं सुराणामम
पि चाधिपत्यं ॥ ८ ॥ संजय उवाच । एवमुक्त्वा हृषीकेशं गुडाकेशः परंतपः । न योत्स्य इति गोविंदमुक्त्वा तू
ष्णीं बभूव ह ॥ ९ ॥ तमुवाच हृषीकेशः प्रहसन्निव भारत । सेनयोरुभयोर्मध्ये विषीदंतमिदं वचः ॥ १० ॥

कंटकं समृद्धं राज्यं प्राप्स्यामि तथा सुरेंद्रत्वमपि यदि प्राप्स्यामि । एवमभीष्टं तत्सर्वमवाप्यापि शो
कापनोदयोपायं न प्रपश्यामीत्यन्वयः ॥ ८ ॥ एवमुक्त्वार्जुनः किं कृतवानित्यपेक्षायां । संजय उवाच ।
एवमिति स्पष्टार्थः ॥ ९ ॥ ततः किं वृत्तमित्यत आह । तमुवाचेति प्रहसन्निति । प्रसन्नमुखो हसन्नित्यर्थः ॥ १० ॥

देहात्मनोरविवेकादस्यैवं शोको भवतीति तद्विवेकप्रदर्शनार्थं श्रीभगवानुवाच । अशोच्या
निति ॥ शोकस्याविषयभूतानेव बंधून्त्वमन्वशोचः शोचितवानसि । दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं स
मुपस्थितमित्यादिना ॥ तत्र कुतस्त्वा कश्मलमिदं विषमे समुपस्थितमित्यादिना मया बोधितोपि पु
नः प्रज्ञावतां पंडितानां वादान् शब्दान् कथं भीष्ममहं संख्य इत्यादीन् केवलं भाषसे न तु पंडितोसि

श्रीभगवानुवाच । अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे । गतासूनगतासूंश्च नानुशो
चंति पंडिताः ॥ ११ ॥
यतः गतासून् गतप्राणान् बंधून् अगतासूंश्च जीवतोपि बंधुहीनाः कथं
जीविष्यंतीति नानुशोचंति ॥ ११ ॥ अशोच्यत्वे हेतुमाह न त्वेवेति । यथाहं परमेश्वरो जातु कदाचि
ल्लीलाविग्रहस्य विभावे तिरोभावेपि नासमिति जातु नैव अपि त्वासमेवानादित्वात् । न च त्वं नासीः अ
नादिः अपि त्वासीरेवा ॥ इमे जनाधिपा नृपाः नासन्निति न अपि त्वासन्नेव मंदं ज्ञातात् । तथा अतः

परं इत ऊर्ध्वमपि न भविष्यामो न स्थास्याम इति चेन्नैव नापि स्थास्यामः॥ एवं जन्ममरणशून्यत्वादशो
च्या इत्यर्थः॥१२॥ नन्वीश्वरस्य तव जन्मादिशून्यत्वं सत्यमेव जीवानां तु जन्ममरणे प्रसिद्धे तत्राह॥
देहिन इति॥ देहिनो देहाभिमानिनो जीवस्य यथास्मिन्स्थूलदेहे कौमाराद्यवस्था देहनिबंध
नाएव न तु स्वतः पूर्वावस्थानाशेऽवस्थांतरोत्पत्तावपि स एवाहमिति॥ प्रत्यभिज्ञानात्

नत्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः॥ न चैव न भविष्यामः सर्वे वयमतः परं॥१२॥
देहिनोस्मिन्यथा देहे कौमारं यौवनं जरा॥ तथा देहांतरप्राप्तिर्धीरस्तत्र न मुह्यति॥१३॥

एवं तद्देहनाशे देहांतरप्राप्तिरपि लिंगदेहनिबंधनान्न तु तावदात्मनो नाशः जातमात्रस्य
पूर्वसंस्कारेण स्तन्यपानादौ प्रवृत्तिदर्शनादतो धीरः॥ धीमान्तत्र तयोर्देहनाशोत्पत्त्योर्न १३
मुह्यति॥ आत्मैव जातो मृतश्चेति न मन्यते॥१३॥ ॥

न तु गतानागतानहं शोचामि किंतु॥ तद्वियोगादिदुःखभाजमात्मानमेवेति चेत्तत्राह॥ मात्रास्पर्शा इ
ति मीयंते विषया आभिरिति मात्रा इंद्रियवृत्तयः॥ तासां स्पर्शाः विषयैः संबंधास्ते शीतोष्णादिप्रदा भवंति
ते त्वागमापायित्वादनित्या अस्थिराः॥ अतस्तांस्तितिक्षस्व सहस्व॥ यथा जलातपादिसंपर्कास्तत्काल
कृताः स्वभावतः शीतादि प्रयच्छंति॥ एवमिष्टसंयोगवियोगा अपि सुखदुःखादि प्रयच्छंति तेषां च॥

मात्रास्पर्शास्तु कौंतेय शीतोष्णसुखदुःखदाः॥ आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत॥
१४॥ यं हि न व्यथयंत्येते पुरुषं पुरुषर्षभ॥ समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते॥१५॥

स्थिरत्वात्सहनं तव धीरस्योचितं न तु तन्निमित्तं हर्षविषादपारवश्यमित्यर्थः॥१४॥ तत्प्रतीकारप्र
यत्नादपि तत्सहनमेवोचितं महाफलत्वादित्याह॥ यमिति॥ एते मात्रास्पर्शा यं पुरुषं न व्यथयंति॥
नाभिभवंति॥ समे सुखदुःखे यस्य तं स तैरविक्षिप्यमाणो धर्मज्ञानद्वारेणामृतत्वाय मोक्षाय कल्प
ते योग्यो भवति॥१५॥ ॥

गीता०स०
१४

ननु तथापि शीतोष्णादिकमपि दुःसहं कथं सोढव्यं ॥ अत्यंतं तत्सहने च कदाचिदात्मनाशस्यापि
संभवादित्याशंक्य तत्त्वविचारतः सर्वं सोढुं शक्यमित्याशयेनाह ॥ नेति ॥ असतः अनात्मधर्म
त्वादविद्यमानस्य शीतोष्णादेरात्मनि भावः ॥ सत्ता न विद्यते तथा सतः सत्स्वभावस्यात्मनो
अभावो विनाशो न विद्यते ॥ एवमुभयोः सदसतोरंतो निर्णयो दृष्टः ॥ कैस्तत्त्वदर्शिभिर्वस्तुयथा

नासतो विद्यते भावो नाभावो विद्यते सतः ॥ उभयोरपि दृष्टोंऽतस्त्वनयोस्तत्त्वदर्शिभिः ॥१६॥
अविनाशि तु तद्विद्धि येन सर्वमिदं ततं ॥ विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति ॥१७॥

त्म्यविद्भिः ॥ एवंभूतविवेकेन सहस्वेत्यर्थः ॥१६॥ तत्र सत्स्वभावं अविनाशि वस्तु सामान्येनोक्तं
विशेषतो दर्शयति ॥ अविनाशि तु तद्विद्धीति ॥ येन सर्वमिदमागमापायधर्मकं देहादिकं ततं
ना साक्षित्वेन व्याप्तं तत्तु आत्मस्वरूपं ॥ अविनाशि विनाशशून्यं विद्धि जानीहि तत्र हेतुमाह ॥ विनाशमिति ॥१७ १४

वं आगमापायिधर्मकमेकं संदर्शयति ॥ अंतवंत इति ॥ अंतो नाशो विद्यते येषां ते अंतवंतः ॥ नित्य
स्य सर्वदैकरूपस्य शारीरिणः शरीरवंतः ॥ अत एव अविनाशिनो ॥ अप्रमेयस्यापरिच्छिन्नस्यात्म
नः इमे सुखदुःखादिधर्मका देहा उक्तास्तत्त्वदर्शिभिः ॥ यस्मादेवमात्मनो न विनाशः ॥ न च सुखदुः
खादिसंबंधस्तस्मान्मोहजं शोकं त्यक्त्वा युध्यस्व ॥ स्वधर्मं मा त्याक्षीरित्यर्थः ॥१८॥ न द्वैवं भीष्मा

अंतवंत इमे देहा नित्यस्योक्ताः शरीरिणः ॥ अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत ॥१८॥
य एनं वेत्ति हंतारं यश्चैनं मन्यते हतं ॥ उभौ तौ न विजानीतो नायं हंति न हन्यते ॥१९॥

दिमृत्युनिमित्तशोको निवारितः ॥ यच्चात्मनो हंतृत्वनिमित्तं दुःखमुक्तं ॥ एतान्न हंतुमिच्छामीत्या
दिना तदपि तद्वदेव निर्निमित्तमित्याह ॥ य एनमिति ॥ एनमात्मानं हननक्रियायां कर्मत्वं वा कर्तृत्व
मपि नास्तीत्यर्थः ॥ तत्र हेतुर्नायमिति ॥१९॥ न हन्यत इत्येतदेव षड्भावविकारशून्यत्वेनाह न जायत इति

नजायतइति॥जन्मप्रतिषेधः।नम्रियतेचेतिविनाशप्रतिषेधः।वाशब्दौचार्थे।नचायंभूत्वाभूयोभवि-
ताभवति॥अस्तित्वंभजतेकिंतुप्रागेवसतःरूपइतिजन्मांतरास्तित्वलक्षणद्वितीयविकारप्रतिषेधः।अ
त्रहेतुः॥यस्मादजः।योहिजायतेसजन्मांतरमस्तित्वंभजतेनतुयःस्वयमेवास्तिसभूयोऽप्यन्यदस्तित्वंभ-
जतइत्यर्थः॥नित्यःसर्वदैकरूपइतिवृद्धिप्रतिषेधः।शाश्वतःशश्वद्भवइत्यपक्षयप्रतिषेधः।पुराणइति

नजायतेम्रियतेवाकदाचिन्नायंभूत्वाभवितावानभूयः।अजोनित्यःशाश्वतोयंपुराणोनहन्यतेह-
न्यमानेशरीरे॥२०॥

विपरिणामप्रतिषेधः।पुरापिनवएव।नतुपरिणामतोरूपांतरंप्राप्यनवीभवतीत्यर्थः
यद्वानभवितेत्यस्यानुषंगंकृत्वाभूयोधिकंयथाभवतितथानभवतीतिवृद्धिप्रतिषेधः।अजोनित्यइतिचो
भयंहेत्वभावेहेतुस्त्वपौनरुक्त्यंतदेवंजायतेअस्तिवर्धतेविपरिणमतेअपक्षीयतेनश्यतीत्येवंयास्कादिभिरु
क्ताःषड्भावविकारानिरस्ताः।यद्वायमितेविकाराइतिनिरस्ताः।प्रस्तुतंविनाशाभावमुपसंहरतिनहन्यतेहन्यमा- १५
नेशरीरइति॥२०॥

एवंभूतात्मनोवधोपिपूर्वोक्तिःसिद्धइत्याह।वेदेति।नित्यंवृद्धिशून्यंअव्ययंअपक्षयशून्यंअजम
विनाशिनंचयोवेदसएवंपुरुषःकंघ्नंहंतिकथंवाहंति।एवंभूतस्यवधेसाधनाभावात्।तथास्वयंप्र
योजकः।भूत्वाअन्येनकंघातयतिकथंवाघातयतिनकथंचिदपीत्यर्थः।अनेनमप्यपिप्रयोजककर्ता
दोषदृष्टिंमाकार्षीरित्युक्तंभवति॥२१॥नन्वात्मनोनाशोपितदीयशरीरनाशंपश्यतोऽस्यशोचामीतिचे

वेदाविनाशिनंनित्यंयएनमजमव्ययं।कथंसपुरुषःपार्थकंघातयतिहंतिकं॥२१॥वासांसि
जीर्णानियथाविहायनवानिगृह्णातिनरोऽपराणि।तथाशरीराणिविहायजीर्णान्यन्यानि
संयातिनवानिदेही॥२२॥

तत्राह।वासांसीति।कर्मनिबंधनानांनूतनानांदेहानामवश्यंभा
वित्वाततजीर्णदेहनाशेशोकावकाशइत्यर्थः॥२२॥कथंहंतीत्यनेनोक्तंवधसाधनाभावंदर्श
यन्नविनाशित्वंआत्मनःस्फुटीकरोति।नैनमिति।अपोनैनंक्लेदयंतिमृदुकरणेनशिथि-

गीता॰स॰ १६ दंनकुर्वंति॥२३॥तत्रहेतुमाह॥अछेद्यइत्यादिसार्द्धेन॥निरवयत्वादछेद्योयमक्लेद्यश्च॥अ
मूर्त्तत्वाददाह्यः द्रवत्वाभावादशोष्यइतिभावः॥अतश्छेदादियोग्योनभवति॥यतोनि
त्यः॥अविनाशीसर्वत्रगतःस्थाणुःस्थिरस्वभावः॥रूपांतरापत्तिशून्यः॥अचलःपूर्वरूप

नैनंछिंदंतिशस्त्राणिनैनंदहतिपावकः॥नचैनंक्लेदयंत्यापोनशोषयतिमारुतः॥२३॥
अछेद्योयमदाह्योयमक्लेद्योशोष्यएवच॥नित्यःसर्वगतःस्थाणुरचलोयंसनातनः॥२४॥
अव्यक्तोयमचिंत्योयमविकार्योयमुच्यते॥तस्मादेवंविदित्वैनंनानुशोचितुमर्हसि॥२५॥

परित्यागी॥सनातनोऽनादिः॥२४॥किंच॥अव्यक्तश्चक्षुराद्यविषयः॥अचिंत्योमनसोप्य
विषयः॥अविकार्य्यःकर्मेंद्रियाणामप्यगोचरइत्यर्थः॥उच्यतइतिनित्यत्वाद्यभियु
क्तोक्तिंप्रमाणयति॥उपसंहरति॥तस्मादिति॥२५॥ ॥ १६

तदेवमात्मनोजन्मविनाशाभावान्नशोकः॥कार्यइत्युक्तं॥इदानींदेहेनसहात्मनोजन्मतद्विनाशौ
चविनाशमंगीकृत्यापिशोकोनकार्यइत्याह॥अथचेति॥अथयद्यपित्वमात्मानंनित्यंसर्वदा
तद्देहेजातेजातंमन्यसे॥तथातद्देहेमृतेमृतंमन्यसे॥पुण्यपापयोस्तत्फलभूतयोरात्मगामित्वात्त
थापित्वंशोचितुंनार्हसि॥२६॥कुतइत्यतआह॥जातस्येति॥हियस्मात्जातस्यस्वारंभककर्मक्षयेम्र

न्य अथचैनंनित्यजातंनित्यंवाममसेमृतं॥तथापित्वंमहाबाहोनैवंशोचितुमर्हसि॥२६॥
जातस्यहिध्रुवोमृत्युर्ध्रुवंजन्ममृतस्यच॥तस्मादपरिहार्येर्थेनत्वंशोचितुमर्हसि॥२७॥

त्युर्ध्रुवोनिश्चितः॥मृतस्यतद्देहकृतेनकर्मणाजन्मापिध्रुवमेव॥तस्मादेवापरिहार्येऽर्थेऽवश्यंभा
विनिजन्ममरणलक्षणेऽर्थेत्वंविद्वान्शोचितुंनार्हसियोग्योभवति॥२७॥किंचदेहानांस्वभावं
पर्यालोच्यतदुपाधिकेआत्मनोजन्ममरणेशोकोनकार्यइत्याह॥अव्यक्तादीनीति॥अव्यक्तंप्र

ष्पानंतदेवस्याश्रिरुत्पत्तेः पूर्वरूपंयेषांतान्यव्यक्तादीनिभूतानिशरीराणिकारणात्मनास्थितानामेवोत्प
त्तेः तथाव्यक्तंमध्यंजन्ममरणांतरालस्थितिलक्षणंयेषां ॥ अव्यक्तेनिधनंलयोयेषांतानीमान्येवंभूतान्येवतत्र
तेषुकापरिदेवना ॥ कःशोकनिमित्तोविलापः प्रतिबुद्धस्यस्वप्नदृष्टबंधुष्विवशोकोनयुज्यतइत्यर्थः ॥ २८ ॥ कु

अव्यक्तादीनिभूतानिव्यक्तमध्यानिभारत ॥ अव्यक्तनिधनान्येवतत्रकापरिदेवना ॥ २८ ॥ आश्चर्यव
त्पश्यतिकश्चिदेनमाश्चर्यवद्वदतितथैवचान्यः ॥ आश्चर्यवच्चैनमन्यःशृणोतिश्रुत्वाप्येनंवेदनचैवकश्चित् ॥ २९

तस्तर्हिविद्वांसोपिलोकेशोचंतिआत्माज्ञानादेवेत्याशयेनात्मनोदुर्विज्ञेयतामाह ॥ आश्चर्यवदिति ॥ कश्चिदेन
मात्मानंशास्त्राचार्योपदेशाभ्यामाश्चर्यवत्पश्यति ॥ सर्वगतस्यनित्यज्ञानानंदस्वभावस्यात्मनोऽलौकिकत्वादैंद्र
जालिकवद्घटमानंपश्यन्निवविस्मयेनपश्येति ॥ असंभावनाभिभूतत्वात् ॥ तथान्यआश्चर्यवदेनंवदतिशृणो
तिचान्यःकश्चित्पुनर्विपरीतभावनाभिभूतःश्रुत्वापिनैववेदचशब्दादुक्त्वापिदृष्ट्वापिनसम्यग्वेदेतिद्रष्टव्यं ॥ २९ ॥ १७

तदेवंदुर्बोधमात्मतत्त्वंसंक्षेपेणोपदिशंस्तस्याशोच्यत्वमुपसंहरति ॥ ३० ॥ यच्चोक्तमर्जुनेनवेपथुश्चश
रीरेमेरोमहर्षश्चजायतइति ॥ तदप्ययुक्तमित्याह ॥ स्वधर्ममिति ॥ आत्मनोनाशाभावादेवतेषांहननेपिवि
कंपितुंनार्हसि ॥ किंच स्वधर्ममपिचावेक्ष्यविकंपितुंनार्हसीतिसंबंधः ॥ यच्चोक्तं ॥ नचश्रेयोनुपश्यामिह

देहीनित्यमवध्योयंदेहेसर्वस्यभारत ॥ तस्मात्सर्वाणिभूतानिनत्वंशोचितुमर्हसि ॥ ३० ॥
स्वधर्ममपिचावेक्ष्यनविकंपितुमर्हसि ॥ धर्म्याद्धियुद्धाच्छ्रेयोऽन्यत्क्षत्रियस्यनविद्यते ॥ ३१ ॥
यदृच्छयाचोपपन्नंस्वर्गद्वारमपावृतं ॥ सुखिनःक्षत्रियाःपार्थलभंतेयुद्धमीदृशं ॥ ३२ ॥

त्वास्वजनमाहवइत्यादि ॥ तत्राह ॥ धर्म्यादिति ॥ धर्मादनपेतात्न्याय्याद्युद्धादन्यत् ॥ ३ किंच
महतिश्रेयसिस्वयमेवोपगतेसतिकुतोविकंपसइत्याह ॥ यदृच्छयेति ॥ यदृच्छयाऽप्रार्थितमेवोपपन्नं
प्राप्तमीदृशंयुद्धंसुखिनः ॥ सभाग्याएवलभंते यतोनिरावरणंस्वर्गद्वारमेवैतत् ॥ यद्वायएवविधंयुद्धंलभं

तेतराव सुखिन इत्यर्थः ॥ एतेन स्वजनं हि हत्वा सुखिनः स्याम माधवेति यदुक्तं तन्निरस्तं भवति ॥ ३२ ॥ विपक्षे दो
षमाह ॥ अथ चेत्त्वमिति ॥ ३३ ॥ किंच ॥ अकीर्त्तिमिति ॥ अव्ययां शाश्वतीं संभावितस्य बहुमानितस्य अ
तिरिच्यतेऽधिका भवति ॥ ३४ ॥ किंच ॥ भयादिति ॥ येषां बहुगुणत्वेन त्वं पूर्वं संमतोऽभूस्त एव भयेन संग्रा

अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि ॥ ततः स्वधर्मं कीर्त्तिं च हित्वा पापमवाप्स्यसि ॥ ३३ ॥
अकीर्त्तिं चापि भूतानि कथयिष्यंति तेऽव्ययां ॥ संभावितस्य चाकीर्त्तिर्मरणादतिरिच्यते ॥ ३४ ॥
भयाद्रणादुपरतं मंस्यंते त्वां महारथाः ॥ येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवं ॥ ३५ ॥ अ
वाच्यवादांश्च बहून्वदिष्यंति तवाहिताः ॥ निंदंतस्तव सामर्थ्यं ततो दुःखतरं नु किं ॥ ३६ ॥

मात्त्वां निवृत्तं मन्येरन् ॥ ततश्च पूर्वं बहुमतो भूत्वा लाघवं यास्यसि ॥ ३५ ॥ किंच ॥ अवाच्येति ॥
अवाच्यान्वादान्वचनानर्हान् शब्दान् तवाहितास्तव शत्रवो वदिष्यंति ॥ ३६ ॥ १८

यच्चोक्तं ॥ न चैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुरिति तत्राह ॥ हतो वेति पक्षद्वयेऽपि
तव लाभ एवेत्यर्थः ॥ ३७ ॥ यदप्युक्तं ॥ पापमेवाश्रयेदस्मानिति तत्राह ॥ सुखदुःखे समे कृत्वा तथा तयोः
कारणभूतौ लाभालाभावपि तयोरपि कारणभूतौ जयाजयावपि समौ कृत्वा ॥ एतेषां समत्वे कारणं
हर्षविषादराहित्यं युज्यस्व सन्नद्धो भव ॥ सुखाद्यभिलाषं हित्वा स्वधर्मबुध्या युध्यमानः पापं न प्राप्स्यसी
॥

हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीं ॥ तस्मादुत्तिष्ठ कौंतेय युद्धाय कृतनिश्चयः ॥ ३७ ॥ सु
खदुःखे समे कृत्वा लाभालाभौ जयाजयौ ॥ ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥ ३८ ॥

त्यर्थः ॥ ३८ ॥ उपदिष्टं ज्ञानयोगमुपसंहरन् ॥ तत्साधनं कर्मयोगं प्रस्तौति ॥ एषा तेऽभिहितेति ॥ सम्यक् ख्याय
ते प्रकाश्यते वस्तुतत्त्वमनयेति ॥ संख्या सम्यक् ज्ञानं तस्मिन् प्रकाशमानमात्मतत्त्वं सांख्यं ॥ तस्मिन् क
रणीया बुद्धिरेषा तवाभिहिता ॥ एवमभिहितायामपि सांख्यबुद्धौ तव चेदात्मतत्त्वमपरोक्षं न संभ

वति ॥ तर्हींतःकरणशुद्धिद्वारात्मतत्वापरोक्षार्थं कर्मयोगे त्विमां बुद्धिं शृणु ॥ ययाबुद्ध्यायुक्तः परमेश्वरार्पि
तकर्मयोगेन शुद्धांतःकरणः सन् तत्प्रसादप्राप्तापरोक्षज्ञानेन कर्मात्मकं बंधं प्रकर्षेण हास्यसि त्यक्ष्य
सि ॥ ३९ ॥ ननु कृष्यादिवत्कर्मणां कदाचिद्विघ्नबाहुल्येन फलव्यभिचारान्मंत्राद्यंगवैगुण्येन च प्रत्य

एषा तेभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु ॥ बुद्ध्यायुक्तो यया पार्थ कर्मबंधं प्रहास्यसि ॥ ३९ ॥
नेहाभिक्रमनाशोस्ति प्रत्यवायो न विद्यते ॥ स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥ ४० ॥

वायसंभवात्कुतः कर्मयोगेन कर्मबंधप्रहरणं तत्राह ॥ नेहेति ॥ इह निःकामकर्मयोगे त्वभिक्र
मस्य प्रारंभस्य नाशो निःफलत्वं नास्ति प्रत्यवायश्च न विद्यते ईश्वरोद्देशेनैव विघ्नवैगुण्याद्यसं
भवात् ॥ किंच ॥ अस्य धर्मस्य स्वल्पमप्युपक्रममात्रमपि कृतं महतो भयात्संसारात्त्रायते
रक्षति ॥ ननु काम्यकर्मवत्किं निर्वैगुण्यादिना नैष्फल्यमस्येत्यर्थः ॥ ४० ॥ ॥ १९

कुतस्त्यपेक्षायामुभयोर्वैषम्यमाह व्यवसायेति ॥ इह ईश्वराराधनलक्षणे कर्मयोगे व्यवसायात्मिका परमे
श्वरभक्त्यैव ध्रुवं तरिष्यामीति निश्चयात्मिका एकैकनिष्ठैव बुद्धिर्भवति अव्यवसायिनां तु बहिर्मुखानां
कामिनां कामानामानंत्यात् अनंतास्तत्रापि हि कर्मफलादिभेदात् बहुशाखाश्च बुद्धयो भवंति ॥ ईश्वराराध
नार्थं हि नित्यं नैमित्तिकं कर्म किंचिदंगवैगुण्येनापि न नश्यति यथाशक्नुयात्तथा कुर्यादिति हि विधीय

व्यवसायात्मिका बुद्धिरेकेह कुरुनंदन ॥ बहुशाखा ह्यनंताश्च बुद्धयोऽव्यवसायिनां ॥ ४१ ॥ या
मिमां पुष्पितां वाचं प्रवदंत्यविपश्चितः ॥ वेदवादरताः पार्थ नान्यदस्तीति वादिनः ॥ ४२ ॥

ते ॥ न चैवं वैगुण्ये ईश्वरोद्देशेनैव वैगुण्योपरमात् ॥ ननु तथा काम्यं कर्म ॥ अतो महद्वैषम्यमिति भावः ॥ ४१ ॥ न
नु कामिनोपि कस्मात्कामान्विहाय व्यवसायात्मिकामेव बुद्धिं किं न कुर्वंति तत्राह ॥ यामिमामिति ॥ पुष्पि
तां विषलतावदापातरमणीयां प्रकृष्टां परमार्थफलपरमेव वदंति वाचं स्वर्गादिफलश्रुतिं तेषां तया वाचापहृ

पा

तच्चेतसां व्यवसायात्मिका बुद्धिर्न विधीयत इति तृतीयेनान्वयः। किमिति तथा वदंति यतोऽविपश्चितः मूढाः तत्र हेतुः।
वेदे ये वादाः अर्थवादाः। अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति। अपाम सोमममृता अभूमेत्याद्यास्तेष्वेव रताः
प्रीताः अत एवातः परमन्यदीश्वरतत्त्वं तत्प्राप्यं नास्तीति वदनशीलाः। ४२। अत एव कामात्मान इति। कामात्मानः
कामाकुलचित्ताः अत एव स्वर्गः परः पुरुषार्थो येषां ते। जन्म च तत्र कर्माणि च तत्फलानि च प्रददातीति तथा तां

कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदां। क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति। ४३। भोगैश्वर्यप्रसक्ता-
नां तयापहृतचेतसां। व्यवसायात्मिका बुद्धिः समाधौ न विधीयते। ४४।

भोगैश्वर्ययोर्गतिं प्राप्तिं प्रति साध-
नभूता ये क्रियाविशेषास्ते बहुला यस्यां तां प्रवदंतीत्यनुषंगः। ४३। ततश्च भोगैश्वर्यप्रसक्तानामिति। भोगैश्व-
र्ययोः प्रसक्तानां अभिनिविष्टानां तया पुष्पितया वाचापहृतं आकृष्टं चेतो येषां तेषां समाधिश्चित्तैकाग्र्यं
परमेश्वरैकाग्र्यमसुस्वतं तस्मिन्निश्चयात्मिका बुद्धिर्न विधीयते कर्मकर्तृप्रयोगो नोत्पद्यत इत्यर्थः। ४४। २०

ननु च यदि स्वर्गादिकं परं फलं न भवति तर्हि किमिति वेदैस्तत्साधनतया कर्माणि विधीयंते तत्राह। त्रैगुण्य
विषया इति। त्रिगुणात्मकाः सकामा येऽधिकारिणस्तद्विषयास्तेषां कर्मफलसंबंधप्रतिपादका वेदाः त्वं तु नि-
स्त्रैगुण्यो निःकामो भव। तत्रोपायमाह निर्द्वंद्वः सुखदुःखशीतोष्णादियुगलानि द्वंद्वानि तद्रहितो भव। त-
तानि सहस्वेत्यर्थः। कथमित्यत आह नित्यसत्वस्थः सन् धैर्यमवलंब्येत्यर्थः। तथा निर्योगक्षेमः। अप्राप्तस्वीका-

त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन। निर्द्वंद्वो नित्यसत्वस्थो निर्योगक्षेम आत्मवान्। ४५।

रो योगः प्राप्तपालनं क्षेमः तद्रहितः आत्मवान् अप्रमत्तः नहि द्वंद्वाकुलस्य योगक्षेमव्यापृतस्य च प्रमादिनः
त्रैगुण्यातिक्रमः संभवतीति। ४५। ननु वेदोक्तनानाफलपरित्यागेन निःकामतयेश्वराराधनविषया व्यवसा-
त्मिका बुद्धिः कुबुद्धिरेवेत्याशंक्याह। यावानर्थ इति। उदकं पीयते यस्मिन् तदुदपानं वापीकूपादि तस्मिन् स्वल्पोद-
के एकत्र कृत्स्नस्यार्थस्याऽसंभवात्तत्र परिभ्रमणेन विभागशो यावान् स्नानपानादिरर्थः। प्रयोजनं भवति तावान्स

गीता०स०
२१

वोप्यर्थः । सर्वतः संप्लुतोदके महाहृदे एकत्रैव यथा भवति । एवं यावान्सर्वेषु वेदेषु वेदोक्तकर्मफलरूपोर्थस्तावा
न्सर्वोपि विज्ञानतो व्यवसायात्मिकाबुद्धियुक्तस्य ब्राह्मणस्य ब्रह्मनिष्ठस्य भवत्येव ब्रह्मानंदे क्षुद्रानंदानामंतर्भूत
त्वात् । एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः । तस्मादियमेव सुबुद्धिरित्यर्थः । ४६ । तर्हि सर्वकर्म
फलानि परमेश्वराराधनादेव भविष्यंतीत्यभिप्रायप्रवर्तन्ते इत्याशंक्याह । कर्मण्येवेति । तत्वज्ञानार्थिनः क

यावानर्थ उदपाने सर्वतः संप्लुतोदके । तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः । ४६ । कर्मण्येवा
धिकारस्ते मा फलेषु कदाचन । मा कर्मफलहेतुर्भूर्मा ते संगोस्त्वकर्मणि । ४७ ।

र्मण्येवाधिकारः तत

त्फलेषु बंधहेतुष्वनधिकारः कामो मास्तु । ननु कर्माणि कृते तत्फलं स्यादेव भोजने कृते तृप्तिवदित्याशंक्या
ह । मा कर्मफलहेतुर्भूः कर्मफलप्रवृत्तिहेतुर्यस्य स तथाभूतो मा भूः । कामितस्यैव स्वर्गादेर्नियोज्यविशेषणत्वेन फ
लत्वात् अकामितं फलं न स्यादिति भावः । अत एव फलं बंधकं भविष्यतीति भयादकर्माणि कर्माकरणेपि तव संगो २१
निष्ठा मास्तु । ४७ । ।

किं तर्हि योगस्थ इति । योगः परमेश्वरैकपरता तत्र स्थितः कर्माणि कुरु । तथा संगं कर्तृत्वाभिनिवेशं त्यक्त्वा ।
केवलमीश्वराश्रयेणैव कुरु न तु फलस्यापि ज्ञानस्य सिद्ध्यसिद्ध्योः समो भूत्वा केवलमीश्वरार्थेनैव कुरु । यत
एवंभूतं समत्वमेव योग उच्यते । सद्भिः चित्तसमाधानरूपत्वात् । ४८ । काम्यं तु कर्म नितः कृष्टमित्याह । दूरे
णेति । बुद्ध्या व्यवसायात्मिकया कृतः कर्मयोगो बुद्धियोगः । बुद्धिसाधनभूतो वा तस्मात्सकाशादन्यत्का तो

योगस्थः कुरु कर्माणि संगं त्यक्त्वा धनंजय । सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते । ४८ ।
दूरेण ह्यवरं कर्म बुद्धियोगाद्धनंजय । बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः । ४९ ।

म्यं कर्म दूरेणावरं अत्यंतमपकृष्टं । हि यस्मादेवं तस्माद्बुद्धौ ज्ञाने शरणं आश्रयं कर्मयोगं अन्विच्छ
अनुतिष्ठ । यद्वा । बुद्धौ शरणं त्रातारमीश्वरं आश्रयेत्यर्थः । फलहेतवस्तु सकामा नराः कृपणा दीनाः
यो वा एतदक्षरमविदित्वा गार्ग्यस्माल्लोकात्प्रैति स कृपण इति श्रुतेः । ४९ ।

गीता०स० बुद्धियोगयुक्तस्तु श्रेष्ठ इत्याह ॥ बुद्धीति ॥ सुकृतं स्वर्गादिप्रापकं दुःकृतं निरयप्रापकं ते उभे इहैव जन्म-
२२ नि परमेश्वरप्रसादेन जहाति त्यजति ॥ तस्माद्योगाय तदर्थाय कर्मयोगाय युज्यस्व घटस्व ॥ यतो
योगः कर्मसु कौशलं बंधकानामपि तेषामीश्वराराधनेन मोक्षपरत्वसंपादनं चातुर्यं स एव यो-

बुद्धियुक्तो जहातीह उभे सुकृतदुःकृते ॥ तस्माद्योगाय युज्यस्व योगः कर्मसु
कौशलं ॥५०॥ कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः ॥ जन्मबंधविनिर्मु-
क्ताः पदं गच्छंत्यनामयं ॥५१॥

गः ॥५०॥ कर्मणां मोक्षसाधनत्वप्रकारमाह ॥ कर्मेति ॥ कर्मजं फलं त्यक्त्वा केवलमीश्वरा-
राधनार्थं कर्म कुर्वाणा मनीषिणो ज्ञानिनो भूत्वा जन्मरूपेण बंधनेन विनिर्मुक्ताः संतोऽनाम
सर्वोपद्रवरहितं विष्णोः पदं मोक्षाख्यं गच्छति ॥५१॥ २२

कदा तत्पदमहं संप्राप्स्यामीत्यपेक्षायामाह ॥ यदेति ॥ द्वाभ्यां ॥ मोहो देहादिष्वात्मबुद्धिः ॥ तदेव क-
लिलं गहनं विदुरित्यभिधानेन ततस्मायमर्थः ॥ एवं परमेश्वराराधने क्रियमाणे यदा तत्प्रसादेन
तव बुद्धिर्देहाभिमानलक्षणं मोहमयं गहनं दुर्गं विशेषेण तितरिष्यति ॥ तदा श्रोतव्यस्य श्रुतस्य
चार्थस्य निर्वेदं वैराग्यं गंतासि ॥ तयोरनुपादेयत्वेन जिज्ञासां न करिष्यसीत्यर्थः ॥५२ ततश्च श्रुतीति

यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ॥ तदा गंतासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥५२॥
पत्रान्ते श्रुतिविप्रतिविक्षिप्ता ते यदा स्थास्यति निश्चला ॥ ईश्वरेवचला बुद्धिस्तदा योगमवाप्स्यसि ॥५३॥

श्रुतिभिर्नानालौकिकवैदिकार्थश्रवणैर्विप्रतिपन्ना इतस्ततः विक्षिप्ता सती तव बुद्धिर्यदा समाधौ
स्थास्यति समाधीयते चित्तमस्मिन्निति समाधिः परमेश्वरस्तस्मिन्निश्चला विषयांतरैरनाकृ-
ष्टा तथाचलाभ्यासपटुत्वेन तत्रैव स्थिरा च सती तदा योगं योगफलं तत्त्वज्ञानमवाप्स्यसि ॥५३॥

पूर्वश्लोकोक्तस्यात्मतत्त्वज्ञस्य लक्षणं जिज्ञासुरर्जुन उवाच। स्थितप्रज्ञस्येति॥ स्वाभाविके समाधौ स्थित।
स्यात एव स्थिरप्रज्ञस्य प्रज्ञा बुद्धिर्यस्य तस्य का भाषा भाष्यतेऽनयेति भाषा लक्षणमिति यावत्केन
लक्षणेन स्थितप्रज्ञ उच्यत इत्यर्थः॥ तथा स्थितधीः कथं भाषणासनं व्रजनं कुर्यादित्यर्थः॥५४॥ अत्र च।
यानि साधकस्य ज्ञानसाधनानि तान्येव स्वाभाविकानि सिद्धस्य लक्षणानि कथयन्नेवोत्तरमाह ज्ञानसा।

अर्जुन उवाच। स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव। स्थितधीः किं प्रभाषेत किमासीत व्रजेत किं ॥५४॥
श्रीभगवानुवाच। प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान्। आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥५५॥

धनान्याह॥ यावदध्यायसमाप्तिः॥ तत्र प्रथमप्रश्नस्योत्तरं प्रजहातीति द्वाभ्यां। श्रीभगवानुवा॥ मनसि
स्थितान्कामान्यदा प्रकर्षेण जहाति॥ त्यागे हेतुः आत्मन्येव स्वस्मिन्नेव परमानंदरूपे आत्मना स्वयमेव तु
ष्ट इति आत्मारामः सन्। यदा क्षुद्रविषयाभिलाषान्त्यजति। तदा तेन लक्षणेन मुनिः स्थितप्रज्ञ इत्युच्यत इत्यर्थः २३
॥५५॥

किंच॥ दुःखेष्विति॥ दुःखेषु प्राप्तेष्वपि अनुद्विग्नमक्षुभितं मनो यस्य सः सुखेषु विगता स्पृहा यस्य सः
तत्र हेतुः॥ वीता अपगता रागभयक्रोधा यस्मात् तत्र रागः प्रीतिः स मुनिः स्थितधीः स्थितप्रज्ञ इत्युच्यते
॥५६॥ कथं भाषेतेत्यस्योत्तरमाह॥ य इति॥ यः सर्वत्र पुत्रमित्रादिष्वपि अनभिस्नेहः स्नेहशून्यः अ
त एव बाधितानुवृत्त्या तत्तच्छुभं अनुकूलं प्राप्य नाभिनंदति न प्रशंसति॥ अशुभं प्रतिकूलं प्राप्य न।

घ दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः॥ वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥५६॥
त यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभं॥ नाभिनंदति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥५७॥

द्वेष्टि न निंदति॥ किंतु॥ केवलमुदासीन एव भाषते॥ तस्य प्रज्ञा प्रतिष्ठितेत्यर्थः॥५७ किंच यदेति
यदा चायं योगी इंद्रियार्थेभ्यः शब्दादिभ्यः सकाशात् इंद्रियाणि संहरते प्रत्याहरति अनायासेन सं।
हारे दृष्टांतः॥ अंगानि करचरणादीनि कूर्मो यथा स्वभावेनैवाकर्षति तद्वत् ॥५८॥ ननु तेंद्रिया

णां विषयेषु प्रवृत्तस्य ज्ञानं भवितुमर्हति जडानामातुराणामुपवासपराणां च विषयेष्वप्रवृत्तेरविशे-
षात् तत्राह ॥ विषया इति ॥ इंद्रियैर्विषयाणामाहरणं ग्रहणं आहारः ॥ निराहारस्येंद्रियैर्विषयग्रह-
णमकुर्वतो देहिनो देहाभिमानिनोऽज्ञस्य विषया विनिवर्त्तंते ॥ तदनुभवो विनिवर्त्तत इत्यर्थः ॥ किंतु

यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ॥ इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा
प्रतिष्ठिता ॥ ५८ ॥ विषया विनिवर्त्तंते निराहारस्य देहिनः ॥ रसवर्जं रसोप्यस्य प-
रं दृष्ट्वा निवर्त्तते ॥ ५९ ॥ ॥

रसो रागोऽभिलाषस्तु न निवर्त्तत इत्यर्थः ॥ रसोपि रागोपि परमात्मानं दृष्ट्वा स्थितप्रज्ञस्य सतो
निवर्त्तंते ॥ नश्यतीत्यर्थः ॥ यद्वा निराहारस्योपवासपरस्य विषयाः प्रायशो विनिवर्त्तंते क्षुधासंतप्तस्य
शब्दस्पर्शादिष्वपेक्षाभावात् परंतु रसवर्जं रसापेक्षा तु न निवर्त्तत इत्यर्थः ॥ शेषं समानम् ॥ ५९ ॥ ॥ २४

इंद्रियसंयमं तु विना स्थितप्रज्ञता न संभवति ॥ अतः साधकावस्थायां तत्र महान्प्रयत्नः कर्त्तव्य इत्या-
ह ॥ यततो ह्यपीति द्वाभ्यां ॥ यततः मोक्षे प्रयतमानस्यापि विपश्चितो विवेकिनोपि मन इंद्रियाणि ब-
लात् हरंति यतः ॥ प्रमाथीनि प्रमथनशीलानि क्षोभकानि ॥ ६० ॥ युक्तो योगी तानींद्रियाणि संयम्य

यततो ह्यपि कौंतेय पुरुषस्य विपश्चितः ॥ इंद्रियाणि प्रमाथीनि हरंति प्रसभं मनः ॥ ६० ॥
तानि सर्वाणि संयम्य युक्त आसीत मत्परः ॥ वशे हि यस्येंद्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥ ६१ ॥
ध्यायतो विषयान्पुंसः संगस्तेषूपजायते ॥ संगात्संजायते कामः कामात्क्रोधोऽभिजायते ॥ ६२ ॥

मत्परः सन्नासीत यस्य वशे वशवर्त्तीनि ॥ एतेन कथमासीतेति प्रश्नस्य वशीकृतेंद्रियः सन्नासी-
तेत्युक्तं त्तरमुक्तं त्तरमुक्तं भवति ॥ ६१ ॥ बाह्येंद्रियसंयमाभावे दोषमुक्त्वा मनःसंयमाभावे दोषमाह
ध्यायत इति ॥ द्वाभ्यां ॥ गुणबुद्ध्या विषयान्ध्यायतः पुरुषस्य तेषु संगः आसक्तिर्भवति ॥ आस-

क्याचतेष्वधिकः कामो भवति कामाच्च केनचित्प्रतिहतात्क्रोधो भवति ॥ ६२ ॥ किंच ॥ क्रोधादिति
क्रोधात्संमोहः कार्याकार्यविवेकाभावः ॥ ततः शास्त्राचार्योपदिष्टार्थस्मृतेर्विभ्रमो विभ्रंशः
ततो बुद्धेश्चेतनाया नाशः वृक्षादिष्विवाभिभवस्ततः प्रणश्यति मृततुल्यो भवति ॥ ६३ ॥ नन्विंद्रिया
णां विषयप्रवणस्वभावानां निरोद्धुमशक्यत्वादयं दोषो दुःपरिहर इति स्थितप्रज्ञत्वं कथं स्यादित्याशं

क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः ॥ स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥ ६३ ॥
रागद्वेषवियुक्तैस्तु विषयानिंद्रियैश्चरन् ॥ आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥ ६४ ॥

क्याह ॥ रागेति ॥ द्वाभ्यां ॥ रागद्वेषरहितैर्विगतदर्पैरिंद्रियैर्विषयांश्चरन्भुंजानोपि प्रसादं शांतिं प्रा
प्नोति ॥ रागद्वेषराहित्यमेवाह ॥ आत्मनो मनसो वश्यैर्विधेयो वशवर्ती आत्मा मनो यस्येति ॥ अनेन
नैव कथं व्रजेत् भुंजीतेत्यस्य चतुर्थप्रश्नस्य ॥ स्वाधीनैरिंद्रियैर्विषयानधिगच्छतीत्युत्तरमुक्तं भवति ॥ ६४ ॥ २५

प्रसादे सति किं स्यादित्यत्राह ॥ प्रसाद इति ॥ प्रसादे सति सर्वदुःखनाशः ततश्च प्रसन्नचेतसो बुद्धिः
प्रतिष्ठिता भवतीत्यर्थः ॥ ६५ ॥ इंद्रियस्येह निग्रहस्य स्थितप्रज्ञतासाधनत्वं व्यतिरेकमुखेनोपपादय
ति नास्तीति ॥ अयुक्तस्यावशीकृतेंद्रियस्य नास्ति बुद्धिः शास्त्राचार्योपदेशाभ्यामात्मविषया बुद्धिः प्रजै

प्रसादे सर्वदुःखानां हानिरस्योपजायते ॥ प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥ ६५ ॥ नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ॥ न चाभावयतः शांति
रशांतस्य कुतः सुखं ॥ ६६ ॥ ॥

वनोपपद्यते ॥ कुतस्तस्य प्रतिष्ठावार्त्ता कुत इत्यत्राह ॥ न चायुक्तस्य भावना ध्यानं भावनया हि बु
द्धेरात्मनि प्रतिष्ठा भवति सा चायुक्तस्य यतो नास्ति ॥ न चाभावयतः ॥ आत्मध्यानमकुर्वतः शां
तिः ॥ आत्मनि चित्तोपपरमः इतिः ॥ अशांतस्य कुतः सुखं मोक्षानंद इत्यर्थः ॥ ६६ ॥ ॥

नास्तिबुद्धिरयुक्तस्येत्यत्र हेतुमाह ॥ इंद्रियाणामिति ॥ इंद्रियाणामवशीकृतानांस्वैरंविषयेषुचा
रतांमध्येयदेवैकमिंद्रियंमनोनुविधीयते ॥ अवशीकृतंसदिंद्रियेणसहगच्छति तदेवेंद्रियमस्य
मनसः पुरुषस्यवाप्रज्ञांहरतिविषयविक्षिप्तांकरोति किमुतवक्तव्यंबहूनिप्रज्ञांहरंति ॥ यथाप्र

॥इंद्रियाणांहिचरतांयन्मनोऽनुविधीयते ॥ तदस्यहरतिप्रज्ञांवायुर्नावमिवांभसि ॥
६७ ॥ तस्माद्यस्यमहाबाहोनिगृहीतानिसर्वशः ॥ इंद्रियाणींद्रियार्थेभ्यस्तस्यप्रज्ञा
प्रतिष्ठिता: ॥ ६८ ॥

मत्तस्यकर्णधारस्यनावंवायुः ~~पुरुषस्यवा~~ समुद्रेसर्वतःपरिभ्रमयति
तद्वत् ॥ ६७ ॥ इंद्रियसंयमस्यस्थितप्रज्ञत्वसाधनत्वंलक्षणत्वंचोक्तमुपसंहरति ॥ तस्मादिति ॥
प्रतिष्ठिताभवतीत्यर्थः ॥ लक्षणत्वोपसंहारेतस्यप्रज्ञाप्रतिष्ठिताज्ञातव्येत्यर्थः ॥ महाबाहोइति
संबोधयन्वैरिनिग्रहेसमर्थस्यतवात्रापिसामर्थ्यंभवेदितिसूचयति ॥ ६८ ॥ ॥ २६

ननुनकस्यापिप्रसुप्तवद्दर्शनादिव्यापारःशून्यःसर्वात्मनानिगृहीतेंद्रियोलोकेदृश्यते ॥ अतोसंभावित
मिदंलक्षणमित्याशंक्याह ॥ यानिशेति ॥ सर्वेषांभूतानांयानिशानिशेवनिशाऽऽत्मनिष्ठाऽव्याकृतानष्टां
ताहतमतीनांतस्यांदर्शनादिव्यवहाराऽभावात् ॥ तस्यामात्मनिष्ठायांसंयमीनिगृहीतेंद्रियोजागर्तिप्रतिबु
ध्यते ॥ यस्यांतुविषयनिष्ठायांभूतानिजाग्रतिप्रतिबुध्यंते ॥ साआत्मतत्त्वंपश्यतोमुनेर्निशा ॥ तस्यांदर्श

यानिशासर्वभूतानांतस्यांजागर्तिसंयमी ॥ यस्यांजाग्रतिभूतानिसानिशापश्यतोमुनेः ॥ ६९ ॥ आ
पूर्यमाणमचलप्रतिष्ठंसमुद्रमापःप्रविशंतियद्वत् ॥ तद्वत्कामायंप्रविशंतिसर्वेसशांतिमाप्नोतिनकामकामी ॥ ७० ॥

नादिव्यापारस्तस्यनास्तीत्यर्थः ॥ एतदुक्तंभवतियथादिवांधानामुलूकादीनांरात्रावेवदर्शनंनतुदिवसे ॥ एवं
ब्रह्मनिष्ठस्योन्मीलिताक्षस्यापिब्रह्मण्येवदृष्टिर्नतुविषयेषु ॥ अतोनासंभावितमिदंलक्षणमिति ॥ ६९ ॥ ननुवि
षयेषुदृष्ट्यभावेकथमसौतान्भुंक्तइत्यपेक्षायामाह ॥ आपूर्यमाणमिति ॥ नानानदीभिरापूर्यमाणमपिस्व

चलप्रतिष्ठमनतिक्रांतमर्यादमेवसमुद्रंपुनरप्यन्याआपोयथाप्रविशंति॥तथाकामाविषयायंमुनिमं-
तर्दृष्टिंभोगैरविक्रियमाणमेवप्रारब्धकर्मभिराक्षिप्ताःसंतःप्रविशंतिकैवल्यंप्राप्नोति॥नतुकामकामीभो-
गकामनशीलः॥७०॥यस्मादेवंतस्मादेवंविहायेतिप्राप्तान्कामान्विहायत्यक्त्वोपेक्ष्यअप्राप्तेषुचनिस्पृहो
यतोनिरहंकारःअतएवभोगसाधनेषुनिर्ममःसन्नंतर्दृष्टिर्भूत्वायश्चरतिप्रारब्धवशेनभोगान्भुंक्तेयत्रकुत्रा-



विहायकामान्यःसर्वान्पुमांश्चरतिनिस्पृहः॥निर्ममोनिरहंकारःसशांतिमधिगच्छति॥७१॥एषाब्राह्मीस्थि-
तिःपार्थनैनांप्राप्यविमुह्यति॥स्थित्वास्यामंतकालेपिब्रह्मनिर्वाणमृच्छति॥७२॥

पिगच्छतिवासशांतिंप्राप्नो-
ति॥७१॥उक्तांज्ञाननिष्ठांस्तुवन्नुपसंहरति॥एषेति॥ब्राह्मीस्थितिःब्रह्मज्ञाननिष्ठाएषाएवंविधा॥एनांपरमेश्व-
राराधनेनविशुद्धांतःकरणःपुमान्प्राप्यनमुह्यतिपुनःसंसारमोहंनप्राप्नोति॥यतोंऽतकालेपिमृत्युसमये-
पिअस्यांक्षणमात्रमपिस्थित्वाब्रह्मनिर्वाणंलयमृच्छतिप्राप्नोतिकिंपुनर्वक्तव्यंबाल्यमारभ्यस्थित्वाप्राप्नोतीति॥७२॥ २७

इतिश्रीभगवद्गीतासुबोधिन्यांटीकायांश्रीधरस्वामिविरचितायांनामद्वितीयोऽध्यायः॥२॥श्रीकृष्णं-
कनियमृष्यंयःसांख्ययोगोपदेशतः॥उज्जहारार्जुनंभक्तंसकृष्णःशरणंमम॥१॥एवंतावदशो-
च्यानन्वशोचस्त्वमित्यादिनाप्रथमंमोक्षसाधनत्वेनदेहात्मविवेकबुद्धिरुक्ता॥तदनंतरमेषाते-



इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेसांख्य-
योगोद्वितीयोऽध्यायः॥२॥अर्जुनउवाच॥ज्यायसीचेत्कर्मणस्तेमताबुद्धिर्जनार्दन॥
तत्किंकर्मणिघोरेमांनियोजयसिकेशव॥१॥ ॥

भिहितासांख्येबुद्धिर्योगेत्विमांशृण्वित्यादिनाकर्मचोक्तंनचतयोर्गुणप्रधानभावः॥स्पष्टंद-
र्शितः॥तत्रबुद्धियुक्तस्यस्थितप्रज्ञस्यनिःकामत्वनियतेंद्रियत्वनिरहंकारत्वाद्यभिधानादेषाब्रा-
ह्मीस्थितिःपार्थेतिसप्रशंसमुपसंहाराच्चबुद्धिकर्मणोर्मध्येबुद्धेःश्रेष्ठत्वंभगवतोभिमतंमन्वानो-

गीता॰स॰
२८

अर्जुन उवाच ॥ ज्यायसी चेदिति ॥ कर्मणः सकाशान्मोक्षांतरंगत्वेन बुद्धिर्ज्यायसी अधिकतरा
श्रेष्ठा चेत्तव संमता तर्हि किमर्थं तस्माद्युध्यस्वेति तस्मादुत्तिष्ठेति च वारंवारं वदन् घोरे हिंसात्म
के कर्मणि मां नियोजयसि प्रवर्त्तयसि ॥ १ ॥ ननु धर्म्याद्धि युद्धाच्छ्रेयोन्यत्क्षत्रियस्य न विद्यत इत्या
दिना कर्मणोपि श्रेष्ठत्वमुक्तमेवेत्याशंक्याह ॥ व्यामिश्रेणेति ॥ क्वचित्कर्मप्रशंसा क्वचित्ज्ञा

व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे ॥ तदेकं वद निश्चित्य येन श्रेयोहमाप्नुयाम् ॥ २ ॥

नप्रशंसेत्येवं व्यामिश्रं संदेहोत्पादकमिव यद्वाक्यं तेन बुद्धिं मतिमुभयत्रदोलायितां कुर्वन्मो
हयसीव ॥ परमकारुणिकस्य तव मोहकत्वं नास्त्येव ॥ तथापि भ्रांत्या ममैवमाभाति ॥ अत उभ
योर्मध्ये यद्भद्रं तदेकं निश्चित्य वदेति ॥ यद्वा ॥ इदमेव श्रेयःसाधनमिति ॥ निश्चित्य येनानुष्ठि
तेन श्रेयो मोक्षमाप्नुयां प्राप्स्यामि तदेकं वदेत्यर्थः ॥ २ ॥ ॥ २८

अत्रोत्तरं श्रीभगवानुवाच ॥ लोकेस्मिन्निति ॥ अयमर्थः ॥ यदि मया परस्परनिरपेक्षं मोक्षसा
धनत्वेन कर्मज्ञानयोगरूपं निष्ठाद्वयमुक्तं स्यात्तर्हि तदुभयोर्मध्ये यद्भद्रं तदेकं वदेति त्वदीयप्रश्नः
संगच्छेत ॥ न तु मया तथोक्तं ॥ किंतु ॥ द्वाभ्यां ॥ मेकैव ब्रह्मनिष्ठोक्ता गुणप्रधानभूतयोस्तयोः ॥ स्वा
तंत्र्यानुपपत्तेरेकस्यैव प्रकारभेदमात्रमधिकारभेदेनोक्तमिति ॥ अस्मिन्नुत्तरं शुद्धांतःकर

श्रीभगवानुवाच ॥ लोकेस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयानघ ॥ ज्ञानयोगेन सांख्या
नां कर्मयोगेन योगिनां ॥ ३ ॥
णतया द्विविधे लोकेऽधिकारिजने द्वैविध्यं प्रकारो यस्याः सा
द्विविधा निष्ठा मोक्षपरता ॥ पुरा पूर्वाध्याये मया सर्वज्ञेन प्रोक्ता स्पष्टमेवोक्ता ॥ प्रकारद्वयमेवाप
निर्दिशति ॥ सांख्यानां शुद्धांतः ॥ करणानां ज्ञानभूमिकामारूढानां ज्ञानपरिपाकार्थं ज्ञान
योगेन ध्यानादिना निष्ठा ब्रह्मपरोक्तानि सर्वाणि संयम्य युक्त आसीत मत्पर इत्यादिना सांख्यम्

मिकाभारुरुक्षूणां तु अंतःकरणशुद्धिद्वारा तदारोहणार्थं तदुपायभूतकर्मयोगाधिकारिणां यो-
गिनां कर्मयोगेन निष्ठोक्ता धर्म्याद्धि युद्धाच्छ्रेयोन्यत्क्षत्रियस्य न विद्यत इत्यादिना॥ अतएव चि-
त्तशुद्ध्यशुद्धिरूपावस्थाभेदेनैव द्विविधापि निष्ठोक्ता एषा तेभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु
इति॥३॥ अतः सम्यक् चित्तशुद्ध्या ज्ञानोत्पत्तिपर्यंतं वर्णाश्रमोदितानि कर्माणि कर्तव्यानि॥

न कर्मणामनारंभान्नैःकर्म्यं पुरुषोश्नुते॥ न च संन्यसनादेव सिद्धिं समधिगच्छति॥४॥

अन्यथा चित्तशुद्ध्यभावेन ज्ञानानुत्पत्तेरित्याह॥ न कर्मणामिति। कर्मणामनारंभादननुष्ठाना-
न्नैःकर्म्यं ज्ञानं नाश्नुते न प्राप्नोति॥ ननु च एतमेव प्रव्राजिनो लोकमीप्संतः प्रव्रजंतीति संन्यासस्य मो-
क्षांगत्वश्रुतेः॥ संन्यासादेव मोक्षो भविष्यतीति किं कर्मभिरित्याशंक्योक्तं। न च चित्तशुद्धिं विना कृ-
तात्संन्यसनादेव ज्ञानशून्यात्सिद्धिं मोक्षं समधिगच्छति प्राप्नोति॥४॥

कर्मणां च संन्यासस्तेषु नासक्तिमात्रं न तु स्वरूपेण अशक्यत्वादित्याह॥ न हीति॥ जातु कस्यांचिदव-
स्थायां क्षणमात्रमपि कश्चिदपि ज्ञानी वा अज्ञो वा कर्म कृतकर्माणि अकुर्वाणो न तिष्ठति॥ तत्र हेतुः
प्रकृतिजैः स्वभावजैः रागद्वेषादिभिर्गुणैः सर्वोपि जनः कर्म कार्यते कर्माणि प्रवर्त्यते अवशः अस्व-

नहि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्। कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः॥५॥ कर्मे-
न्द्रियाणि संयम्य य आस्ते मनसा स्मरन्। इंद्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते॥६॥ यस्त्विं-
द्रियाणि मनसा नियम्यारभतेर्जुन। कर्मेंद्रियैः कर्मयोगमसक्तः स विशिष्यते॥७॥ तंत्रः सन्॥५॥ अतो
ज्ञं कर्मत्यागिनं निंदति। कर्मेंद्रियाणीति। वाक्पाण्यादीनि कर्मेंद्रियाण्यपि निगृह्य यो मनसा भगव-
द्ध्यानच्छलेन इंद्रियार्थान् विषयान् स्मरन्नास्ते॥ अविशुद्धतया मनसः आत्मनि स्थैर्याभावात् स मिथ्याचारः
कपटाचारो दांभिक उच्यत इत्यर्थः॥६॥ एतद्विपरीतः कर्मकर्ता श्रेष्ठ इत्याह॥ यस्त्विति॥ यस्तु ज्ञानेंद्रियाणि

मनसानियम्यइन्द्रियगणानिकृत्वाकर्मेंद्रियैः॥कर्मरूपंयोगमुपायमारभतेऽनुतिष्ठति॥असक्तः
फलाभिलाषरहितःसविशिष्यतेविशिष्टोभवतिचित्तशुद्ध्याज्ञानवान्भवतीत्यर्थः॥७॥यस्मा
देवंतस्मान्नियतमिति॥नियतंनित्यंसंध्योपासनादिकुरु॥हियस्मादकर्मणःअकरणात्सका
शात्कर्मज्यायःअधिकतरं॥अन्यथाअकर्मणःसर्वकर्मशून्यस्यतवशरीरनिर्वाहोनभवेत्॥

नियतंकुरुकर्मत्वंकर्मज्यायोह्यकर्मणः॥शरीरयात्रापिचतेनप्रसिध्येदकर्मणः॥८॥
यज्ञार्थात्कर्मणोऽन्यत्रलोकोयंकर्मबंधनः॥तदर्थंकर्मकौंतेयमुक्तसंगःसमाचर॥९॥

सांख्यास्तुसर्वमपिकर्मबंधकत्वान्नकार्यमित्याहुस्तन्निराकुर्वन्नाह॥यज्ञार्थादिति॥यज्ञोत्रविष्णुः॥य
ज्ञोवैविष्णुरितिश्रुतेः॥तदाराधनार्थात्कर्मणोऽन्यत्रतदेकंविनाअयंलोकः॥कर्मबंधनःकर्मभिर्बध्यते
नत्वीश्वराराधनार्थेनेतिअतस्तदर्थंविष्णुप्रीत्यर्थंमुक्तसंगःनिःकामःसन्कर्मसम्यगाचर॥९॥ ३०

प्रजापतिवचनादपिकर्मकर्तैवविशिष्टइत्याह॥सहयज्ञाइतिचतुर्भिः॥यज्ञेनसहवर्त्तंतइति
सहयज्ञाः॥यज्ञाधिकृताःब्राह्मणाद्याःप्रजाःपुरासर्गादौसृष्ट्वाब्रह्माइदमुवाच॥अनेनयज्ञेनप्रस
विष्यध्वंप्रसवोवृद्धिः॥उत्तरोत्तरामभिवृद्धिंलभध्वमित्यर्थः॥तत्रहेतुःएषयज्ञोवोयुष्माकंइष्टकाम
धुक्॥इष्टान्कामान्दोग्धीतितथाअभीष्टभोगप्रदोऽस्त्वित्यर्थः॥अत्रचयज्ञग्रहणमावश्यककर्मोपल

सहयज्ञाःप्रजाःसृष्ट्वापुरोवाचप्रजापतिः॥अनेनप्रसविष्यध्वमेषवोऽस्त्विष्टकामधुक्॥१०॥
देवान्भावयतानेनतेदेवाभावयंतुवः॥परस्परंभावयंतःश्रेयःपरमवाप्स्यथ॥११॥



क्षणार्थं॥काम्यकर्मप्रशंसातुप्रकरणेऽसंगतापिसामान्येनाकर्मणःकर्मश्रेष्ठमित्येतदर्थेत्यदोषः
१०॥कथमिष्टदोग्धायज्ञोभवेदितिअत्राह॥देवानिति॥अनेनयज्ञेनयूयंदेवान्भावयतहविर्भा
गैःसंवर्द्धयत॥तेचवःयुष्मान्संवर्द्धयंतु॥एवमन्योन्यंसंवर्द्धयंतोदेवाश्चयूयंचपरस्परंश्रेयःअभीष्टमर्थंप्राप्स्य
थ॥११॥

एतदेवस्पष्टीकुर्वन्कर्माकरणेदोषमाह ॥ इष्टानिति ॥ यज्ञैर्भाविताः संतोदेवावृष्ट्यादिद्वारेणयुष्म
भ्यंभोगान्दास्यंतिहि ॥ अतोदेवैर्दत्तानन्नादीनेभ्योदेवेभ्यः पंचयज्ञादिभिरदत्वायोभुंक्तेसतुचो
रएवज्ञेयः ॥ १२ ॥ अतश्चयजंतएवश्रेष्ठानेतरइत्याह ॥ यज्ञशिष्टेति ॥ वैश्वदेवादियज्ञावशि

इष्टान्भोगान्हिवोदेवादास्यंतेयज्ञभाविताः ॥ तैर्दत्तानप्रदायैभ्योयोभुंक्तेस्तेनएवसः ॥
१२ ॥ यज्ञशिष्टाशिनः संतोमुच्यंतेसर्वकिल्बिषैः ॥ भुंजतेतेत्वघंपापायेपचंत्यात्मका
रणात् ॥ १३ ॥ ॥

ष्टंयेऽश्नंतितेपंचसूनाकृतैःसर्वैः किल्बिषैर्मुच्यंते ॥ पंचसूनाश्चस्मृतावुक्ताः ॥ कंडनीपेषणीचुल्ली
उदकुंभीचमार्जनी ॥ पंचसूनागृहस्थस्यताभिःस्वर्गंनविंदतिइति ॥ येत्वात्मनोभोजनार्थमे ३१
वपचंति ॥ ननुवैश्वदेवाद्यर्थंतेपापादुराचाराअघमेवभुंजते ॥ १३ ॥

जगच्चक्रप्रवृत्तिहेतुत्वादपिकर्मकर्त्तव्यमित्याह ॥ अन्नादितित्रिभिः ॥ अन्नात्शुक्रशोणितरूपेण
परिणतात्भूतान्युत्पद्यंते ॥ अन्नस्यचसंभवःपर्जन्याद्वृष्टेःसचपर्जन्योयज्ञाद्भवति ॥ सचयज्ञः का
सु र्मसमुद्भवः कर्मणायजमानादिव्यापारेणसंपद्यतइत्यर्थः ॥ अग्नौप्रास्ताहुतिः सम्यगा
दित्यमुपतिष्ठते ॥ आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजाइतिस्मृतेः ॥ १४ ॥ तच्चकर्मब्रह्मोद्भव

अन्नाद्भवंतिभूतानिपर्जन्यादन्नसंभवः ॥ यज्ञाद्भवतिपर्जन्योयज्ञः कर्मसमुद्भवः ॥ १४ ॥
कर्मब्रह्मोद्भवंविद्धिब्रह्माक्षरसमुद्भवं ॥ तस्मात्सर्वगतंब्रह्मनित्यंयज्ञेप्रतिष्ठितं ॥ १५ ॥

मिति ॥ तच्चयजमानादिव्यापाररूपंकर्मब्रह्मोद्भवंविद्धि ॥ ब्रह्मवेदस्तस्मात्प्रवृत्तंजानीहि ॥ तच्च
ब्रह्मवेदाख्यं ॥ अक्षरात्परब्रह्मणः समुद्भूतंविद्धि अस्यमहतोभूतस्यनिश्वसितमेतदृग्वेदोय
जुर्वेदःसामवेदइतिश्रुतेः ॥ यतएवंअक्षरादेवयज्ञप्रवर्तेरत्यंततस्याभिप्रेतोयज्ञः ॥ तस्मात्सर्व

गतमप्यक्षरंब्रह्मनित्यंसर्वदायज्ञेप्रतिष्ठितंयज्ञेनोपायभूतेनप्राप्यतइतियज्ञप्रतिष्ठितमुच्यते॥
उद्यमस्योसदालक्ष्मीरितिवत्॥यद्वा॥यस्माज्जगच्चक्रमूलंकर्मतस्मात्सर्वगतंमंत्रार्थवादैः॥
सर्वेषुभूताख्यानादिषुगतंस्थितमपिवेदाख्यंब्रह्मसदायज्ञेतात्पर्येणप्रतिष्ठितं॥अतोयज्ञा
दिकर्मकर्तव्यमित्यर्थः॥१५॥यस्मादेवंपरमेश्वरेणैवभूतानांपुरुषार्थसिद्धयेकर्मादिचक्रंप्र

एवंप्रवर्तितंचक्रंनानुवर्तयतीहयः॥अघायुरिंद्रियारामोमोघंपार्थसजीवति॥१६॥

वर्तितं॥तस्मात्तदाकुर्वतोव्यर्थंजीवितमित्याह॥एवंप्रवर्तितमिति॥परमेश्वरवाक्यभूताद्वेदाख्या
त्ब्रह्मणःपुरुषाणांकर्मणिप्रवृत्तिः॥ततःकर्मनिष्पत्तिस्ततःपर्जन्यस्ततोऽन्नंततोभूतानिभूतानांचपुनः
तथैवकर्मप्रवृत्तिरित्येवंप्रवर्तितंचक्रंयोनानुवर्तयतिनानुतिष्ठतिसअघायुःपा[illegible]मायुर्यस्य
सयतःइंद्रियैर्विषयेष्वेवारमति॥नत्वीश्वराराधनार्थंकर्मणि॥अतोमोघंव्यर्थंसजीवति॥१६॥ ३२

तदेवंनकर्मणामनारंभान्नैःकर्म्यमित्यादिनाज्ञस्यांतःकरणशुद्ध्यर्थंकर्मयोगमुक्त्वाज्ञानि
नःकर्मानुपयोगमाह॥यस्त्विति॥द्वाभ्यां॥आत्मन्येवरतिःप्रीतिर्यस्यतस्मात्मन्येवतृप्तः॥स्वानं
दानुभवेननिर्वृतः॥अतएवात्मन्येवसंतुष्टोभोगापेक्षारहितायस्तस्यकर्तव्यंनास्ति॥१७॥तत्र
हेतुमाह॥नैवतस्येति॥कृतेनकर्मणातस्यार्थः॥पुण्यंनाऽस्तिनचाऽकृतेनकश्चेनकोपिप्रत्य

यस्त्वात्मरतिरेवस्यादात्मतृप्तश्चमानवः॥आत्मन्येवचसंतुष्टस्तस्यकार्यंनविद्यते॥१७॥
नैवतस्यकृतेनार्थोनाकृतेनेहकश्चन॥नचास्यसर्वभूतेषुकश्चिदर्थव्यपाश्रयः॥१८॥

वायोनाऽस्ति॥निरहंकारत्वेनविधिनिषेधातीतत्वात्॥तथापितस्मात्तदेषांनप्रियंयदेत
न्मनुष्याविद्युरितिश्रुतेः॥मोक्षेदेवकृतविघ्नसंभवात्तत्परिहारार्थंकर्मभिर्देवाःसेव्याइत्याशं
क्योक्तंसर्वभूतेषुब्रह्मादिस्थावरांतेषुकश्चिदपिअर्थव्यपाश्रयः॥अर्थेमोक्षेआश्रयणीयोस्य

नास्तीत्यर्थः ॥ विघ्नाभावस्य स्तुत्यैवोक्तत्वात् ॥ तथा च श्रुतिः ॥ तस्य ह न देवाश्च नाभूत्या ई-
शते आत्मा ह्येषां स भवतीति ह नेत्यव्ययमप्यर्थे ॥ देवा अपि तत्त्वज्ञस्य भूत्यै ब्रह्मताप्रतिबंधा-
यनेशते न शक्नुवंतीति श्रुतेरर्थः ॥ देवकृतास्तु विघ्नाः सम्यक्ज्ञानोत्पत्तेः प्रागेव ॥ यदेतद्ब्रह्म
मनुष्या विद्युस्तदेषां देवानां न प्रियमिति ॥ ब्रह्मज्ञानस्यैवाप्रियत्वोक्त्या तत्रैव विघ्नकर्तृत्वस्य

तस्मादसक्तः सततं कार्यं कर्म समाचर ॥ असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः ॥ १९ ॥

सूचितत्वात् ॥ १८ ॥ यस्मादेवंभूतस्य ज्ञानिन एव कर्मानुपयोगो नान्यस्य तस्मात्त्वं कर्म कुर्वि-
त्याह ॥ तस्मादिति ॥ असक्तः फलसंगरहितः सन् कार्यं अवश्यकर्तव्यतया विहितं नित्यनै-
मित्तिकं कर्म सम्यगाचर ॥ हि यस्मादसक्तः कर्माचरन्पुरुषः परं मोक्षं चित्तशुद्धिज्ञानद्वारा
प्राप्नोतीति ॥ १९ ॥ ॥

अत्र सदाचारं प्रमाणयति ॥ कर्मणैवेति ॥ कर्मणैव हि पुरुषः परं मोक्षं गुरुसत्त्वाः सक्ताः संसि-
द्धिं सम्यक्ज्ञानं प्राप्ता इत्यर्थः ॥ यद्यपि त्वं सम्यक्ज्ञानिनमेवात्मानं मन्यसे तथापि कर्माचरणं भ-
द्रमेवेत्याह ॥ लोकस्य संग्रहं स्वधर्मे प्रवर्तनं मया कर्मणि कृते जनः सर्वोपि करिष्यति ॥ अन्यथाज्ञानि-
दृष्टांतेनाज्ञः कर्म त्यजन् पतेदित्येवं लोकरक्षणमपि तावत्प्रयोजनं संपश्यन् कर्म कर्तुमेवार्हसि ॥

कर्मणैव हि संसिद्धिमास्थिता जनकादयः ॥ लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसि ॥ २० ॥
यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ॥ स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥ २१ ॥ ॥

न त्यक्तुमित्यर्थः ॥ २० ॥ कर्मकरणे लोकसंग्रहो यथा स्यात्तथाह ॥ यद्यदिति ॥ इतरः प्राकृतो जनो-
ऽपि तत्तदेवाचरति ॥ स श्रेष्ठो जनः कर्मशास्त्रं निवृत्तिशास्त्रं वा यत्प्रमाणं मन्यते तदेव लोकोप्यनु-
सरति ॥ अत्र चाहमेव दृष्टांत इत्याह ॥ त्रिभिः ॥ २१ ॥ ॥

नमेपार्थेति॥ हे पार्थ मे कर्तव्यं नास्ति यतस्त्रिष्वपि लोकेषु प्राप्तं सतत्प्राप्यं नास्ति तथापि कर्मण्यहं वर्त एव॥२२॥ अकरणे लोकस्य नाशं दर्शयति॥ यदि ह्यहमिति॥ जातु कदाचिदपि अतंद्रितोऽनलसः सन्यदि कर्माणि न वर्तेयं तर्हि ममैव वर्त्म मार्गं मनुष्या अनुवर्तंते अनुवर्तेरन्नित्यर्थः॥२३॥

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किंचन॥ नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि॥२२॥
यदि ह्यहं न वर्तेयं जातु कर्मण्यतंद्रितः॥ मम वर्त्मानुवर्तंते मनुष्याः पार्थ सर्वशः॥
२३॥ उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहं॥ संकरस्य च कर्ता स्यामुपहन्यामिमाः
प्रजाः॥२४॥ ॥

ततः किमत आह॥ उत्सीदेयुरिति॥ उत्सीदेयुः धर्मलोपेन नश्येयुः॥ ततश्च वर्णसंकरे भवेत्तस्याप्यहमेव कर्ता स्यां भवेयं॥ एवमहमेव प्रजा उपहन्यां मलिनीकुर्यां॥२४॥ ॥

तस्मादात्मविदापि लोकसंग्रहार्थं तत्कृपया कर्म कार्यमित्युपसंहरति॥ सक्ता इति॥ कर्मणि सक्ताः अभिनिविष्टाः संतोऽज्ञा यथा कर्म कुर्वंति॥ असक्तः सन् विद्वानपि तथैव कुर्यात् लोकं संग्रहं कर्तुमिच्छुः॥२५॥ ननु कृपया तत्वज्ञानमेवोपदेष्टुं युक्तं नेत्याह॥ बुद्धिभेदयिति॥ अज्ञानामत एव कर्मसंगिनां

सक्ताः कर्मण्यविद्वांसो यथा कुर्वंति भारत॥ कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहं॥२५॥ न
बुद्धिभेदं जनयेदज्ञानां कर्मसंगिनां॥ जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन्॥२६॥ प्रकृतेः क्रिय
माणानि गुणैः कर्माणि सर्वशः॥ अहंकारविमूढात्मा कर्ताहमिति मन्यते॥२७॥ कर्मसिक्तानां अकर्त्रात्मोप
देशेन बुद्धेर्भेदमन्यथात्वं न जनयेत्॥ कर्मणः सकाशात् बुद्धिचालनं न कुर्यात्॥ अपितु जोषयेत्सेवयेत्॥ अ
ज्ञान् कर्माणि कारयेदित्यर्थः॥ कथं युक्तः अवहितः भूत्वा स्वयमाचरन्सन्॥ बुद्धिचालने कृते सति कर्मसु श्र
द्धानिवृत्तेः ज्ञानस्य चानुत्पत्तेस्तेषामुभयभ्रंशः स्यादिति भावः॥२६॥ ननु विदुषापि चेत्कर्म कर्तव्यं तर्हि वि

र्हि विदुषोः कोविशेष इत्याशंक्योभयोर्विशेषं दर्शयति प्रकृतेरिति द्वाभ्यां प्रकृतेर्गुणैः कार्यैरिंद्रियैः सर्व
प्रकारेण क्रियमाणानि यानि कर्माणि तान्यहमेव कर्त्ता करोमीति मन्यते ॥ अत्र हेतुः ॥ अहंकारेणेंद्रियादि
ष्वात्माध्यासेन विमूढात्मा बुद्धिर्यस्य सः ॥२७॥ विद्वांस्तु तथा न मन्यत इत्याह ॥ तत्त्वविदिति ॥ नाहं गुणात्मक इति

तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः ॥ गुणा गुणेषु वर्त्तंत इति मत्वा न सज्जते ॥२८॥ प्रकृते॰
र्गुणसंमूढाः सज्जंते गुणकर्मसु ॥ तानकृत्स्नविदो मंदान्कृत्स्नविन्न विचालयेत् ॥२९॥

गुणेभ्य आत्मनो विभागो न मे कर्माणीति कर्मभ्योऽप्यात्मनो विभागस्तयोर्गुणकर्मविभागयोर्यस्तत्त्वं
वेत्ति स तु न सज्जते कर्त्तृत्वाभिनिवेशं न करोति ॥ तत्र हेतुः ॥ गुणा इंद्रियाणि गुणेषु विषयेषु प्रवर्त्तंते ना
हमिति मत्वा ॥२८॥ न बुद्धिभेदं जनयेदित्युक्तमुपसंहरति प्रकृतेरिति ये प्रकृतेर्गुणैः सत्वादिभिः संमू
ढाः संतो गुणेष्विंद्रियेषु तत्कर्मसु च सज्जंते तानकृत्स्नविदो मंदान्कृत्स्नवित्सर्वज्ञो न विचालयेत् ॥२९॥

तदेवं तत्त्वविदापि कर्म कर्त्तव्यं ॥ त्वं तु नाद्यापि तत्त्ववित्ततः कर्मैव कुर्वित्याह ॥ मयि सर्वाणीति ॥ सर्वा
णि कर्माणि मयि संन्यस्य समर्प्य ॥ अध्यात्मचेतसा अंतर्याम्यधीनोऽहं करोमीति दृष्ट्या ॥ निराशीर्निः
कामः ॥ अत एव मत्फलसाधनं मदर्थमिदं कर्मेत्येवं ममताशून्यश्च भूत्वा ॥ विगतज्वरस्त्यक्तशोकश्च
भूत्वा युध्यस्व ॥३०॥ एवं कर्मानुष्ठाने गुणमाह ॥ ये मे मतमिति ॥ मद्वाक्ये श्रद्धावंतोऽनसूयंतः ॥ दुः

मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा ॥ निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥३०॥
ये मे मतमिदं नित्यमनुतिष्ठंति मानवाः ॥ श्रद्धावंतोऽनसूयंतो मुच्यंते तेऽपि कर्मभिः ॥३१॥

खात्मके कर्मणि प्रवर्त्तयतीति दोषदृष्टिमकुर्वंतश्च यमदीयं मतमिदमनुतिष्ठंति तेऽपि शनैः ॥ सम्य
ग्ज्ञानिवत्कर्मभिर्मुच्यंते ॥३१॥ विपक्षे दोषमाह ॥ ये त्वेतदिति ॥ ये तु मे तन्मम मतं रोगस्य पथ्यं कर्मक
र्त्तव्यमित्यनुशासनमभ्यसूयंतो द्विषंतो नानुतिष्ठंति ॥ तानचेतसो विवेकशून्यान् ॥ अत एव सर्व

स्मिन् कर्मणि ब्रह्मविषये यत् ज्ञानं तत्र विमूढान् नष्टान् विद्धि॥ ३२॥ ननु तर्हि महाफलत्वादिंद्रियाणि निगृह्य निःकामाः संतः सर्वेपि स्वधर्ममेव किं नानुतिष्ठंति॥ तत्राह॥ सदृशं चेति॥ प्रकृतिः प्राचीनकर्मसंस्कारस्थानः स्वभावः स्वस्याः स्वकीयायाः॥ प्रकृतेः स्वभावस्य सदृशमनुरूपमेव गु-

ये त्वेतदभ्यसूयंतो नानुतिष्ठंति मे मतं॥ सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः॥ ॥
३२॥ सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि॥ प्रकृतिं यांति भूतानि निग्रहः किं करि-
ष्यसि॥ ३३॥ ॥

णदोषज्ञानवानपि चेष्टते॥ किंपुनर्वक्तव्यमज्ञश्चेष्टत इति॥ यस्माद्भूतानि सर्वेपि प्राणिनः प्रकृतिं यांति अनुवर्तंते॥ एवं च सति इंद्रियनिग्रहः किं करिष्यति॥ प्रकृतेर्बलिष्ठत्वादित्यर्थः॥ ३३॥ ॥ ३६

नन्वेवं प्रकृत्यधीनैव चेत्पुरुषस्य प्रवृत्तिस्तर्हि विधिनिषेधवैयर्थ्यं प्राप्तमित्याशंक्याह। इंद्रियस्येति। इंद्रियस्येति वीप्सया प्रत्येकं सर्वेषामिंद्रियाणामित्युक्तं। अर्थे स्वस्वविषये अनुकूले रागः प्रतिकूले द्वेष इत्येवं रागद्वेषौ व्यवस्थितौ अवश्यंभाविनौ॥ ततश्च तदनुरूपा प्रवृत्तिरिति भूतानां प्रकृतिः तथापि तयोर्वशवर्ती न भवेदिति शास्त्रेण नियम्यते। हि यस्मात् मुमुक्षोस्तौ परिपंथिनौ प्रतिपक्षौ। अयं

इंद्रियस्येंद्रियस्यार्थे रागद्वेषौ व्यवस्थितौ॥ तयोर्न वशमागच्छेत्तौ ह्यस्य परिपंथिनौ॥ ३४॥
श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्॥ स्वधर्मे निधनं श्रेयः परधर्मो भयावहः॥ ३५॥

भावः॥ विषयस्मरणादिना रागद्वेषावुत्पाद्यानवहितं पुरुषमनर्थेपि गंभीरस्रोत इव प्रकृतिर्बलात्प्रवर्तयति॥ शास्त्रं तु ततः प्रागेव विषयेषु रागद्वेषप्रतिबंधके परमेश्वरभजनादौ प्रवर्तयति। ततश्च गंभीरस्रोतः पातात्पूर्वं तावन्नाश्रित्य इति नानर्थं प्राप्नोतीति। ३४। तदेवं स्वाभाविकी पश्वादिसदृशं प्र

द्वृत्तिंत्यक्त्वाधर्मेप्रवृत्तिर्नतिव्याप्नोतीत्युक्तं ॥ तर्हिस्वधर्मस्ययुद्धादेर्दुःखरूपस्ययथावत्कर्तुमशक्यत्वात्परध
र्मस्यवाहिंसादेःसुकरत्वाद्धर्मत्वाविशेषात् ॥ तत्रप्रवृत्तिमिच्छंतंप्रत्याह ॥ श्रेयान्स्वधर्मेति ॥ किंचि
दंगहीनोपिस्वधर्मःश्रेयान्प्रशस्यतरःस्वनुष्ठितात् ॥ सर्वांगसंपूर्त्याकृतादपिपरधर्मात्सकाशात् ॥
तत्रहेतुः ॥ स्वधर्मेयुद्धादौप्रवर्त्तमानस्यनिधनंमरणमपिश्रेष्ठंस्वर्गादिसाधनत्वात् ॥ परधर्मस्तुपर

अर्जुनउवाच ॥ अथकेनप्रयुक्तोयंपापंचरतिपूरुषः ॥ अनिच्छन्नपिवार्ष्णेयबलादिवनियोजितः ॥३६॥

स्यभयावहः ॥ निषिद्धत्वेननरकप्रापकत्वात् ॥३५॥ तयोर्द्वविशामागछेदित्युक्तं ॥ तदेतदशक्यंम
न्वानोऽर्जुनउवाच ॥ अथकेनेति ॥ वृष्णिवंशेऽवतीर्णोवार्ष्णेयः हेवार्ष्णेय ॥ अनर्थरूपंपापंकर्त्तुम
निच्छन्नपिकेनप्रयुक्तःप्रेरितोयंपुरुषःपापंचरतिकामक्रोधौविवेकबलेननिरुंधतोपिपुरुषस्यपुनः
पापेप्रवृत्तिदर्शनादन्योपितयोर्मूलभूतःकश्चित्प्रवर्त्तकोभवेदितिसंभावनयाप्रश्नः ॥३६॥ ३७

अत्रोत्तरंश्रीभगवानुवाच ॥ कामएषइतियस्त्वयापृष्टोहेतुःएषःकामएव ॥ ननुक्रोधोपिकामएव
वाएषएवपूर्वंतपोक्तः इन्द्रियस्येन्द्रियस्यार्थेइत्यत्रसत्यंनासौततःपृथक् ॥ किंतु ॥ क्रोधोपिहिकेनचि
त्प्रतिहतःक्रोधात्मनापरिणमते ॥ अतःपूर्वंपृथगुक्तोपिक्रोधः ॥ कामजयस्यएवक्रोधजनय
इत्यभिप्रायेणकामैमेकीकृत्योच्यते ॥ रजोगुणात्समुद्भवतीतितथा ॥ अनेनसत्त्ववृद्ध्यारजसिक्षयं

श्रीभगवानुवाच ॥ कामएषक्रोधएषरजोगुणसमुद्भवः ॥ महाशनोमहापा
प्माविद्ध्येनमिहवैरिणः ॥३७॥

नीतेसतिकामोपिक्षीयतइतिसूचितः ॥ एवंकाममिहमोक्षमार्गवैरिणं ॥ अयंचवक्ष्यमाणक्रमेणहं
तव्यएव ॥ यतोनायंदानेनसंधातुंशक्यतइत्याह ॥ महाशनः ॥ महदशनंयस्यदुःपूरंइत्यर्थः ॥
नचसाम्नासंधातुंशक्यः ॥ यतोमहापाप्माअत्युग्रः ॥३७॥ विदि ३

कामस्य वैरित्वं दर्शयति ॥ धूमेनेति ॥ यथा धूमेन सहजेन वह्निराव्रियते आच्छाद्यते यथा चादर्शो मलेनो
नागंतुकेन यथोल्वेन गर्भवेष्टनचर्मणा गर्भः सर्वतो निरुद्ध आवृतः तथा प्रकारत्रयेणापि तेन कामेनावृ
तमिदं ॥ ३८ ॥ इदंशब्दनिर्दिष्टं दर्शयन् वैरित्वं स्फुटयति ॥ आवृतं ज्ञानमिति ॥ इदं विवेकज्ञानमेतेनावृतं ।

धूमेनाव्रियते वह्निर्यथादर्शो मलेन च ॥ यथोल्वेनावृतो गर्भस्तथा तेनेदमावृतम् ॥ ३८ ॥
आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा ॥ कामरूपेण कौंतेय दुःपूरेणानलेन च ॥ ३९ ॥

अज्ञस्य खलु भोगसमये कामः सुखहेतुरेव परिणामे तु वैरितां प्रतिपद्यते ॥ ज्ञानिनः पुनस्तत्का
लमप्यनर्थानुसंधानाद्दुःखहेतुरेवेति ॥ नित्यवैरिणेत्युक्तं ॥ किंच ॥ विषयैः पूर्यमाणो यो दुः
पूरः आपूर्यमाणस्तु शोकसंतापहेतुत्वादनलतुल्यः ॥ अनेन सर्वान्प्रति नित्यवैरित्वमुक्तं ॥
इदानीं तस्याधिष्ठानं कथयन् जयोपायमाह ॥ ३९ ॥ ३८

॥

इंद्रियाणीति ॥ द्वाभ्यां ॥ विषयदर्शनश्रवणादिभिः ॥ संकल्पेनाध्यवसायेन च कामस्याविर्भावादिंद्रिया
णि च मनश्च बुद्धिश्चास्याधिष्ठानमुच्यते ॥ एतैरिंद्रियादिभिर्दर्शनादिव्यापारवद्भिराश्रयभूतैर्विवे
कज्ञानमावृत्य देहिनं विमोहयति ॥ ४० ॥ यस्मादेवं तस्मात्त्वमिति ॥ आदौ विमोहात्पूर्वमेव इंद्रियाणि म

इंद्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते ॥ एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनं ॥ ४० ॥
तस्मात्त्वमिंद्रियाण्यादौ नियम्य भरतर्षभ ॥ पाप्मानं प्रजहिह्येनं ज्ञानविज्ञाननाशनं ॥ ४१ ॥

नो बुद्धिं च नियम्य पापरूपमेनं कामं हि स्फुटं प्रजहि घातय ॥ यद्वा ॥ प्रजहिहि परित्यज ज्ञानमात्मविष
यं विज्ञानं शास्त्रीयं तयोर्नाशकं ॥ यद्वा ॥ ज्ञानं शास्त्राचार्योपदेशजं विज्ञानं निदिध्यासनं ॥ विज्ञाय प्र
ज्ञां कुर्वीतेति श्रुतेः ॥ ४१ ॥ यत्र चित्तप्रणिधानेन इंद्रियाणि नियंतुं शक्यंते तदात्मस्वरूपं देहादिभ्यो
विविच्य दर्शयति ॥ इंद्रियाणीति देहादिभ्यो ग्राह्येभ्यः पराणि श्रेष्ठान्याहुः सूक्ष्मत्वात्प्रकाशकत्वाच्च ॥

अतएव तद्व्यतिरिक्तत्वमप्ययुक्तं न वति इंद्रियेभ्यश्च संकल्पात्मकं मनः परं ॥ तत्प्रवर्तकत्वात् ॥ मन
सस्तु बुद्धिर्निश्चयात्मका यतो निश्चयपूर्वकत्वात्संकल्पस्य ॥ यस्तु बुद्धेः परस्तत्साक्षित्वेनावस्थितः
सर्वांतरः स आत्मा विमोहयति देहिनमिति देहिशब्दोक्तस्त्वात्मा स इति परामृश्यते ॥ ४२ ॥ उपसंहर
ति ॥ एवं बुद्धेरित्यादि ॥ बुद्धेरेव विषयेंद्रियादिजन्याः कामादिविषयाः ॥ आत्मा तु निर्विकारस्तत्साक्षी ॥

इंद्रियाणि पराण्याहुरिंद्रियेभ्यः परं मनः ॥ मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥ ४२ ॥
एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना ॥ जहि शत्रुं महाबाहो कामरूपं दुरासदं ॥ ४३ ॥

त्येवं बुद्धेः परमात्मानं बुद्ध्वा त्मना एवंभूतेन निश्चयात्मिकया बुद्ध्या आत्मानं मनः संस्तभ्य निश्चलं कृत्वा ॥
कामरूपं शत्रुं जहि मारय दुरासदं दुःखेनासादनीयं दुर्विज्ञेयगतिमित्यर्थः ॥ ४३ ॥ स्वधर्मेण यमारा
ध्य भक्त्या मुक्तिमिता बुधाः ॥ तं कृष्णं परमात्मानं तोषयेत्सर्वकर्मभिः ॥ ४३ ॥ ॥ ३९

इति श्रीभगवद्गीतासुबोधिन्यां टीकायां तृतीयोऽध्यायः ॥ ३ ॥ एवं तावदध्यायद्वयेन कर्मयोगोपायो
ज्ञानयोगो मोक्षसाधनत्वेनोक्तस्तमेव ब्रह्मार्पणादिगुणविधानेन तत्त्वंपदार्थविवेकादिना च प्रपं
चयिष्यन् प्रथमं तावत्परंपराप्राप्तत्वेन स्तुवन् ॥ श्रीभगवानुवाच ॥ इममिति ॥ त्रिभिः ॥ अव्ययफलत्वाद

इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे कर्मयोगो नाम तृती
योऽध्यायः ॥ ३ ॥ श्रीभगवानुवाच ॥ इमं विवस्वते योगं प्रोक्तवानहमव्ययं ॥ विवस्वान्मनवे प्राह मनुरि
क्ष्वाकवेऽब्रवीत् ॥ १ ॥ एवं परंपराप्राप्तमिमं राजर्षयो विदुः ॥ स कालेनेह महता योगो नष्टः परंतप ॥ २ ॥

व्ययं इमं योगं पुराहं विवस्वते आदित्याय कथितवान् ॥ स च स्वपुत्राय मनवे श्राद्धदेवाय प्राह ॥ स च म
नुः स्वपुत्राय इक्ष्वाकवेऽब्रवीत् ॥ १ ॥ एवमिति ॥ राजानश्च ते ऋषयश्च अन्येपि राजर्षयो निमिप्रमुखाः
स्वपित्रादिभिरिक्ष्वाकुप्रमुखैः प्रोक्तमिमं योगं विदुर्जानंति ततः ॥ अद्य तनानामसानेकारणमाह ॥

हे परंतप ॥ शत्रुतापन सं योगः कालवशादिहलोके नष्टः विच्छिन्नः ॥ २ ॥ स एवायमिति ॥ स ए
वायं योगो ह्यविच्छिन्ने संप्रदाये सति पुनरद्य मया ते तुभ्यमुक्तः ॥ यतस्त्वं मम भक्तोसि सखा चइ
ति ॥ अन्यस्मै मया नोच्यते हि यस्मादिदमुत्तमं रहस्यं ॥ ३ ॥ भगवतो विवस्वन्तं प्रति योगोपदेशः

स एवायं मया तेद्य योगः प्रोक्तः पुरातनः ॥ भक्तोसि मे सखा चेति रहस्यं ह्येतदुत्तमं ॥
३ ॥ अर्जुन उवाच ॥ अपरं भवतो जन्म परं जन्म विवस्वतः ॥ कथमेतद्विजानीयां
त्वमादौ प्रोक्तवानिति ॥ ४ ॥

संभवं पश्यन्नर्जुन उवाच ॥ अपरमिति ॥ अपरं अर्वाचीनं तव जन्म परं प्राक्कालीनं विव
स्वतो जन्म तस्मात्त्वमाधुनिकत्वाच्चिरंतनाय विवस्वते त्वमादौ योगं प्रोक्तवानित्येतत् ॥ कथ
महं विजानीयां ज्ञातुं शक्नुयां ॥ ४ ॥ ॥

इति स्पष्टं तमर्जुनं रूपान्तरेणोपदिष्टवानित्यभिप्रायेणोत्तरं ॥ श्रीभगवानुवाच ॥ बहूनिमइति ॥
मे मम बहूनि जन्मानि तव च व्यतीतानि तानि सर्वाण्यहं वेद जानामि ॥ अलुप्तविद्याशक्तित्वात् ॥
त्वं तु न जानासि अविद्यावृतत्वात् ॥ ५ ॥ नन्वनादेस्तव कुतो जन्म अविनाशिनश्च कथं पुनः पुनर्जन्म
येन बहूनि व्यतीतानीत्युच्यते ऐश्वरस्य च तव पुण्यपापविहीनस्य कथं जीववज्जन्मेत्यत आह ॥

श्रीभगवानुवाच ॥ बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ॥ तान्यहं वेद सर्वाणि न त्वं वेत्थ प
रंतप ॥ ५ ॥ अजोपि सन्नव्ययात्मा भूतानामीश्वरोपि सन् ॥ प्रकृतिं स्वामधिष्ठाय संभवाम्या
त्ममायया ॥ ६ ॥

अजोपीति ॥ सत्यमेवं तथापि अजोपि सन्नहं ॥ तथाव्ययात्मापि अनश्वरस्व
भावोपि सन् ॥ तथा ईश्वरोपि कर्मपारतंत्र्यरहितोपि सन् स्वमायया संभवामि सम्यगप्रच्युतज्ञा
नबलवीर्यादिशक्त्यैव भवामि ॥ ननु तथापि षोडशकलात्मकलिंगशरीरस्य तव कुतो जन्मेत्यत उक्तं ॥

स्वां शुद्धसत्वात्मिकां प्रकृतिमधिष्ठाय स्वीकृत्य विशुद्धोर्जितसत्वमूर्त्या स्वेच्छयावतरामीत्यर्थः॥ क
दा संभवसीत्यपेक्षायामाह॥ यदायदेति॥ ग्लानिर्हानिः॥ अभ्युत्थानमाधिक्यं॥ ७॥ किमर्थमि
त्यपेक्षायामाह॥ परित्राणायेति॥ साधूनां स्वधर्मवर्त्तिनां रक्षणाय॥ दुष्टं कर्म कुर्वंतीति दुःखकृ

यदायदाहि धर्म्मस्य ग्लानिर्भवति भारत॥ अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहं॥७॥
परित्राणाय साधूनां विनाशाय च दुःकृतां॥ धर्मसंस्थापनार्थाय संभवामि युगेयुगे॥
॥८॥ तस्तेषां वधाय च॥ एवं धर्मस्य संस्थापनाय साधुरक्षणेन दुष्टवधेन च धर्मं स्थिरीक
र्तुं युगेयुगे तत्तदवसरे संभवामीत्यर्थः॥ न चैवं दुष्टनिग्रहं कुर्वतोपि नैर्घृण्यं शंकनीयं॥
यथाहुः॥ लालने ताडने मातुर्नाकारुण्यं यथार्भके तद्वदेव महेशस्य नियंतुर्गुणदोषयोः
ः॥८॥ ॥

एवंविधानामीश्वरजन्मकर्मणां ज्ञाने फलमाह॥ जन्मकर्मेति॥ मे जन्म स्वेच्छाकृतं कृतं कर्म च धर्मपालनरू
पं दिव्यमलौकिकं तत्वतः परानुग्रहार्थमेवेति सदेहाभिमानं त्यक्त्वा पुनर्जन्म नैति न प्राप्नोति॥ किंतु मां प्रा
प्नोति॥ ९॥ कथं जन्मकर्मज्ञानेन त्वत्प्राप्तिः स्यादित्यत आह॥ वीतरागेति॥ अहं शुद्धसत्वावतारैर्धर्मपरिपालनं
करोमीति मदीयं परमकारुणिकत्वं ज्ञात्वा॥ वीता गता रागभयक्रोधा येभ्यस्ते विक्षेपाभावात्॥ मन्मयाम

जन्मकर्म च मे दिव्यमेवं यो वेत्ति तत्वतः॥ त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोर्जुन॥ ९॥ वीतरागभय
क्रोधा मन्मया मामुपाश्रिताः॥ बहवो ज्ञानतपसा पूता मद्भावमाश्रिताः॥ १०॥ एकचित्ता भूत्वा मामेवो
पाश्रिताः॥ संतो मत्प्रसादलब्धं मदात्मकं ज्ञानं च तपश्च तत्परिपाकहेतुः स्वधर्मस्तपो [illegible]॥
तेन ज्ञानतपसा पूताः शुद्धा निरस्ताज्ञानतत्कार्यमलाः मद्भावं मत्सायुज्यं प्राप्ताः बहवो न त्विदानीमेव प्रवृत्तोयं
मद्भक्तिमार्ग इत्यर्थः॥ तदेवं तान्यहं वेद सर्वाणीत्यादिना विद्याविद्योपाधिभ्यां तत्पदार्थौ॥ ह्यावीश्वरजी॥

वीप्रदर्येश्वरस्यचविद्याभावेननित्यशुद्धत्वाज्जीवस्यचेश्वरस्यलब्धज्ञानेनाज्ञानानिवृत्तेःशुद्धस्यसतश्चि
दंशेनतदैक्यमुक्तमितिद्रष्टव्यं॥१०॥ननुतर्हिकिंत्वय्यपिवैषम्यमस्तियस्मादेवंत्वदेकशरणानामेवात्म
भावंददासिनान्येषांसकामानामित्यतआह।येयथेति।यथायेनप्रकारेणसकामतयानिःकामतयावायेमं
भजंतितानहंतथैवतदपेक्षितफलदानेनभजामिअनुगृह्णामि।ननुयेसकामामांविहायेंद्रादीनेवभजंतीति

येयथामांप्रपद्यंतेतांस्तथैवभजाम्यहं।ममवर्त्मानुवर्त्तंतेमनुष्याःपार्थसर्वशः॥११॥कांक्षंतःकर्मणांसिद्धिं
यजंतइहदेवताः।क्षिप्रंहिमानुषेलोकेसिद्धिर्भवतिकर्मजा॥१२॥तानहमुपेक्षइतिनमंतव्यंयतःसर्वशःसर्वप्रकारै
रिंद्रादिसेवकाअपिममैववर्त्ममार्गमनुवर्त्तंते।इंद्रादिरूपेणापिममैवसेव्यत्वात्॥११॥तर्हिमोक्षार्थमेवकिमि
तिसर्वेनभजंतीत्याह।कांक्षंतइति।कर्मणांफलसिद्धिंकांक्षंतःप्रायशःइहमानुष्यलोकेइंद्रादिदेवताएवयजंते
ननुमांज्ञात्वामामेवहियस्मात्कर्मजासिद्धिःकर्मजंफलंशीघ्रंभवतिननुज्ञानफलंकैवल्यंदुःप्रापत्वाज्ज्ञानस्य॥१२॥ ४२

ननुचकेचित्सकामतयाप्रवर्त्तंते।केचिन्निःकामतयेतिकर्मवैचित्र्यंतत्कर्तॄणांचब्राह्मणादीनामुत्तममध्यमादि
वैचित्र्यंकुर्वतःकथंवैषम्यंनास्तीत्याशंक्याह।चातुर्वर्ण्यमिति।चत्वारोवर्णाएवचातुर्वर्ण्यंस्वार्थेष्यञ्प्रत्ययः।अ
यमर्थःसत्त्वप्रधानाःब्राह्मणास्तेषांचशमदमादीनिकर्माणि।सत्त्वरजःप्रधानाःक्षत्रियास्तेषांचशौर्ययुद्धादीनि
कर्माणि।रजस्तमःप्रधानावैश्यास्तेषांकृषिवाणिज्यादीनिकर्माणि।तमःप्रधानाःशूद्रास्तेषांत्रैवर्णिकशुश्रू

चातुर्वर्ण्यंमयासृष्टंगुणकर्मविभागशः।तस्यकर्त्तारमपिमांविद्ध्यकर्त्तारमव्ययं॥१३॥नमांकर्माणिलिंपंति
नमेकर्मफलेस्पृहा।इतिमांयोभिजानातिकर्मभिर्नसबध्यते॥१४॥षादिकर्माणि।एवंगुणानांकर्मणांचविभा
गैश्चातुर्वर्ण्यंमयैवसृष्टमितिसत्यं।तथाप्येवंतस्यकर्त्तारमपिफलतोऽकर्त्तारमेवमांविद्धि।तत्रहेतुःअव्ययमा
सक्तिराहित्येनश्रमरहितं॥१३॥तदेवदर्शयन्नाह।नमामिति।कर्माणिविश्वसृष्ट्यादीन्यपिमांनलिंपंति।आसक्तिं
नकुर्वंतिनिरहंकारत्वात्।अप्राप्तकामत्वेनममकर्मफलेस्पृहाऽभावाच्चमांनलिंपंतीतिकिंवक्तव्यंयतःकर्मफलेस

हाराहित्येन मां यो ऽभिजानाति सो ऽपि कर्मभिर्न बध्यते॥ मम निर्लेपकत्वकारणं निरहंकारत्वं निस्पृहत्वादिकं जा
नतस्तस्याप्यहंकारादिशैथिल्यात्॥१४॥ ये यथा मां प्रपद्यंते इत्यादिचतुर्भिः श्लोकैः प्रासंगिकमीश्वरस्य वैष
म्यं परिहृत्य पूर्वोक्तमेव कर्मयोगं प्रपंचयितुमनुस्मारयति॥ एवमिति॥ अहंकाराराहित्येन कृतं कर्म बंधकं न
भवतीत्येवं ज्ञात्वा पूर्वैर्जनकादिभिरपि मुमुक्षुभिः सत्वशुध्यर्थं पूर्वतरं युगांतरे ऽपि कृतं॥ तस्मात्त्वमपि प्रथमं

एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः॥ कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतं॥१५॥ किं कर्म
किमकर्मेति कवयो ऽप्यत्र मोहिताः॥ तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसे ऽशुभात्॥१६॥ कर्मैव कुरु
॥१५॥ तच्च तत्वविद्भिः सह विचार्य कर्तव्यं न लोकपरंपरामात्रेणेत्यत आह॥ किं कर्मेति॥ किं कर्म कीदृ
शं करणं किमकर्म कीदृशं कर्माकरणमित्यस्मिन्नर्थे विवेकिनो ऽपि मोहिताः॥ अतो यज्ज्ञात्वानुष्ठाय
अशुभात्संसारान्मोक्ष्यसे मुक्तो भविष्यसि॥ तत्कर्माकर्म च तुभ्यमहं प्रवक्ष्यामि शृणु॥१६॥ ॥ ४३

ननु लोकप्रसिद्धमेव कर्म देहादिव्यापारात्मकं अकर्म च तदव्यापारात्मकं अतः कथमुच्यते॥ कवयो ऽप्यत्र
मोहिताः इति तत्राह॥ कर्मण इति॥ कर्मणो विहितव्यापारस्यापि तत्वं बोधव्यं अस्ति न तु लोकप्रसिद्ध
मात्रमेव॥ अकर्मणः॥ अव्यापारस्यापि तत्वं बोधव्यमस्ति॥ विकर्मणो ऽपि निषिद्धस्यापि तत्वं बोद्धव्यमस्ति॥
यतः कर्मणो गतिर्गहना॥ कर्मण इत्युपलक्षणार्थं॥ कर्माकर्मविकर्मणां तत्वं दुर्विज्ञेयमित्यर्थः॥१७॥ तदे
वं कर्मादीनां दुर्विज्ञेयत्वं दर्शयन्नाह॥ कर्मण्यकर्मेति॥ परमेश्वराराधनलक्षणे कर्मणि विषये अकर्म का

कर्मणो ह्यपि बोध्यं च बोधव्यं च विकर्मणः॥ अकर्मणश्च बोधव्यं गहना कर्मणो गतिः॥१७॥

र्मेदं न भवतीति यः पश्येत्तस्य ज्ञानहेतुत्वेन बंधकत्वाऽभावात्॥ अकर्मणि च विहिताकरणे कर्म यः पश्ये
त्प्रत्यवायापादकत्वेन बंधहेतुत्वात्॥ मनुष्येषु कर्म कुर्वाणेषु स बुद्धिमान् व्यवसायात्मिकबुद्धिमत्वाच्छ्रे
ष्ठः॥ तं स्तौति॥ स युक्तो योगी तेन कर्मणा ज्ञानयोगावाप्तेः स कृत्स्नकर्मकर्ता च॥ सर्वतः संप्लुतोदकस्थानी
ये तस्मिन् कर्मणि सर्वकर्मफलानामंतर्भूतत्वात्॥ तदेवमारुरुक्षोः कर्मयोगाधिकारावस्थायां न कर्मणाम

नारंभादित्यादिनोक्तएवकर्मयोगःस्फुटीकृतः। तत्रपंकरूपत्वाच्चास्यप्रकरणास्यनपौनरुक्त्यदोषः। अनेनै
वयोगारूढावस्थायांयस्त्वात्मरतिरेवस्यादित्यादिनायःकर्मानुपयोगउक्तस्तस्याप्यर्थात्प्रपंचःकृतोवेदि
तव्यः। यदा। आरुरुक्षोरपिकर्मबंधकंनभवति। तदात्वारूढस्यकुतोबंधकस्यादित्यत्रापिश्लोकोयोज्यते
कर्मणिदेहेंद्रियादिव्यापारेवर्तमानेप्यात्मनोदेहादिव्यतिरेकानुभवेन। अकर्मस्वाभाविकंनैःकर्म्यमे

कर्मण्यकर्मयःपश्येदकर्मणिचकर्मयः। सबुद्धिमान्मनुष्येषुसयुक्तःकृत्स्नकर्मकृत्। १८।

वयःपश्येत्। तथाअकर्मणिचाज्ञानरहितेदुःखबुद्ध्याकर्मणांत्यागेकर्मयःपश्येत्तस्यप्रतिबंधत्वेन।
मिथ्याचारत्वात्। तदुक्तं। कर्मेंद्रियाणिसंयम्ययआस्तेमनसास्मरन्निति। यएवंभूतः। सतुसर्वेषु
मनुष्येषुबुद्धिमान्पंडितः। तत्रहेतुः। यतःकृत्स्नानिसर्वाणियदृच्छयाप्राप्तान्याहारादीनिकर्माणि
कुर्वन्नपिसयुक्तएव। अकर्त्रात्मज्ञानेनसमाधिस्थएवेत्यर्थः। अनेनैवज्ञानिनःस्वभावादापन्नं
कलंजभक्षणादिकंनदोषः। अज्ञस्यतुरागतःकृतेदोषइति। विकर्मणोपितत्वंनिरूपितंद्रष्टव्यं। १८ ४४

कर्मण्यकर्मयःपश्येदितिश्रुत्यर्थाभ्यांयदुक्तमर्थद्वयंतदेवस्पष्टयति। यस्येत्यादिपंचभिः। सम्यगार
भ्यंतइतिसमारंभाःकर्माणिकाम्यतइतिकामःफलंतत्संकल्पेनवर्जितायस्यभवंतितंपंडितमाहुः यत
स्तैःसमारंभैःशुद्धेचित्तेसतिजातेनज्ञानाग्निनादग्धानिअकर्मतांनीतानिकर्माणियस्यतं। आरूढावा
स्थायांतुकामःफलविषयस्तदर्थमिदंकर्तव्यमिति। कर्मविषयःसंकल्पस्ताभ्यांवर्जिताःशेषंस्पष्टं। १९।

यस्यसर्वेसमारंभाःकामसंकल्पवर्जिताः। ज्ञानाग्निदग्धकर्माणंतमाहुःपंडितंबुधाः। १९।
त्यक्त्वाकर्मफलासंगंनित्यतृप्तोनिराश्रयः। कर्मण्यभिप्रवृत्तोपिनैवकिंचित्करोतिसः। २०।

किंच। त्यक्त्वेति। कर्मणितत्फलेचासक्तिंत्यक्त्वानित्येननिजानंदेनतृप्तः। अतएवयोगक्षेमार्थमा
श्रयणीयरहितः। एवंभूतोयःसस्वाभाविकेकर्मणिअभितःप्रवृत्तोपिकिंचिदपिनैवकरोतित
स्यकर्मअकर्मतामापद्यतइत्यर्थः। २०। ।

किंच॥ निराशीरिति॥ निर्गताः आशिषः कामा यस्मात्॥ यतं नियतं चित्तं आत्मा च शरीरं यस्य॥ त्यक्ताः
सर्वपरिग्रहा येन सः॥ शारीरं शरीरमात्रनिर्वर्त्यं कर्तृत्वाभिनिवेशरहितं कर्म कुर्वन्नपि किल्बिषं बंधं
न प्राप्नोति॥ योगारूढपक्षे शरीरनिर्वाहमात्रोपयोगि स्वाभाविकं भिक्षाटनादि कुर्वन्नपि किल्बिषं विहि-

निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः॥ शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषं॥ २१॥
यदृच्छालाभसंतुष्टो द्वंद्वातीतो विमत्सरः॥ समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते॥ २२॥

ताकरणनिमित्तं दुःखं न प्राप्नोतीति॥ २१॥ किंच॥ यदृच्छेति॥ अप्रार्थितोपनतो लाभो यदृच्छालाभस्तेन तुष्टः॥ द्वंद्वा-
नि शीतोष्णादीनि अतीतः अतिक्रांतः॥ तत्सहनशील इत्यर्थः॥ विमत्सरो निर्वैरः॥ यदृच्छया लाभस्या-
पि सिद्धावसिद्धौ च समः॥ हर्षविषादरहितः॥ य एवंभूतः॥ स पूर्वोक्तरभूमिकयोर्यथायथं विहितं
स्वाभाविकं वा कर्म कृत्वापि न बंधं प्राप्नोति॥ २२॥ ॥ ४५

किंच॥ गतसंगस्येति॥ गतसंगस्य निःकामस्य रागादिभिर्मुक्तस्य ज्ञाने अवस्थितं चेतो यस्य यज्ञाय परमेश्व-
रार्थं कर्माचरतः सतः समग्रं सवासनं कर्म प्रविलीयते अकर्मभावमापद्यते॥ आरूढयोगपक्षे॥
यज्ञायेति॥ यज्ञसंरक्षणार्थं लोकसंरक्षणार्थं लोकसंग्रहार्थं च कर्म कुर्वत इत्यर्थः॥ २३॥ तदेवं परा-
मेश्वराराधनलक्षणं कर्मज्ञानहेतुत्वेन बंधकत्वाऽभावादकर्मैव॥ आरूढावस्थायां तु केवलात्मज्ञान-

गतसंगस्य मुक्तस्य ज्ञानावस्थितचेतसः॥ यज्ञायाचरतः कर्म समग्रं प्रविलीयते॥ २३॥

बाधितत्वात्स्वाभाविकमपि कर्माकर्मैवेति॥ कर्मण्यकर्म यः पश्येदित्यनेनोक्तः॥ कर्मप्रविलयः
प्रपंचितः॥ इदानीं कर्माणि तदंगेषु च ब्रह्मैवानुस्यूतं पश्यतः कर्मप्रविलयमाह॥ ब्रह्मार्पणमि-
ति॥ अर्प्यतेऽनेनेत्यर्पणं जुह्वादि तदपि ब्रह्मैव॥ अर्प्यमाणं हविः अपि घृतादिकं ब्रह्मैव ब्रह्मैवाऽग्नि- ४६
स्तस्मिन् ब्रह्मणा कर्त्रा हुतं होमः॥ अग्निश्च कर्ता च क्रिया च ब्रह्मैवेत्यर्थः॥ एवं ब्रह्मण्येव कर्मात्मि

के समाधिश्चित्तैकाग्र्यं यस्य तेन ब्रह्मैव गंतव्यं प्राप्यं न तु फलांतरमित्यर्थः ॥२४॥ एवमेव यज्ञेन
संपादितं सर्वत्र ब्रह्मदर्शनलक्षणं ज्ञानं सर्वयज्ञोपायप्राप्यत्वात्सर्वयज्ञेभ्यः श्रेष्ठमित्येवं स्तोतु-
मधिकारिभेदेन ज्ञानोपायभूतान्बहून्यज्ञानाह ॥ दैवमिति अष्टभिः ॥ देवा इंद्रवरुणादय इ-
ज्यंते यस्मिन् ॥ एवकारेणेंद्रादिषु ब्रह्मबुद्धिराहित्यं दर्शितं ॥ तदेवं यज्ञमपरे कर्मयोगिनः

ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतं ॥ ब्रह्मैव तेन गंतव्यं ब्रह्मकर्मसमाधिना ॥२४॥
दैवमेवापरे यज्ञं योगिनः पर्युपासते ॥ ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति ॥२५॥

पर्युपासते श्रद्धयानुतिष्ठंति ॥ अपरे तु ज्ञानयोगिनो ब्रह्मरूपेऽग्नौ यज्ञेनैवोपायभूतेन ब्र-
ह्मार्पणमित्युक्तप्रकारेण यज्ञमुपजुह्वति ॥ यज्ञादिसर्वकर्माणि प्रविलापयंतीत्यर्थः ॥
सोऽयं ज्ञानयज्ञः ॥ २५॥ ॥ ४६

श्रोत्रादीनीति ॥ अन्ये नैष्ठिकब्रह्मचारिणस्तादिंद्रियसंयमरूपेष्वग्निषु जुह्वति ॥ प्रविलापयंति ॥ इंद्रि-
याणि निरुध्य संयमप्रधानास्तिष्ठंतीत्यर्थः ॥ इंद्रियाण्येवाग्नयस्तेषु शब्दादीन्विषयानन्ये गृहस्था
जुह्वति विषयभोगसमयेऽप्यनासक्ताः संतोऽग्नित्वेन भावितेषु इंद्रियेषु हविष्ट्वेन भाविताञ्छब्दादी-
न्प्रक्षिपंतीत्यर्थः ॥२६॥ सर्वाणीति ॥ अपरे ध्याननिष्ठा बुद्धींद्रियाणां श्रोत्रादीनां कर्माणि श्र-

श्रोत्रादीनींद्रियाण्यन्ये संयमाग्निषु जुह्वति ॥ शब्दादीन्विषयानन्य इंद्रियाग्निषु जुह्वति ॥२६॥
सर्वाणींद्रियकर्माणि प्राणकर्माणि चापरे ॥ आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥२७॥

वणदर्शनादीनि ॥ कर्मेंद्रियाणां वाक्पाण्यादीनां कर्माणि वचनोपादानादीनि च प्राणानां दशानां क-
र्माणि ॥ प्राणस्य बहिर्गमनं ॥ अपानस्याधोनयनं व्यानस्य व्याप्येनेनं ॥ आकुंचनप्रसारणा-
दि समानस्याशितपीतानां सम्यकुन्नयनं ॥ उदानस्योर्ध्वनयनं ॥ उद्गारे नाग आख्यातः कूर्म-

उन्मीलने स्मृतः ॥ कृकरः क्षुत्करो ज्ञेयो देवदत्तो विजृंभणे ॥ न जहाति मृतं चापि सर्वव्यापी ध-
नंजयः ॥ इत्येवंरूपाणि जुह्वति ॥ कुत्रात्मनि संयमो ध्यानैकाग्र्यं स एव योगः स एवाग्निस्त-
स्मिन् ज्ञानेन ध्येयविषयेण दीपिते प्रज्वालिते ॥ ध्येयं सम्यक् ज्ञात्वा तस्मिन्मनः संयम्य तानि स-
र्वाणि कर्माण्युपरमयंतीत्यर्थः ॥ २७ ॥ किंच ॥ द्रव्येति ॥ द्रव्यदानमेव यज्ञो येषां ते द्रव्ययज्ञाः

द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे ॥ स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ॥ २८ ॥

कृच्छ्रचांद्रायणादि तप एव यज्ञो येषां ते तपोयज्ञाः ॥ योगश्चित्तवृत्तिनिरोधलक्षणः समाधिः
स एव यज्ञो येषां ते योगयज्ञाः सांध्यायेन वेदेन श्रवणमननादिना यत्तदर्थज्ञानं स एव यज्ञो ये-
षां ते ॥ स्वाध्यायवेदपाठयज्ञास्तदर्थज्ञानयज्ञाश्चेति द्विविधा यतयः प्रयत्नशीलाः सम्यक् निशि-
तानि तीक्ष्णीकृतानि व्रतानि येषां ते ॥ २८ ॥ ॥ ४७

किंच ॥ अपाने इति ॥ अपानेऽधोवृत्तौ प्राणमूर्ध्ववृत्तिं पूरकेण जुह्वति ॥ पूरककाले प्राणमपानेनैकीकुर्वंति तथा
कुंभकेन प्राणापानयोरूर्ध्वाधोगती रुद्ध्वा रेचककाले अपानं प्राणे जुह्वति ॥ एवं पूरककुंभकरेचकैः प्राणाया-
मपरायणा अपर इत्यर्थः ॥ २९ ॥ अपर इति ॥ अपरे त्वाहारसंकोचं यतः स्वयमेव जीर्यमाणेष्विंद्रियेषु तत्त-
दिंद्रियलयहोमं भावयंतीत्यर्थः ॥ यद्वा ॥ अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे इत्यनेन पूरकरेचकयोरावर्त्त-

अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे ॥ प्राणापानगती रुद्ध्वा प्राणायामपरायणाः ॥ २९ ॥ अपरे निय-
ताहाराः प्राणान्प्राणेषु जुह्वति ॥ सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ॥ ३० ॥ मानयोर्हंसः ॥ सोहमित्यनु-

लोमतः ॥ प्रतिलोमतश्चाभिव्यज्यमानेनाऽजपामंत्रेण तत्त्वंपदार्थैक्यं व्यतीहारेण भावयंतीत्यर्थः ॥ तदु-
क्तं योगशास्त्रे ॥ सकारेण बहिर्याति हकारेण विशेत्पुनः ॥ प्राणस्तत्र स एवाहं हंस इत्यनुचिंतयेदिति ॥ प्रा-
णापानगती रुद्ध्वेत्यनेन तु श्लोकेन प्राणायामयज्ञा अपरे कथ्यंते ॥ तत्रायमर्थः ॥ द्वौ भागौ पूरयेदन्नैस्तोयेनै

कं प्रपूरयेत् ॥ मारुतस्य प्रचारार्थं चतुर्थमवशेषयेदित्येवमादि च नीक्तो नियतस्त्वाहारो येषां ते ॥ कुंभके
न प्राणापानगती रुद्ध्वा प्राणायामपरायणाः संतः प्राणानिंद्रियाणि प्राणेषु जुह्वति ॥ कुंभके हि सर्वे
प्राणसमरणकीमवृत्ति इति तत्रैव लीयमानेष्विंद्रियेषु होमं भावतीत्यर्थः ॥ तदुक्तं योगशास्त्रे ॥ यथा यथा स
दाभ्यासान्मनसः स्थिरता भवेत् ॥ वायुवाक्कायदृष्टीनां स्थिरता च तथा तथेति ॥ तदेवमुक्तानां द्वादशानां

यज्ञशिष्टामृतभुजो यांति ब्रह्म सनातनं ॥ नायं लोकोस्त्ययज्ञस्य कुतोन्यः कुरुसत्तम ॥३१॥

यज्ञविदां फलमाह ॥ सर्व इति ॥ यज्ञान्विंदंति लभंते इति यज्ञविदः ॥ यज्ञज्ञा इति वा ॥ यज्ञैः क्षपितं नाशि
तं कल्मषं यैस्ते यज्ञान्कृत्वा अवशिष्टं काले अन्नमिषीकृतममृतरूपं भुंजत इति तथा ते सनातनं नित्यं
ब्रह्म ज्ञानद्वारेण प्राप्नुवंति ॥३०॥ तदकरणे दोषमाह ॥ नायं लोक इति ॥ अयमल्पसुखोपि मनुष्यलोकः
अयज्ञस्य यज्ञानुष्ठानशून्यस्य नास्ति कुतोन्यः परलोकः ॥ अतो यज्ञाः सर्वथा कर्तव्या इत्यर्थः ॥३१॥ ४८

ज्ञानयज्ञं स्तोतुमुक्तान्यज्ञानुपसंहरति ॥ एवमिति ॥ ब्रह्मणो वेदस्य मुखे वितता वेदेन साक्षाद्विहिता
इत्यर्थः ॥ तथापि तान्सर्वान् वाङ्मनःकायकर्मजनितान् ॥ आत्मस्वरूपसंस्पर्शरहितान् विद्धि जानीहि
आत्मनः कर्मागोचरत्वात् ॥ एवं ज्ञात्वा ज्ञाननिष्ठः सन्संसाराद्विमुक्तो भविष्यसि ॥३२॥ कर्मयज्ञाज्ज्ञानय

एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे ॥ कर्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे ॥३२॥
श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परंतप ॥ सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥३३॥
एवंद्विप्रणिपातेन परिप्रश्नेन सेवया ॥ उपदेक्ष्यंति ते ज्ञानं ज्ञानिनस्तत्वदर्शिनः ॥३४॥

ज्ञः श्रेष्ठ इत्याह ॥ श्रेयानिति ॥ द्रव्यमयाद्दनात्मव्यापारजन्याद्देवादियज्ञात् ज्ञानयज्ञः श्रेयान् श्रेष्ठः
यद्यपि ज्ञानस्यापि मनोव्यापाराधीनत्वमस्त्येव तथापि ॥ आत्मस्वरूपस्य ज्ञानस्य मनःपरिणामे अभि
भिव्यक्तिमात्रं न तु तत्कार्यत्वमिति द्रव्यमयाद्विशेषः ॥ श्रेष्ठत्वे हेतुः सर्वं कर्माखिलं कर्मफलसहितं ज्ञाने परि

समाप्यते । अंतर्भवतीत्यर्थः । सर्वं तदभिसमेति यत्किंचित्प्रजाः साधु कुर्वंतीति श्रुतेः ॥ ३३ ॥ एवंभूतात्मज्ञा
ने साधनमाह । तद्विद्धीति । तत् ज्ञानं विद्धि प्राप्नुहि । ज्ञानिनां प्रणिपातेन दंडवन्नमस्कारेण । ततः परिप्रश्नेन कुतो
यं मम संसारः । कथं वा निवर्त्तेतेति प्रश्नेन सेवया शुश्रूषया च ज्ञानिनः शास्त्रज्ञास्तत्त्वदर्शिनः । अपरोक्षानुभ
वसंपन्नाश्च ते तुभ्यं ज्ञानमुपदेशेन संपादयंति ॥ ३४ ॥ ज्ञानेफलमाह । यज्ज्ञात्वेति । सार्द्धैस्त्रिभिः । यज्ज्ञानं ज्ञात्वा प्रा

यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पांडव ॥ येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ॥ ३५ ॥
अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः ॥ सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि ॥ ३६ ॥ प्य पुनर्बंधु

वत्याशिनिमित्तं मोहं न प्राप्स्यसि ॥ तत्र हेतुः । येन ज्ञानेन भूतानि पितृपुत्रादीनि स्वाविद्याविरचितानि स्वात्म
न्येवाऽभेदेन द्रक्ष्यसि ॥ अथोनंतरं स्वात्मानमपि परमात्मन्यभेदेन द्रक्ष्यसीत्यर्थः ॥ ३५ ॥ किंच । सर्वेभ्यः
पापकारिभ्यः । यद्यप्यतिशयेन पापकारित्वमसि । तथापि सर्वं पापसमुद्रं ज्ञानपोतेनैव सम्यगनायासेन त
रिष्यसि ॥ ३६ ॥ ॥

४८

समुद्रवत्स्थितस्यैव पापस्यातिलंघनमात्रं तत्तु नाशइति ॥ भ्रांतिं दृष्टांतेन वारयन्नाह । यथैधां
सि काष्ठानि प्रदीप्तोऽग्निर्यथा भस्मीभावं नयति ॥ तथात्मज्ञानरूपोऽग्निः प्रारब्धकर्मव्यतिरिक्ता
नि सर्वाणि भस्मीकरोतीत्यर्थः ॥ ३७ ॥ तत्र हेतुमाह । नहीति । पवित्रं शुद्धिकरमिह तपोयोगा
दिषु मध्ये ज्ञानतुल्यं नास्त्येव ॥ तर्हि सर्वेप्यात्मज्ञानमेव किं नाभ्यसंतीत्यत आह ॥ तत्स्वयमिति

यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ॥ ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥ ३७
नहि ज्ञानेन सदृशं पवित्रमिह विद्यते ॥ तत्स्वयं योगसंसिद्धः कालेनात्मनि विंदति ॥
॥ ३८ ॥

सार्द्धेन तदात्मनि विषये ज्ञानं महता कर्मयोगेन संसिद्धो योग्यतां प्राप्तः सन् स्वयमेवा
नायासेन लभते न तु कर्मयोगं विनेत्यर्थः ॥ ३८ ॥ किंच । श्रद्धावानिति । गुरूपदिष्टेऽर्थे आस्ति
क्यबुद्धिमान् तत्परस्तदेकनिष्ठः । संयतेंद्रियश्च तज्ज्ञानं लभते नान्यः ॥ अतः श्रद्धादिसंपत्त्या

गीता॰स॰
५०

ज्ञानलाभात्प्राक्कर्मयोग एव शुद्ध्यर्थमनुष्ठेयः॥ ज्ञानलाभानंतरं तु न तस्य किंचित्कृत्यमस्तीत्या-
ह॥ ज्ञानं लब्ध्वा तु अचिरेण मोक्षं प्राप्नोति॥ मूलो ज्ञानाधिकारिणमुक्त्वा तद्विपरीतमधिका-
रिणमाह॥३९॥ अज्ञश्चेति॥ अज्ञो गुरूपदिष्टानभिज्ञः॥ कथंचिज्ज्ञाने ज्ञानेप्यश्रद्धान-

श्रद्धावाल्लभते ज्ञानं तत्परः संयतेंद्रियः॥ ज्ञानं लब्ध्वा परं शांतिमचिरेणाधिगच्छति॥
३९॥ अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति॥ नायं लोकोस्ति न परो न सुखं सं-
शयात्मनः॥४०॥

अजातायामपि श्रद्धायां ममेदं सिध्येन्न वेति संशयाक्रांतचित्त-
श्च नश्यति॥ स्वार्थाद्भ्रश्यति॥ एतेषु त्रिष्वपि संशयात्मा सर्वथा नश्यति॥ यतस्तस्यायं लोको
नास्ति॥ धनार्जनविवाहाद्यसिद्धेर्न च परलोकः॥ धर्मस्यानिष्पत्तेर्न च सुखं संशयेनैव भोग-
स्याप्यसंभवात्॥४०॥ ॥ ५०

अध्यायार्थद्वयोक्तां पूर्वापरभूमिकाभेदेन कर्मज्ञानमयीं द्विविधां ब्रह्मनिष्ठामुपसंहरति॥ योगेति द्वा-
भ्यां॥ योगेन परमेश्वराराधनरूपेण तस्मिन्संन्यस्तानि समर्पितानि कर्माणि येन तं कर्माणि स्वफ-
लैर्न निबध्नंति॥ आत्मज्ञानेनाऽकर्त्रात्मनो बोधेन संछिन्नः संशयो देहाद्यभिमानलक्षणो यस्य तं।
आत्मवंतमप्रमादिनं कर्माणि लोकसंग्रहार्थानि स्वाभाविकानि वा न निबध्नंति॥४१॥ यस्मादेवं त-

योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयं॥ आत्मवंतं न कर्माणि निबध्नंति धनंजय॥४१॥
तस्मादज्ञानसंभूतं हृत्स्थं ज्ञानासिनात्मनः॥ छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत॥४२॥

स्मादिति॥ आत्मनोऽज्ञानेन संभूतं हृदि स्थितमेनं संशयं शोकादिनिमित्तं देहात्मविवेकज्ञानखड्गेना-
छित्वा कर्मयोगमाश्रय॥ तत्र च प्रथमं प्रस्तुताय युद्धायोत्तिष्ठ हे भारतेति॥ ज्ञानप्रियत्वेन युद्धस्य धर्मत्वं
दर्शितं॥४२॥ मननस्याविभेदेन कर्मज्ञानमयी द्विधा॥ निष्ठोक्ता येन तं वंदे तं शौरिं संशयच्छिदं॥१॥

गीता॰ स॰
५१ इति श्रीभगवद्गीतायां सुबोधिन्यां टीकायां श्रीधरस्वामिविरचितायां नाम चतुर्थोऽध्यायः ॥ ४ ॥ अज्ञानसंभूतसंशयं ज्ञानासिना छित्वा कर्मयोगमातिष्ठेत्युक्तं तत्र पूर्वापरविरोधं मन्वानोऽर्जुन उवाच ॥ संन्यासमिति ॥ यस्त्वात्मरतिरेव स्यादित्यादिना सर्वं कर्माखिलं पार्थेत्यादिना च ज्ञानिनः

इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे ब्रह्मार्पणयोगो नाम चतुर्थोऽध्यायः ॥ ४ ॥ अर्जुन उवाच ॥ संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि ॥ यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितं ॥ १ ॥

कर्मसंन्यासं कथयसि ॥ ज्ञानासिना संशयं छित्वा योगमातिष्ठेति पुनर्योगं कथयसि न च कर्मसंन्यासः कर्मयोगश्चैकस्यैकदैव संभवतः ॥ विरुद्धस्वरूपात् तस्मादेतयोर्मध्ये एकस्मिन्ननुष्ठातव्ये सति ॥ मम श्रेष्ठं सुनिश्चितं तदेकं ब्रूहि ॥ १ ॥ ५१

अत्रोत्तरं ॥ श्रीभगवानुवाच ॥ संन्यास इति ॥ अयं भावः ॥ नहि वेदान्तवेद्यात्मतत्त्वविदं प्रति कर्मयोगमहं ब्रवीमि यतः पूर्वोक्तेन संन्यासेन विरोधः स्यात् ॥ अपि तु देहात्माभिमानिनं त्वां बंधुवधादिनिमित्तशोकमोहादिकृतमेतं संशयं देहात्मविवेकज्ञानासिना छित्वा परमात्मज्ञानोपायभूतं कर्मयोगमातिष्ठेति ब्रवीमि कर्मयोगेन शुद्धचित्तस्य चात्मतत्त्वज्ञाने जाते सति तत्परिपाकार्थं ज्ञाननिष्ठांगत्वेन संन्यासः पूर्वमुक्तः

श्रीभगवानुवाच ॥ संन्यासः कर्मयोगश्च निश्रेयसकरावुभौ ॥ तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते ॥ २ ॥

एवं च सत्यंगप्रधानयोर्विकल्पायोगात्संन्यासः कर्मयोगश्चेत्येतावुभावपि भूमिकाभेदेन समुच्चितावेव निःश्रेयसं साधयतः तथापि तयोर्मध्ये कर्मसंन्यासात्सकाशात्कर्मयोगो विशिष्टो भवतीति ॥ २ ॥ कुत इत्यपेक्षायां संन्यासित्वेन कर्मयोगिनं स्तुवन् तस्य श्रेष्ठत्वं दर्शयति ॥ ज्ञेय इति ॥ रागद्वेषादिराहित्येन परमेश्वरार्थं कर्माणि योऽनुतिष्ठति स नित्यं कर्मानुष्ठानकालेऽपि संन्यासीत्येवं ज्ञेयः ॥ तत्र हेतुः निर्द्वंद्वो रागद्वेषादि

द्वंद्वश्शून्यो हि शुद्धचित्तो ज्ञानद्वारा सुखमनायासेन संसारात्प्रमुच्यते ॥ ३ ॥ यस्मादेवमंगप्रधानत्वेनोभ-
योरवस्थाभेदेन क्रमसमुच्चयः । अतो विकल्पमंगीकृत्योभयोरेकः श्रेष्ठ इति प्रश्नो ज्ञानिनामेवोचितो
न विवेकिनामित्याह । सांख्ययोगादिति सांख्यशब्देन ज्ञाननिष्ठावाचिना तदंगं संन्यासं लक्षयति । संन्यास-
कर्मयोगावेकफलौ संतौ पृथक्स्वतंत्राविति बालाः अज्ञा एव वदंति न तु पंडिताः । तत्र हेतुः । अनयोरेकमपि

सों ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न कांक्षति ॥ निर्द्वंद्वो हि महाबाहो सुखं बंधात्प्रमुच्यते ॥ ३ ॥
सांख्ययोगौ पृथग्बालाः प्रवदंति न पंडिताः ॥ एकमप्यास्थितः सम्यगुभयोर्विंदते फलं ॥ ४ ॥

सम्यगास्थितः आस्थितः सन्नुभयोरपि फलं प्राप्नोति । तथाहि । कर्मयोगं सम्यगनुतिष्ठन् शुद्धचित्तः सन्
ज्ञानद्वारोभयोः फलं कैवल्यं विंदति । संन्यासं सम्यगास्थितोपि पूर्वमनुष्ठितस्य कर्मयोगस्यापि परं-
परया ज्ञानद्वारा यदुभयोः फलं कैवल्यं विंदतीति न पृथक्फलत्वमनयोरित्यर्थः ॥ तदेव स्फुटयति ॥ ४ ५२

यत्सांख्यैरिति । सांख्यैर्ज्ञाननिष्ठैः संन्यासिभिर्यत्स्थानं मोक्षाख्यं प्रकर्षेण साक्षादवाप्यते यो-
गैरित्यत्र अर्शआदित्वेन मत्वर्थीयो अच्प्रत्ययो द्रष्टव्यः कर्मयोगिभिरपि तदेव ज्ञानद्वारेणागम्यते अ-
वाप्यत इत्यर्थः । अतः सांख्यं च योगं च एकफलत्वेन एकं यः पश्यति स सम्यक्पश्यति ॥ ५ ॥ य-
दि कर्मयोगिनोप्यंततः संन्यासेनैव ज्ञाननिष्ठा तर्हि आदित एव संन्यासः कर्तुं युक्त इति मन्वानं प्रत्या-

यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ॥ एकं सांख्यं च योगं च यः पश्यति स पश्यति ॥ ५ ॥
संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः ॥ योगयुक्तो मुनिर्ब्रह्म न चिरेणाधिगच्छति ॥ ६ ॥

ह । संन्यास इति । अयोगतः कर्मयोगं विना संन्यासः प्राप्तुं दुःखं दुःखहेतुः अशक्य इत्यर्थः ।
चित्तशुद्ध्यभावेन ज्ञाननिष्ठाया असंभवात् योगयुक्तस्तु शुद्धचित्ततया मुनिः संन्यासी भूत्वा चिरेणै-
व ब्रह्माधिगच्छति । अपरोक्षं जानाति । अत्र चाचिरेण शुद्धेः प्राक् कर्मयोग एवं संन्यासाद्विशिष्यते

गीता०स०
५३

इतिपूर्वोक्तंसिद्धं॥ ननुकंवार्त्तिककृद्भिः॥ प्रमादिनोबहिश्चित्ताःपिशुनाःकलहोत्सुकाः॥ सं-
न्यासिनोपिदृश्यंतेदैवसंदूषिताशयाइति॥ ६॥ कर्मयोगादिक्रमेणब्रह्माधिगमेसत्यपितदु-
परितेनेनकर्मणाबंधःस्यादेवेत्याशंक्याह॥ योगयुक्तइति॥ योगेनयुक्तोऽतोविशुद्धः॥ आ-

योगयुक्तोविशुद्धात्माविजितात्माजितेंद्रियः॥ सर्वभूतात्मभूतात्माकुर्-
वन्नपिनलिप्यते॥ ७॥ ॥

त्मामनोयस्यअतएवविजितआत्माशरीरंयेन॥ अतएवविजितानींद्रियाणियेनतत-
श्चसर्वेषांभूतानामात्मभूतआत्मायस्यसः॥ लोकसंग्रहार्थंस्वाभाविकंवाकर्मकुर्व- ५३
न्नपिनलिप्यतेनैवबंध्यते॥ ७॥ ॥

कर्मकुर्वन्नपिनलिप्यतइतिएतद्विरुद्धमित्याशंक्यकर्तृत्वाभिमानाभावान्नविरुद्धमित्याह॥
नैवेति॥ द्वाभ्यां॥ कर्मयोगेनयुक्तःक्रमेणतत्त्वविद्भूत्वादर्शनश्रवणादीन्कुर्वन्नपिइंद्रियाणींद्रि-
यार्थेषुप्रवर्त्तंतइतिधारयन्॥ बुद्ध्यानिश्चित्यकिंचिदपिअहंनकरोमीतिमन्यते॥ तत्रदर्शनश्रवणस्प-
र्शनाघ्राणाऽशनानिचक्षुरादिज्ञानेंद्रियव्यापाराः॥ गतिःपादयोःस्वापोबुद्धेःश्वसः॥ प्राणस्यप्रलपनं

नैवकिंचित्करोमीतियुक्तोमन्येततत्त्ववित्॥ पश्यन्शृण्वन्स्पृशन्जिघ्रन्नश्नन्गच्छन्स्वपन्श्वस-
न्॥ ८॥ प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि॥ इंद्रियाणींद्रियार्थेषुवर्त्तंतइतिधारयन्॥ ९॥

वागिंद्रियस्यविसर्गःपायूपस्थयोर्ग्रहणंहस्तयोः॥ उन्मेषणनिमेषणेकूर्माख्यप्राणस्येतिविवेकः॥ एतानिक-
र्माणिकुर्वन्नप्यभिमानाऽभावात्ब्रह्मविन्नलिप्यते॥ तथाचपरिमर्षसूत्रं॥ तदधिगमउत्तरपूर्वाघयोरश्ले-
षविनाशौतद्व्यपदेशादिति॥ ८॥ नहियस्यकरोमीत्यभिमानोऽस्तितस्यकर्मलेपोदुर्वारः॥ अविशुद्धचित्तत्वाच्च॥ ९॥

संन्यासोपि नास्तीति महत्संकटमापन्नमित्याशंक्याह ॥ ब्रह्मणीति ॥ ब्रह्मण्याधाय परमेश्वरे
समर्प्य तत्फले संगं त्यक्त्वा यः कर्माणि करोति ॥ असौ पापेन बंधहेतुतया पापिष्ठेन पुण्यपा-
पात्मकेन कर्म्मणा न लिप्यते ॥ यथा पद्मपत्रमंभसि स्थितमप्यंभसा न लिप्यते तद्वत् ॥१०॥

ब्रह्मण्याधाय कर्माणि संगं त्यक्त्वा करोति यः ॥ लिप्यते न स पापेन पद्मपत्रमिवांभ-
सा ॥१०॥ कायेन मनसा बुद्ध्या केवलैरिंद्रियैरपि ॥ योगिनः कर्म कुर्वंति संगं-
त्यक्त्वात्मशुद्धये ॥११॥ ॥ ॥

बंधकत्वाभावमुक्त्वा मोक्षहेतुत्वं सदाचारेण दर्शयति ॥ कायेनेति ॥ कायेन स्नानादि ॥ मनसा ध्या-
नादि ॥ बुद्ध्या तत्वनिश्चयादि ॥ केवलैः कर्माभिनिवेशरहितैरिंद्रियैः श्रवणकीर्तनादिलक्ष-
णं कर्मफलं संगं त्यक्त्वा चित्तशुद्धये कर्मयोगिनः कर्म कुर्वंति ॥११॥

ननु ते नैव कर्माणि कश्चिन्मुच्यते ॥ कश्चिद्बध्यत इति व्यवस्था कथमत आह ॥ युक्त इति ॥ युक्तः परमेश्वरैक-
निष्ठः सन् कर्म्मणां फलं त्यक्त्वा कर्माणि कुर्वन्नात्यंतिकीं शांतिं मोक्षं प्राप्नोति ॥ अयुक्तस्तु बहिर्मुखः कामका-
रेण कामतः प्रवृत्त्या फले आसक्तो नितरां बंधं प्राप्नोति ॥१२॥ एवं तावच्चित्तशुद्धिशून्यस्य संन्यासात्कर्मयोगो वि-
शिष्यते इत्येतत्प्रपंचितं ॥ इदानीं शुद्धचित्तस्य संन्यासः श्रेष्ठ इत्याह ॥ सर्वकर्माणीति ॥ वशीयतचित्तः सर्वा-

युक्तः कर्मफलं त्यक्त्वा शांतिमाप्नोति नैष्ठिकीं ॥ अयुक्तः कामकारेण फले सक्तो निबध्यते ॥१२॥
सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी ॥ नवद्वारे पुरे देही नैव कुर्वन्न कारयन् ॥१३॥

णि कर्माणि विक्षेपकाणि मनसा विवेकयुक्तेन ॥ संन्यस्य सुखं यथा भवत्येवं ज्ञाननिष्ठः सन्नास्ते ॥ क्वास्त
इत्याह ॥ नवद्वारे नेत्रे नासिके कर्णौ मुखं चेति सप्त शिरोगतानि ॥ अधो द्वे पायूपस्थरूपे ॥ इत्येवं नवद्वारा-
णि यस्मिंस्तस्मिन् पुरे पुरवदहंभावशून्ये देहे देही अवतिष्ठति ॥ अहंकाराभावादेव स्वयं तेन देहेन नैव-

कुर्वन्ममकाराभावाच्च न कारयन्निति ॥ अविशुद्धचित्ताद्याद्यवृत्तिरुक्ता अशुद्धचित्तो हि न्यस्य पुनः क
रोमि कारयामि च न त्वयं तथा अतः सुसमास्त इत्यर्थः ॥ १३ ॥ ननु एष एव साधु कर्म कारयति ॥ तं यमेभ्यो लोके
भ्य उन्निनीषते ॥ एष एवासाधु कर्म कारयति ॥ तं यमेभ्यो लोकेभ्योऽधो निनीषत इत्यादि श्रुतेः ॥
परमेश्वरेणैव शुभाशुभफलेषु कर्मकर्तृत्वेन प्रयुज्यमानोऽस्वतंत्रः पुरुषः ॥ कथं तानि कर्माणि त्यजे

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः ॥ न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥ १४ ॥

दीश्वरेणैव ज्ञानमार्गे प्रयुज्यमानस्य हानिरिति चेत् ॥ एवं सति वैषम्यनैर्घृण्याभ्यां प्रयोजककर्तृत्वा
दीश्वरस्यापि पुण्यपापसंबंधः स्यादित्याशंक्याह ॥ न कर्तृत्वमिति ॥ द्वाभ्यां ॥ प्रभुरीश्वरो जीवलोकस्य क
र्तृत्वादिकं न सृजति ॥ किंतु ॥ जीवस्यैव स्वभावोऽविद्यैव कर्तृत्वादिरूपेण प्रवर्तते ॥ अनाद्यविद्याका
मवशात्प्रवृत्तिस्वभावं जीवलोकमीश्वरः कर्मसु नियुंक्ते न तु स्वयमेव कर्तृत्वादिकमुत्पादयतीत्यर्थः ॥ १४ ॥ ५५

यस्मादेवं तस्मान्नादत्त इति ॥ प्रयोजकोऽपि सन्प्रभुः कस्यचित्पापं सुकृतं चैवादत्ते न भजते ॥ न च हेतुः ॥
विभुः पूर्णः ॥ आप्तकाम इत्यर्थः ॥ यदि हि स्वार्थकामनया कारयेत्तर्हि तथा स्यात् ॥ न त्वेतदस्ति ॥
आप्तकामस्यैवाचिंत्यनिजमायया तत्पूर्वकर्मानुसारेण प्रवर्तकत्वात् ॥ ननु भक्ताननुगृह्णतोऽभक्तान्निगृह्ण
तश्च वैषम्योपलंभात् ॥ कथमाप्तकामत्वमित्यत आह ॥ अज्ञानेनेति निग्रहोऽपि दंडरूपोऽनुग्रह एवेत्येवम्

नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः ॥ अज्ञानेनावृतं ज्ञानं तेन मुह्यंति जंतवः ॥ १५ ॥
ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ॥ तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परं ॥ १६ ॥

ज्ञानेन सर्वत्र समः परमेश्वर इत्येवंभूतं ज्ञानं आवृतं तेन हेतुना जंतवो जीवा मुह्यंति भगवति वैष
म्यं मन्यंत इत्यर्थः ॥ १५ ॥ ज्ञानिनस्तु न मुह्यंतीत्याह ॥ ज्ञानेनेति ॥ आत्मनो भगवतो ज्ञानेन येषां तद्वैष
ना म्योपलंभकमज्ञानं नाशितं तत्त्वज्ञानं तेषामज्ञानं प्रकाशयित्वा तत्परं परिपूर्णमीश्वरस्वरूपं प्रकाशः ॥

यति॥ यथा आदित्यस्तमो निरस्य समस्तं वस्तुजातं प्रकाशयति तद्वत्॥१६॥ एवंभूतस्यापरोक्षज्ञा
नाफलमाह॥ तद्बुद्धय इति॥ तस्मिन्नेव बुद्धिर्निश्चयात्मिका येषां तस्मिन्नेवात्मा मनो येषां तस्मिन्नेव
निष्ठा तात्पर्यं येषां तदेव परमयनमाश्रयो येषां ते अत एव तत्प्रसादलब्धेनात्मज्ञानेन निर्धूतं निरस्तं

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः॥ गच्छंत्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः॥१७॥
विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि॥ शुनि चैव श्वपाके च पंडिताः समदर्शिनः॥१८॥

कल्मषं येषां ते॥ अपुनरावृत्तिं मुक्तिं यांति॥१७॥ कीदृशास्ते ज्ञानिनो ये अपुनरावृत्तिं गच्छंतीत्य
पेक्षायामाह॥ विद्याविनयसंपन्न इति॥ विषमेष्वपि समं ब्रह्मैव द्रष्टुं शीलं येषां ते पंडिता ज्ञानिन इ
त्यर्थः॥ तत्र विद्याविनयाभ्यां युक्ते ब्राह्मणे च श्वनीयः पचति तस्मिंश्चेति कर्मणा वैषम्यं गवि ह
स्तिनि शुनि चेति जातितो वैषम्यं दर्शितं॥१८॥ ॥

ननु विषयेषु समदर्शनं निषिद्धं कुर्वतः कथं ते पंडिताः॥ यथाह गौतमः॥ समासमाभ्यां विषमस
मे पूज्यत इति॥ अस्यार्थः॥ समाय पूजया विषमे प्रकारेण कृते सति विषमाय च समे प्रकारेण कृते स
ति स पूजक इह च लोकात् परलोकाच्च हीयत इति तत्राह॥ इहैवेति॥ इहैव जीवद्भिरेव तैः॥ सृज्य
त इति सर्गः॥ संसारो जितो निरस्तः कैः येषां मनः साम्ये समत्वे स्थितं॥ तत्र हेतुः॥ हि यस्मात् ब्रह्म

इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः॥ निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः॥
॥१९॥

समं निर्दोषं च तस्मात्ते समदर्शिनो ब्रह्मण्येव स्थिता ब्रह्मभावं प्राप्ता इत्यर्थः॥ गौतमो
क्तदोषो ब्रह्मभावप्राप्तेः पूर्वमेव पूज्यत इति पूजावस्थाश्रवणात्॥१९॥ ब्रह्मप्राप्तस्य लक्ष
णमाह॥ नेति॥ यो ब्रह्मविद्भूत्वा ब्रह्मण्येव स्थितः सः प्रियं प्राप्य न प्रहृष्यति॥ अप्रियं प्राप्य
च नोद्विजेत् न विषीदेदित्यर्थः॥ यतः स्थिरः बुद्धिः स्थिरा निश्चला बुद्धिर्यस्य तत् कुतः॥ यतोऽसं

मूढो निवृत्तमोहः ॥ २० ॥ मोहनिवृत्त्या बुद्धिस्थैर्ये हेतुमाह ॥ बाह्यस्पर्शेष्विति ॥ इंद्रियैः स्प
र्श्यंत इति स्पर्शाः ॥ बाह्येंद्रियविषयेषु असक्तात्मा ऽनासक्तचित्तः आत्मन्यंतःकरणे यत् ॥
उपशमात्मकं सुखं तत् विंदति लभते स च पश्चात्तमं सुखं लब्ध्वा ब्रह्मणि योगेन समाधिना युक्त

न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत् प्राप्य चाप्रियं ॥ स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः ॥ २० ॥
बाह्यस्पर्शेष्वसक्तात्मा विंदत्यात्मनि यत्सुखं ॥ स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते ॥ २१ ॥
ये हि संस्पर्शजा भोगा दुःखयोनय एव ते ॥ आद्यंतवंतः कौंतेय न तेषु रमते बुधः ॥ २२ ॥

स्तदैक्यं प्राप्तः आत्मा यस्य सः अक्षयं सुखमश्नुते प्राप्नोतीति ॥ २१ ॥ ननु प्रियविषयभोगानामपि निवृत्तेः
कथं मोक्षः पुरुषार्थः स्यात्तत्राह ये हीति ॥ संस्पृश्यंत इति संस्पर्शा विषयास्तेभ्यो जायंत इति ये भोगाः सुखानि
ते हि वर्त्तमानकालेपि स्पर्द्धासूयादिव्याप्तत्वात् दुःखस्यैव योनयः कारणभूताः आदिवंतो ऽन्तवंतश्च अतो ५७
विवेकी तेषु न रमते ॥ २२ ॥ ॥

तस्मात् मोक्ष एव परमपुरुषार्थः ॥ तस्य च कामक्रोधवेगो ऽतिप्रतिपक्षः अतस्तत्सहनसमर्थ एव मो
क्षभागीत्याह ॥ शक्नोतीति ॥ कामक्रोधाभ्यामुद्भवतीति यो वेगो मनोनेत्रादिक्षोभादिलक्षणस्तमिहैव
तदुद्भवसमय एव यो नरः सोढुं प्रतिरोद्धुं शक्नोति ॥ तदपि न क्षणमात्रं ॥ किंतु ॥ शरीरविमोक्षणात्
प्राक् यावद्देहपातमित्यर्थः ॥ य एवंभूतः ॥ स एव युक्तः स समाहितः सुखी भवति नान्यः ॥ यद्वा

शक्नोतीहैव यः सोढुं प्राक्शरीरविमोक्षणात् ॥ कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ॥ २३ ॥
योंतःसुखोंतरारामस्तथांतर्ज्योतिरेव यः ॥ स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोधिगच्छति ॥ २४ ॥

मरणानंतरं विलपंतीभिर्युवतिभिरालिंग्यमानोपि पुत्रादिभिर्दह्यमानोपि यथा प्राणशून्यः काम
क्रोधवेगं सहते तथा मरणात्प्रागपि जीवन्नेव सहते यः ॥ स एव युक्तः सुखी चेत्यर्थः ॥ तदुक्तं वसिष्ठेन यु
प्राणे गते यथा देहः सुखं दुःखं न विंदति ॥ तथा चेत्प्राणयुक्तोपि स कैवल्याश्रयो भवेदिति ॥ २३ ॥ नके

वलं कामक्रोधसंहरणमात्रेण मोक्षं प्राप्नोति अपितु ॥ योन्तरिति ॥ अंतः आत्मन्येव सुखं यस्य न
विषयेषु अन्तरेवारामः क्रीडा यस्य न बहिः ॥ अंतरे ज्योतिः ॥ दृष्टिर्यस्य न गीतनृत्यादिषु ॥ स एव
ब्रह्मभूतः स्थितः सन् ब्रह्मणि निर्वाणं लयं अधिगच्छति प्राप्नोति ॥ २४ ॥ किंच ॥ लभंत इति ॥ ऋषयः

लभंते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः ॥ छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः ॥ २५ ॥
कामक्रोधवियुक्तानां यतीनां यतचेतसां ॥ अभितो ब्रह्मनिर्वाणं वर्त्तते विदितात्मनाम् ॥ २६ ॥

सम्यग्दर्शिनः ॥ क्षीणं कल्मषं येषां छिन्नं द्वैधं संशयो येषां यतः ॥ संयत आत्मा चित्तं येषां सर्वेषां
भूतानां हिते रताः ॥ कृपालवस्ते ब्रह्मनिर्वाणं मोक्षं लभंते ॥ २५ ॥ किंच ॥ कामक्रोधवियुक्ता
नामिति ॥ कामक्रोधाभ्यां वियुक्तानां यतीनां संन्यासिनां संयतचित्तानां ज्ञातात्मतत्वानां अभितो
उभयतः ॥ मृतानां जीवतां च न देहान्तर एव तेषां ब्रह्मणि लयः अपितु जीवतामपि वर्त्तत इत्यर्थः ॥ २६ ॥

स योगी ब्रह्मनिर्वाणमित्यादिषु योगी मोक्षमाप्नोतीत्युक्तं तमेव योगं संक्षेपेणादर्शयन्नाह ॥ स्प
र्शानिति ॥ द्वाभ्यां ॥ बाह्या एव बहिःस्पर्शाः शब्दादयो विषया अंतश्चिंतिताः सन्तोऽन्तः प्रविशंति ॥ तांस्तच्चिं
तात्यागेन बहिरेव कृत्वा चक्षुश्च भ्रुवोरंतरे भ्रूमध्य एव कृत्वा अत्यन्तं नेत्रयोर्निमीलने हि निद्रया मनो ली
यते ॥ उन्मीलनेन बहिः प्रसरति ॥ तदुभयदोषपरिहारार्थमर्द्धनिमीलनेन भ्रूमध्ये दृष्टिं निधायेत्यर्थः

स्पर्शान्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवांतरे भ्रुवोः ॥ प्राणापानौ समौ कृत्वा नासाभ्यंतरचारिणौ ॥ २७ ॥
यतेंद्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः ॥ विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः ॥ २८ ॥

उच्छ्वासनिश्वासरूपेण नासिकयोरभ्यन्तरे चरन्तौ प्राणापानावूर्ध्वाधोगतिनिरोधेन समौ कृत्वा कुं
भयित्वेत्यर्थः ॥ यद्वा ॥ प्राणो यथा बहिर्न निर्याति यथा वापानोऽन्तर्न प्रविशति ॥ किंतु नासामध्य एव
द्वावपि यथा चरतः ॥ तथा मंदाभ्यामुच्छ्वासनिश्वासाभ्यां समौ कृत्वेति ॥ अनेनोपायेन यताः संयता इं

न्द्रियमनोबुद्धयो यस्य मोक्ष एव परमयनं प्राप्यं यस्य स तः ॥ एवं विगतेच्छाभयक्रोधो यस्य सः
य एवंभूतो मुनिः सदा जीवन्नपि मुक्त एवेत्यर्थः ॥ २७ ॥ नन्वेवमिंद्रियादिसंयममात्रेण कथं मुक्तः
स्यात् ॥ न तावन्मात्रेण ॥ किं तु ज्ञानद्वारेणेत्याह ॥ २८ ॥ भोक्तारमिति ॥ यज्ञानां च तपसां च स्व

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरं ॥ सुहृदं सर्वभूतानां ज्ञात्वा मां शांतिमृच्छति ॥ २९ ॥ इति
श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे पंचमोऽध्यायः ॥ ५ ॥

भक्तैः समर्पितानां तदिच्छया भोक्तारं पालकमिति वा सर्वेषां लोकानां महान्तमीश्वरं सर्वे
षां भूतानां सुहृदं अंतर्यामिणं मां ज्ञात्वा मत्प्रसादेन शान्तिं मोक्षं ऋच्छति प्राप्नोति ॥ २९ ॥ विक
ल्पशंकापोहेयेन नैवं योगसांख्ययोः ॥ समुच्चयो कर्मणोक्तः सर्वज्ञं नौमि तं हरिं ॥ १ ॥ इति
श्रीसुबोधिन्यां टीकायां श्रीधरस्वामिविरचितायां नाम पंचमोऽध्यायः ॥ ५ ॥ ॥ ५९

चित्तस्य शुद्धेपि न ध्यानं विना संन्यासमात्रतः ॥ मुक्तिः स्यादिति षष्ठेस्मिन्ध्यानयोगो वितन्यते ॥ १ ॥ पूर्वाध्या
याते संक्षेपेनोक्तं योगं प्रपंचयितुं षष्ठाध्यायारंभः तत्र तावत्सर्वकर्माणि मनसा संन्यस्येत्यारभ्य संन्या
सपूर्विकायाः ज्ञाननिष्ठायाः तात्पर्येणाभिधानात् दुःखरूपत्वाच्च कर्मणः सहसा संन्यासातिप्रसंगं प्राप्तं वा
रयितुं संन्यासादपि श्रेष्ठत्वेन कर्मयोगं स्तौति ॥ श्रीभगवानुवाच ॥ अनाश्रित इति ॥ द्वाभ्यां ॥ कर्मफलम

श्रीभगवानुवाच ॥ अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ॥ स संन्यासी च योगी च न निरग्नि
र्न चाक्रियः ॥ १ ॥ यं संन्यासमिति प्राहुर्योगं तं विद्धि पांडव ॥ न ह्यसंन्यस्तसंकल्पो योगी भवति कश्चन ॥ २ ॥

नाश्रितोऽनपेक्षमाणोऽवश्यं कर्तव्यतया विहितं कर्म यः करोति स एव संन्यासी योगी च न निरग्निः अ
ग्निसाध्येष्टरूपकर्मत्यागी न चाक्रियः ॥ १ ॥ अनग्निसाध्यापूर्तरूपकर्मत्यागी च कुतः तदपेक्षया कर्म
योगस्यैव संन्यासत्वं संपादयन्नाह ॥ यमिति ॥ यं संन्यासमिति प्राहुः प्रकर्षेण श्रेष्ठत्वेनाहुः श्रुतिस्म

वादात् योगं कर्मानुष्ठानलक्षणं तं परमार्थं संन्यासं विद्धि विजानीहि ॥ हे पांडव ॥ २ ॥ तर्हि यावज्जीवं क
र्मयोग एव प्राप्त इत्याशंक्य तस्यावधिमाह ॥ आरुरुक्षोरिति ॥ ज्ञानयोगमारोढुं प्राप्तुमिच्छोः पुंसः
तदारोहे कारणं कर्मोच्यते चित्तशुद्धिकरत्वात् ॥ ज्ञानयोगमारूढस्य तु तस्यैव ध्याननिष्ठस्य शमः

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ॥ योगारूढस्य तस्यैव शमः कारणमुच्यते ॥ ३ ॥
यदा हि नेंद्रियार्थेषु न कर्मस्वनुषज्जते ॥ सर्वसंकल्पसंन्यासी योगारूढस्तदोच्यते ॥ ४ ॥

समाधिविक्षेपकर्मोपरमो ज्ञानपरिपाके कारणमुच्यते ॥ कीदृशोऽसौ योगारूढो यस्य शमः
कारणमुच्यते ॥ ३ ॥ इत्यत्राह ॥ यदेति ॥ इंद्रियभोग्येषु शब्दादिषु तत्साधनेषु च कर्मसु
यदा नानुषज्जते आसक्तिं न करोति तत्र हेतुः ॥ आसक्तिमूलभूतान् सर्वान् भोगविषयान् कर्मवि
षयांश्च संकल्पान् संन्यसितुं त्यक्तुं शीलं यस्य स तदा योगारूढ उच्यते ॥ ४ ॥ ॥ ६०

अतो विषयासक्तित्यागे मोक्षं तदासक्तौ च बंधं पर्यालोच्य रागादिस्वभावं त्यजेदित्याह ॥ उद्धरेदिति ॥ आत्मना
विवेकयुक्तेन आत्मानं संसारादुद्धरेत् न तु अवसादयेत् अधो न नयेत् हि यस्मात् ॥ आत्मैव मनः संगादुपरतः आत्मनः
स्वस्य बंधुरुपकारकः ॥ रिपुरपकारकश्च ॥ ५ ॥ कथंभूतस्यात्मैव बंधुः कथंभूतस्य चात्मैव रिपुरित्यपेक्षायामाह ॥ बंधु

उद्धरेदात्मनात्मानं नात्मानमवसादयेत् ॥ आत्मैव ह्यात्मनो बंधुरात्मैव रिपुरात्मनः ॥ ५ ॥
बंधुरात्मात्मनस्तस्य येनात्मैवात्मना जितः ॥ अनात्मनस्तु शत्रुत्वे वर्त्तेतात्मैव शत्रुवत् ॥ ६ ॥
जितात्मनः प्रशांतस्य परमात्मा समाहितः ॥ शीतोष्णसुखदुःखेषु तथा मानापमानयोः ॥ ७ ॥

रिति ॥ येनात्मनैवात्मा कार्यकारणसंघातरूपो जितो वशीकृतस्तस्य तथाभूतस्य तथात्मनः स आत्मैव बंधुः ॥
अनात्मनो जितात्मनस्त्वत एवात्मनः शत्रुत्वे शत्रुवदपकारकत्वेन वर्त्तेत ॥ ६ ॥ जितात्मनः स्वस्मिन् बंधुत्वं स्फुटयति
जितात्मन इति ॥ जितश्चात्मा येन तस्य प्रशांतस्य रागादिरहितस्यैव परं केवलमात्मा शीतोष्णादिषु सत्स्वपि समाहितः

स्वात्मनिष्ठोभवतिनान्यस्ययद्वा॥तस्यहृदिपरमात्मासमाहितःस्थितोभवति॥७॥योगारूढस्यलक्षणंश्रेष्ठ्यंचो
क्तमुपसंहरति॥ज्ञानविज्ञानतृप्तात्मेति॥ज्ञानमौपदेशिकंविज्ञानमपरोक्षानुभवः॥ताभ्यांतृप्तोनिराकांक्षआत्मा
चित्तंयस्यसः॥कूटस्थोनिर्विकारः॥अतएवविजितानींद्रियाणियेनअतएवसमानिलोष्टादीनियस्यमृत्पिंडपाषा
णसुवर्णेषुहेयोपादेयबुद्धिशून्यःसयुक्तोयोगारूढइत्युच्यते॥८॥सुहृन्मित्रादिषुसमबुद्धियुक्तस्तुततोपिश्रेष्ठइत्या

ज्ञानविज्ञानतृप्तात्माकूटस्थोविजितेंद्रियः॥युक्तइत्युच्यतेयोगीसमलोष्टाश्मकांचनः॥८॥
सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबंधुषु॥साधुष्वपिचपापेषुसमबुद्धिर्विशिष्यते॥९॥

ह॥सुहृत्स्वभावेनैवहिताशंसी॥मित्रंस्नेहवशेनोपकारकः॥उदासीनोविवदमानयोरुभयोर
प्युपेक्षकः॥मध्यस्थोविवदमानयोरुभयोरपिहिताशंसी॥द्वेष्योद्वेषविषयः॥बंधुःसंबंधी॥अरिर्बा
धकः॥साधवःसदाचाराः॥पापादुराचाराः॥एतेषुसमरागद्वेषशून्याबुद्धिर्यस्यसतुविशिष्टः॥९॥ ६१

एवंयोगारूढस्यलक्षणमुक्त्वेदानींतस्यसांगंयोगंविधत्ते॥योगीत्यादिना॥सयोगीपरमोमतइत्यनेनग्रं
थेन॥योगीयोगारूढआत्मानंमनःयुंजीतसमाहितंकुर्यात्सततंनिरंतरंरहसिएकांतेगिरिगुहादौस्थि
तःसन्॥एकाकीसंगशून्यः॥यतंसंयतंचित्तमात्मादेहश्चयस्यनिराशीर्निराकांक्षःपरिग्रहशून्यश्च॥१०

योगीयुंजीतसततमात्मानंरहसिस्थितः॥एकाकीयतचित्तात्मानिराशीरपरिग्रहः॥१०॥
शुचौदेशेप्रतिष्ठाप्यस्थिरमासनमात्मनः॥नात्युच्छ्रितंनातिनीचंचैलाजिनकुशोत्तरं॥११॥
तत्रैकाग्रंमनःकृत्वायतचित्तेंद्रियक्रियः॥उपविश्यासनेयुंज्याद्योगमात्मविशुद्धये॥१२॥

आसननियमंदर्शयन्नाह॥द्वाभ्यां॥शुचाविति॥शुद्धेस्थानेआत्मनःस्वस्यासनंस्थापयित्वाकीदृ
शंस्थिरंअचलंनातीवोन्नतंनचातिनीचंचैलंवस्त्रंअजिनंव्याघ्रादिचर्मचैलाजिनेकुशेभ्यउत्त
रेयस्मिन्कुशानामुपरिचर्मतदुपरिवस्त्रमास्तीर्यइत्यर्थः॥११॥तत्रेति॥तत्रतस्मिन्आसनेउप

विषयएकाग्रंविक्षेपरहितंमनः॥कृत्वायोगंयुंज्यात्अभ्यसेत्यतउपरताचित्तस्येंद्रियाणांचक्रि
यायस्यआत्मनोमनसोविशुद्धयेउपशांतये॥१२॥चित्तैकाग्र्योपयोगिनींदेहादिधारणांदर्शयन्ना
ह॥द्वाभ्यां॥समंइतिकायइति॥देहमध्यमभागोविवक्षितःकायश्चशिरश्चग्रीवाचकायशिरो
ग्रीवंमूलाधारादारभ्यमूर्द्धांतपर्यंतंसमंअवक्रंनिश्चलंधारयनस्थिरः॥दृढप्रयत्नोभूत्वेत्यर्थः॥स्वीयं

समंकायशिरोग्रीवंधारयन्नचलंस्थिरः॥संप्रेक्ष्यनासिकाग्रंस्वंदिशश्चानवलोकयन्॥१३॥
प्रशांतात्माविगतभीर्ब्रह्मचारिव्रतेस्थितः॥मनःसंयम्यमच्चित्तोयुक्तआसीतमत्परः॥१४॥

नासिकाग्रंसंप्रेक्ष्येति॥अर्द्धनिमीलितनेत्रइत्यर्थः॥इतस्ततोदिशश्चानवलोकयन्नासीदित्युत्तरेणान्वयः॥
१३॥प्रशांतेति॥प्रशांतःस्वात्माचित्तंयस्य॥विगताभीर्भयंयस्यब्रह्मचारिव्रतेब्रह्मचर्यव्रतेस्थितःसन्मनः
संयम्यप्रत्याहृत्यमय्येवचित्तंयस्यअहमेवपरःपुरुषार्थोयस्यसमत्परःएवंयुक्तोभूत्वाआसीततिष्ठेत॥१४

योगाभ्यासफलमाह॥नेति॥द्वाभ्यां॥अत्यंतमधिकंभुंजानस्यएकांतंअत्यंतमनश्ना
तःभुंजानंविनापियोगःसमाधिर्नभवति॥योगाभ्यासफलमाह॥युंजन्नेवमिति॥एवमु
क्तप्रकारेणसदात्मानंमनोयुंजन्समाहितंकुर्वन्नियतंनिरुद्धंमानसंचित्तंयस्यसः॥शांतिं

युंजन्नेवंसदात्मानंयोगीनियतमानसः॥शांतिंनिर्वाणपरमांमत्संस्थामधिग
च्छति॥१५॥नात्यश्नतस्तुयोगोस्तिनचैकांतमनश्नतः॥नचातिस्वप्नशीलस्यजा
ग्रतोनैवचार्जुन॥१६॥ ॥

मोक्षंसंसारोपरमंप्राप्नोति॥कथंभूतांनिर्वाणपरमंप्राप्ययस्यांतांमत्संस्थांमद्रूपेणावस्थि
तिं॥१५॥योगाभ्यासनिष्ठस्याहारादिनियममाह॥तथाअतिनिद्राशीलस्यअतिजाग्रत
श्चयोगोनैवास्ति॥१६॥ ॥

गीता॰ स॰ तर्हि कथंभूतस्य योगो भवतीत्याह ॥ युक्तेति ॥ युक्तो नियत आहारो विहारश्च गतिर्यस्य तस्य कर्मसु
६३ कार्येषु ॥ युक्ता नियता चेष्टा यस्य युक्तौ नियतौ स्वप्नावबोधौ निद्राजागरौ यस्य तस्य दुःखनिवर्त्त
को योगः सिध्यति ॥ १७ ॥ कदा निष्पन्नयोगः पुरुषो भवतीत्यपेक्षायामाह ॥ यदेति ॥ विनियतं
संयतं चित्तं आत्मन्येव यदा निश्चलं तिष्ठति ॥ तदा प्राप्तयोग इत्युच्यते ॥ १८ ॥ आत्मैक्याकारतया

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ॥ युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥ १७ ॥
यदा विनियतं चित्तमात्मन्येवावतिष्ठते ॥ निस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा ॥ १८ ॥ यथा दी
पो निवातस्थो नेंगते सोपमा स्मृता ॥ योगिनो यतचित्तस्य युंजतो योगमात्मनः ॥ १९ ॥ यावस्थित

स्य चित्तस्योपमानमाह ॥ यथेति ॥ वातशून्ये देशे स्थितो दीपो यथा नेंगते न विचलति ॥ सा उपमा
दृष्टांतः ॥ कस्य आत्मविषयं योगमभ्यस्यतो योगिनो नियतं चित्तं तद्वत्तिष्ठतीत्यर्थः ॥ १९ ॥ ६३

यं संन्यासमिति ॥ प्राहुर्योगं तं विद्धि पांडवेत्यादि ॥ कर्मैव योगशब्देनोक्तं ॥ नात्यश्नतस्तु यो
गोस्तीत्यादौ तु समाधियोगशब्देनोक्तः ॥ तत्र मुख्यो योगः क इत्यपेक्षायां समाधिमेव स्वरूपतः
फलतश्च लक्षयन्स एव मुख्यो योग इत्याह ॥ यत्रेति ॥ सार्धैस्त्रिभिः ॥ यत्र यस्मिन्नवस्थाविशेषे
योगाभ्यासेन निरुद्धं चित्तं उपरतं भवतीति योगस्य स्वरूपलक्षणमुक्तं ॥ तथा च पातंजलं

यत्रोपरमते चित्तं निरुद्धं योगसेवया ॥ यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति ॥ २० ॥

सूत्रं ॥ योगश्चित्तवृत्तिनिरोध इति ॥ इष्टप्राप्तिलक्षणेन फलेन तमेव लक्षयति ॥ यत्र य
स्मिन्नवस्थाविशेषे आत्मना शुद्धेन मनसा आत्मानमेव पश्यति ॥ न तु देहादि ॥ पश्यंश्चा
त्मन्येव तुष्यति ॥ न तु विषयेषु यत्रेत्यादीनां यच्छब्दानां तं योगसंज्ञितं विद्यादिति चतुर्थे
नान्वयः ॥ २० ॥ ॥

आत्मन्येव तोषहेतुमाह ॥ सुखमिति ॥ यत्र यस्मिन्नवस्थाविशेषे यत्तत्किमपि निरतिशयं
आत्यंतिकं नित्यं सुखं वेत्ति ॥ ननु तदा विषयेंद्रियसंबंधाभावात्कुतः सुखं स्यात्तत्राह ॥
अतींद्रियं विषयेंद्रियसंबंधातीतं बुद्ध्यैवात्माकारतया ग्राह्यं ॥ अतएव यत्र स्थितः सन् तत्त्व-
तः आत्मस्वरूपान्नैव चलति ॥ २१ ॥ अचलत्वमेवोपपादयति ॥ यमिति ॥ यं आत्मसुख-

सुखमात्यंतिकं यत्तद्बुद्धिग्राह्यमतींद्रियं ॥ वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः ॥ २१ ॥
यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः ॥ यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्य-
ते ॥ २२ ॥

रूपं लाभं लब्ध्वा ततोधिकं अपरं लाभं न मन्यते ॥ न चिंतयति ॥ किंच ॥ यस्मिं-
श्च स्थितो महता शीतोष्णादिदुःखेन न विचाल्यते नाभिभूयते ॥ एतेनानिष्टनिवृत्तिफले-
नापि योगस्योत्कर्ष उक्तो द्रष्टव्यं ॥ २२ ॥ ॥

य एवंभूतोवस्थाविशेषस्तमाह ॥ तमिति ॥ अर्द्धेन दुःखशब्देन दुःखमिश्रत्वात्तद्वैषयिकं सुखमपि गृह्यते
दुःखस्य संयोगेन स्पर्शमात्रेणापि वियोगो यस्मिन् ॥ तमवस्थाविशेषं योगसंज्ञितं योगशब्दवाच्यं जा-
नीयात् ॥ परमात्मना क्षेत्रज्ञस्य योजनं योगः ॥ यद्वा ॥ दुःखसंयोगेन वियोग एव भूरेकातरशब्दवत् वि-
रुद्धलक्षणया योग उच्यते कर्मणि तु योगशब्दः ॥ तदुपायत्वादौपचारिक एवेति भावः ॥ यस्मादेवं महा-

तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितं ॥ स निश्चयेन योक्तव्यो योगोनिर्विण्णचेतसा ॥ २३ ॥
संकल्पप्रभावान्कामांस्त्यक्त्वा सर्वानशेषतः ॥ मनसैवेंद्रियग्रामं विनियम्य समंततः ॥ २४ ॥

फलो योगस्तस्मात्स एव प्रयत्नतोऽभ्यसनीय इत्याह ॥ स इति सार्द्धेन ॥ शास्त्राचार्योपदेशजनितेन निश्चयेन योक्तव्यः
अभ्यसनीयः ॥ यद्यपि शीघ्रं न सिध्यति तथापि अनिर्विण्णेन निर्वेदरहितेन चेतसा योक्तव्यः ॥ दुःखबु-
द्ध्या प्रयत्नशैथिल्यं निर्वेदः ॥ २३ ॥ किंच ॥ संकल्पेति ॥ संकल्पात्प्रभवो येषां तान्योगप्रतिकूलान्का-

गीता० स० मानन्त्यशेषतः सवासनांस्त्यक्त्वा मनसा विषयदोषदर्शिना सर्वतः ॥ प्रसरंतमिंद्रियसमूहं विशेषे
६५ णनियम्येयोक्तव्य इति पूर्वेणैवान्वयः ॥२४॥ यदि तु प्राक्तनकर्मसंस्कारेण मनो विचलेत्तर्हि धा
रणया स्थिरीकुर्यादित्याह ॥ शनैरिति ॥ धृतिर्धारणा तया गृहीतया वशीकृतया ॥ बुद्ध्या आत्मसं
स्थं आत्मन्येव सम्यक्स्थितं निश्चलं मनः कृत्वोपरमेत् तच्च शनैः शनैरभ्यासक्रमेण न तु सहसा उपरमे

शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया ॥ आत्मसंस्थं मनः कृत्वा न किंचिदपि चिंतयेत् ॥२५॥ यतो य
तो निश्चरति मनश्चंचलमस्थिरं ॥ ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥२६॥ स्वरूपमाह ॥ न किंचि

दपि चिंतयेत् ॥ निश्चले मनसि स्वयमेव प्रकाशमानः परमानंदस्वरूपीभूत्वा आत्मध्यानादपि निवर्तेत
श्री इत्यर्थः ॥२५॥ एवमपि रजोगुणवशादि मनः प्रचलेत्तर्हि पुनः प्रत्याहारेण वशीकुर्यादित्याह ॥ यत इत्यादि ६५
स्वभावतश्चंचलं धार्यमाणमप्यस्थिरं मनो यं यं विषयं प्रति निर्गच्छति ततस्ततः प्रत्याहृत्यात्मन्येव स्थिरं कु
र्यात् ॥२६॥

एवं प्रत्याहारादिभिः पुनः पुनर्मनो वशीकुर्वंतं रजोगुणक्षये सति योगसुखं प्राप्नोतीत्याह ॥ प्रशांतमनस
मिति ॥ एवमुक्तप्रकारेण शांतं रजो यस्य ॥ अत एव प्रशांतं मनो यस्य तमेनं निकल्मषं ब्रह्मत्वं प्राप्तं योगि
नं उत्तमं समाधिसुखं स्वयमेवोपैति प्राप्नोति ॥२७॥ ततश्च कृतार्थो भवतीत्याह ॥ युंजन्निति ॥ एवमनेन प्र

प्रशांतमनसं ह्येनं योगिनं सुखमुत्तमं ॥ उपैति शांतरजसं ब्रह्मभूतमकल्मषं ॥२७॥ युंज
न्नेवं सदात्मानं योगी विगतकल्मषः ॥ सुखेन ब्रह्मसंस्पर्शमत्यंतं सुखमश्नुते ॥२८॥ सर्वभू
तस्थमात्मानं योगी भूतानि चात्मनि ॥ ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥२९॥ ॥

कारेण सर्वदा आत्मानं मनो युंजन्वशीकुर्वन्विशेषेण सर्वात्मना विगतं कल्मषं यस्य स योगी सु
खेनानायासेन ब्रह्मसंस्पर्शं अविद्यानिवर्तकः साक्षात्कारस्तदेवमत्यंतं सर्वोत्तमं सुखमश्नुते जीवन्मु
क्तो भवतीत्यर्थः ॥२८॥ ब्रह्मसाक्षात्कारमेव दर्शयति ॥ सर्वभूतस्थमिति ॥ योगेनाभ्यस्यमानेन युक्तात्म

त्मा समाहितचित्तः सर्वत्र समं ब्रह्मैव पश्यतीति समदर्शनः ॥ स्वमात्मानमविद्याकृतदेहादिपरिच्छे
दशून्यं सर्वभूतेषु ब्रह्मादिस्थावरांतेषु स्थितं पश्यति ॥ तानि च स्वात्मन्यभेदेन पश्यति ॥ २९ ॥
एवंभूतात्मज्ञानस्य सर्वभूतात्मतया मदुपासनं मुख्यकारणमित्याह ॥ यइति ॥ मां परमेश्वरं सर्वत्र
भूतमात्रे यः पश्यति सर्वं च प्राणिमात्रं च मयि यः पश्यति तस्याहं न प्रणश्यामि ॥ अदृश्यो न भवामि स

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ॥ तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥ ३० ॥
सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः ॥ सर्वथा वर्त्तमानोपि स योगी मयि वर्त्तते ॥ ३१ ॥

च ममादृश्यो न भवति ॥ प्रत्यक्षो भूत्वा कृपादृष्ट्या तं विलोकयाम्यनुगृह्णामीत्यर्थः ॥ ३० ॥ न चैवंभूतो किं
विधिकिंकरः स्यादित्याह ॥ सर्वभूतस्थमिति ॥ सर्वेषु भूतेषु स्थितं मां ममेदमास्थितो यो भजति स
योगी ज्ञानी सम्यक् सर्वथा कर्मत्यागेनापि वर्त्तमानो मय्येव वर्त्तते मुच्यते न तु भ्रश्यतीत्यर्थः ॥ ३१ ॥ ॥ ६६

एवं च मां भजतां योगिनां मध्ये सर्वभूतानुकंपी श्रेष्ठ इत्याह ॥ आत्मौपम्येनेति ॥ आत्मौपम्येन यथा म
म सुखं प्रियं दुःखं चाप्रियं तथान्येषामपीति सर्वत्र समं पश्यन् सुखमेव सर्वेषां यो वांछति न तु कस्यापि
दुःखं स योगी श्रेष्ठो मम अभिमत इत्यर्थः ॥ ३२ ॥ उक्तलक्षणस्य योगस्यासंभवं मन्वानोऽर्जुन उवाच ॥ योय
मिति ॥ सौम्येन मनसो जयविक्षेपशून्यतया केवलात्माकारावस्थानेन योयं योगस्त्वया प्रोक्तः एतस्य यो

आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन ॥ सुखं वा यदि वा दुःखं स योगी परमो मतः ॥ ३२ ॥ अर्जुन उ॥
वाच ॥ योयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन ॥ एतस्याहं न पश्यामि चंचलत्वात्स्थितिं स्थिरां ॥ ३३

स्येगेया स्थिरां च स्थितिं न पश्यामि मनसश्चंचलत्वात् ॥ ३३ ॥ एतत्स्फुटयति ॥ चंचलं हीति ॥ चंचलं स्वभा
वेनैव चापलं ॥ किंच ॥ प्रमाथी प्रमथनेन शरीरं देहेंद्रियक्षोभकमित्यर्थः ॥ किंच ॥ बलवत् विचारेणापि जेतुमश
क्यं किंच ॥ दृढं विषयवासनानुबद्धतया दुर्भेदं ॥ अतीयया काशे दोधूयमानस्य वायोः कुंभादिषु नि

रोद्धुं न मशक्यं ॥ तथा तस्य मनसोपि निग्रहं निरोधं सुदुःकरं सर्वथा कर्तुमशक्यं मन्ये ॥ ३४ ॥
तदुक्तं ॥ चंचलत्वादिकमंगीकृत्यैव मनोनिग्रहोपायं ॥ श्रीभगवानुवाच ॥ असंशयमिति ॥
चंचलत्वादिना मनो निरोद्धुमशक्यमिति ॥ यद्वदसि एतन्निःसंशयमेव तथापि तु अभ्यासेन पर

चंचलं हि मनः कृष्ण प्रमाथि बलवद्दृढं ॥ तस्याहं निग्रहं मन्ये वायोरिव सुदुःकरं ॥ ३४ ॥ श्रीभग
वानुवाच ॥ असंशयं महाबाहो मनो दुर्निग्रहं चलं ॥ अभ्यासेन तु कौंतेय वैराग्येण च गृह्यते ॥ ३५ ॥

मात्माकारप्रत्ययो ॥ वृत्त्या विषयवैतृष्ण्येन च गृह्यते ॥ अभ्यासेन लयप्रतिबंधात् वैराग्येण च
विक्षेपप्रतिबंधात् उपरतवृत्तिकं सत्परमात्माकारेण परिणतं तिष्ठतीत्यर्थः ॥ तदुक्तं योगशास्त्रे
मानसी वृत्तिशून्यस्य ब्रह्माकारतया स्थितिः ॥ या संप्रज्ञातनामासौ समाधिरभिधीयत
इति ॥ ३५ ॥ ॥

एतावांस्तु विशेष इत्याह ॥ असंयतात्मेति ॥ उक्तप्रकारेणाभ्यासवैराग्याभ्यां असंयतः आत्मा
चित्तं यस्य तेन पुरुषेण योगो दुःप्रापः प्राप्तुमशक्यः ॥ अभ्यासवैराग्याभ्यां वश्यो वशवर्ती आत्मा
चित्तं यस्य तेन पुनः अस्मिन्नेवोपायेन प्रयत्नं कुर्वता योगः प्राप्तुं शक्यः ॥ ३६ ॥ अभ्यासवैराग्याभावे
न कथंचिद्वा तत्सम्यक् ज्ञानः किं फलं प्राप्नोतीत्यर्जुन उवाच ॥ अयतिरिति ॥ प्रथमं श्रद्धयोपेत

असंयतात्मना योगो दुःप्राप इति मे मतिः ॥ वश्यात्मना तु यतता शक्योवाप्तुमुपायतः ॥ ३६ ॥ अ
र्जुन उवाच ॥ अयतिः श्रद्धयोपेतो योगाच्चलितमानसः ॥ अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ॥ ३७

एव योगे प्रवृत्तः ॥ न तु मिथ्याचारतया ततः परं तु अयतिः सम्यक् यत्नशैथिल्यात् अभ्यासरहित इत्यर्थः ॥ तथा
योगाच्चलितं मानसं विषयप्रवणं चित्तं यस्य मंदवैराग्य इत्यर्थः ॥ एवमभ्यासवैराग्यशैथिल्यात्
योगस्य संसिद्धिं फलं ज्ञानमप्राप्य कां गतिं प्राप्नोति ॥ ३७ ॥ ॥

अत्राभिप्रायं विवृणोति ॥ कर्म्मणामीश्वरेऽर्पितत्वादनुष्टानाच्च न तावत्कर्मफलं स्वर्गादिकं
प्राप्नोति ॥ योगानिष्पत्तेश्च न मोक्षं प्राप्नोति ॥ एवमुभयस्माद्भ्रष्टः ॥ अप्रतिष्ठो निराश्रयः ॥ अ
त एव ब्रह्मणः प्राप्त्युपाये पथि मार्गे विमूढः सन् कच्चित्किं न नश्यति किं वा न नश्यतीत्यर्थः ॥ नाशे दृष्टा

कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति ॥ अप्रविष्टो महाबाहो विमूढो ब्रह्मणः पथि ॥ ३८ ॥
एतन्मे संशयं कृष्ण छेत्तुमर्हस्यशेषतः ॥ त्वदन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते ॥ ३९ ॥

न्तः पथि छिन्नमभ्रं पूर्वास्मादभ्राद्विश्लिष्टमभ्रान्तरं वा प्राप्तं सन्मध्य एव विलीयते तद्वत् ॥
३८ ॥ तथैव सर्वज्ञेनायं मम संदेहो निरसनीयस्त्वत्तोऽन्यस्तु संदेहनिवर्तको नास्तीत्याह ॥ ए
तन्मे इति ॥ एतत् एनं छेत्ता निवर्तकः स्पष्टमन्यत् ॥ ३९ ॥ ॥

अत्रोत्तरं श्रीभगवानुवाच ॥ पार्थेति ॥ सार्धैश्चतुर्भिः ॥ इहामुत्र परलोके वा तस्य विनाशो नास्ति विनाशो ही
नयोनिप्राप्तिः ॥ अमुत्र परलोके नाशो नरकप्राप्तिः ॥ इहलोके विनाशो उभयभ्रंशात्पातित्यं ॥ तदुभयं तस्य
नास्त्येव ॥ यतः कल्याणकृत् शुभकारी कश्चिदपि दुर्गतिं न गच्छति ॥ अयं च शुभकारी श्रद्धया योगे प्रवृत्त
त्वात् तात इति लोकरीत्या पित्रा लालयन् संबोधयति ॥ ४० ॥ तर्हि किमसौ प्राप्नोतीत्यपेक्षायामाह ॥ प्राप्येति ॥ पुण्य

॥ श्रीभगवानुवाच ॥ पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते ॥ नहि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति ॥
॥ ४० ॥ प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः ॥ शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ॥ ४१ ॥

कारिणामश्वमेधादियाजिनां लोकान्प्राप्य तत्र शाश्वतीः समा बहून् संवत्सरानुषित्वा तत्सुखमनुभूय शुचीनां
सदाचाराणां श्रीमतां धनिनां गेहे स योगभ्रष्टो जन्म प्राप्नोति ॥ अल्पकालाभ्यस्तयोगभ्रंशे गतिरियमुक्ता चिरा
भ्यस्तयोगभ्रंशे तु पक्षान्तरमाह ॥ अथवेति ॥ योगनिष्ठानां धीमतां ज्ञानिनामेव कुले जायते न तु पूर्वोक्तानां रूढयोगा
नां कुले एतज्जन्म स्तौति ॥ ४१ ॥

गीता०स० ईदृशं यज्जन्म एतद्धि लोके दुर्लभतरं मोक्षहेतुत्वात् । ततः किमत आह । तत्रेति सार्द्धेन । तत्र बुद्धिः प्रका-
६९ रेण जन्मनि । पूर्वदेहे भवं पौर्वदैहिकं तमेव ब्रह्मविषयया बुद्ध्या संयोगं लभते ततश्च भूयोऽधिकं संसिद्धौ
मोक्षेऽधिकं प्रयत्नं करोति । तत्र हेतुः । तमेव पूर्वदेहकृताभ्यासेनावशोऽपि कुतश्चिदन्तरायादनिच्छन्न-
पि संह्रियते विषयेभ्यः परावर्त्य ब्रह्मनिष्ठः क्रियते । न हि दैवं पूर्वाभ्यासवशेन प्रयत्नं कुर्वन्सन्नेसुच्यत इतीम

अथवा योगिनामेव कुले भवति धीमतां । एतद्धि दुर्लभतरं लोके जन्म यदीदृशं ॥ ४२ ॥ तत्र तं बुद्धिसंयोगं
लभते पौर्वदेहिकं । यतते च ततो भूयः संसिद्धौ कुरुनंदन ॥ ४३ ॥ पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः ।
जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्त्तते ॥ ४४ ॥
मर्थं कैमुत्यन्यायेन स्फुटयति सार्द्धेन ॥ जिज्ञासुरिति ।
योगस्य स्वरूपं जिज्ञासुरेव केवलं न तु सम्यग्योगं प्राप्तः एवंभूते योगे प्रविष्टमात्रोऽपि पापवशाद्योगभ्रष्टोऽपि श-
ब्दब्रह्म वेदमतिवर्त्तते वेदोक्तकर्मफलान्यतिक्रमति । तेभ्योऽधिकं फलं प्राप्य मुच्यत इत्यर्थः ॥ ४४ ॥ ६९

यदैवं मंदप्रयत्नोऽपि योगी परां गतिं याति । तदा यस्तु योगी प्रयत्नादुत्तरोत्तरमधिकं योगे यतमानो
यत्नं कुर्वन्योगी नैव समृद्धकिल्बिषो विधूतपापः सोऽनेकेषु जन्मसु उपचितेन योगेन संसिद्धः सम्यक्
ज्ञानी भूत्वा ततः श्रेष्ठां गतिं यातीति किं किं वक्तव्यमित्यर्थः ॥ ४५ ॥ यस्मादेवं तस्मात् । तपस्विभ्य इति

प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः । अनेकजन्मसंसिद्धस्ततो याति परां गतिं ॥ ४५ ॥ तप-
स्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः । कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ॥ ४६ ॥
योगिनामपि सर्वेषां मद्गतेनांतरात्मना । श्रद्धावान्भजते यो मां स मे युक्ततमो मतः ॥ ४७ ॥
कृच्छ्रचांद्राय-
णादितपोनिष्ठेभ्यो ज्ञानिष्ठेभ्यो ज्ञानिभ्यः शास्त्रज्ञानवद्भ्योऽपि कामिभ्यः इष्टापूर्त्तकारिभ्यो योगी श्रेष्ठोऽभि-
मतस्तस्मात्त्वं योगी भव ॥ ४६ ॥ योगिनामपि यमनियमादिपराणां मध्ये मद्भक्तः श्रेष्ठ इत्याह । योगिनामि-
ति । मद्गतेन मय्यासक्तेनांतरात्मना मनसा यो मां परमेश्वरं श्रद्धायुक्तः सन्भजते स योगयुक्तेषु श्रेष्ठो मम सं-

मतः ॥ अनेतीमद्भक्तो भवेदितिभावः ॥ आत्मयोगमवोचद्यो भक्तियोगशिरोमणिं ॥ तं वंदे परमानंदं माधवं
भक्तशेवधिं ॥ ४७ ॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां टीकायां षष्ठोऽध्यायः ॥ ६ ॥ विज्ञेयमात्मत
त्त्वं सयोगं समुदीरितं ॥ भजनीयमथेदानीं मैश्वरं रूपमीर्यते ॥ १ ॥ पूर्वाध्यायांते मत्ते नांतरात्मना

इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे कृष्णार्जुनसंवादे षष्ठोऽध्यायः ॥ ६ ॥ श्री
भगवानुवाच ॥ मय्यासक्तमनाः पार्थ योगं युंजन्मदाश्रयः ॥ असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु ॥ १ ॥

यो मां भजते स मे युक्ततमो मत इत्युक्तं ॥ तत्र कीदृशस्त्वं यस्य भक्तिः कर्तव्येत्यपेक्षायां स्वरूपं निरूप
यिष्यन् ॥ श्रीभगवानुवाच ॥ मय्यासक्तमना इति ॥ मयि परमेश्वरे आसक्तमभिनिविष्टं मनो यस्य
सः ॥ मदाश्रयः ॥ अहमेवाश्रयो यस्य स त्वं अनन्यशरणः सन् योगं युंजन् अभ्यस्यन् ॥ असंशयं यथा
भवत्येवं मां समग्रं विभूतिबलैश्वर्यादिसहितं यथा ज्ञास्यसि ॥ तदिदं मया वक्ष्यमाणं शृणु ॥ १ ॥ ७०

तो वक्ष्यमाणं स्तौति ॥ ज्ञानमिति ॥ ज्ञानं शास्त्रीयं विज्ञानमनुभवस्तत्सहितं इदं मद्विषयं अशेषतः साक
ल्येन वक्ष्यामि ॥ यत् ज्ञात्वा इह श्रेयोमार्गे वर्तमानस्य पुनरन्यत् ज्ञातव्यमवशिष्टं न भवति ॥ तेन कृतार्थो
भवतीत्यर्थः ॥ २ ॥ मद्भक्तिं विना तु मज्ज्ञानं दुर्लभमित्याह ॥ मनुष्याणामिति ॥ असंख्यातानां जीवानां मध्ये
मनुष्यव्यतिरिक्तानां श्रेयसि प्रवृत्तिरेव नास्ति मनुष्याणां सहस्रेषु मध्ये कश्चिदेव प्राक्कृतपुण्यवशात्सि

ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः ॥ यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते ॥ २ ॥ मनु
ष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ॥ यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ॥ ३ ॥ द्धये आत्मा

ज्ञानाय यतते ॥ प्रयत्नं कुर्वतामपि सहस्रेषु कश्चिदेव प्राक्कृतपुण्यवशादात्मानं वेत्ति तादृशानां चात्म
ज्ञानसिद्धानां सहस्रेषु कश्चिदेव मां परमात्मानं मत्प्रसादेन तत्त्वतो वेत्ति तदेवमतिदुर्लभमपि मज्ज्ञानं
तुभ्यमहं वक्ष्यामीत्यर्थः ॥ ३ ॥ एवं श्रोतारमभिमुखीकृत्येदानीं प्रकृतिद्वारा सृष्ट्यादिकर्तृत्वेन ईश्वरत्वं प्रति

ज्ञातं निरूपयिष्यन् परापरभेदेन प्रकृतिद्वयमाह॥ भूमिरिति॥ द्वाभ्यां॥ भूम्यादीनि पंचभूतसूक्ष्माणि भूम्या
णि भूम्यादिशब्दैः पंचगंधादितन्मात्राण्युच्यंते॥ मनःशब्देन तत्कारणभूतोहंकारः॥ बुद्धिशब्देन तत्कारणं
महत्तत्वं॥ अहंकारशब्देन तत्कारणमविद्या इत्येवमष्टधा भिन्ना॥ यद्वा॥ भूम्यादिशब्दैः पंचमहाभूतानि सू
क्ष्मैः सहैकीकृत्य गृह्यंते॥ अहंकारशब्देनैवाहंकारस्तेनैव तत्कार्याणींद्रियाण्यपि निगृह्यंते बुद्धिरिति॥

भूमिरापोनलो वायुः खं मनो बुद्धिरेव च॥ अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा॥४॥ ॥

महत्तत्वं मनः॥शब्देन तु मनसैवोन्नेयमव्यक्तरूपं प्रधानमित्यनेन प्रकारेण मे प्रकृतिर्मायाख्या श
क्तिरष्टधा भिन्ना विभागं प्राप्ता चतुर्विंशतिभेदभिन्नेवेत्यष्टास्वेवान्यदन्तर्भावविवक्षयाष्टधा भिन्नेत्
युक्तं॥ तथा च वक्ष्यमाणे क्षेत्राध्याये इमामेव प्रकृतिं चतुर्विंशतितत्वात्मना प्रपंचयिष्यति॥ महा
भूतान्यहंकारो बुद्धिरव्यक्तमेव च॥ इंद्रियाणि दशैकं च पंच चेंद्रियगोचरा इति॥४॥ ॥ ७१

अपरामिमां प्रकृतिमुपसंहरन् परां प्रकृतिमाह॥ अष्टधेति॥ काया प्रकृतिरियमपरा निकृष्टा जडत्वात्
परार्थत्वाच्च इतः सकाशात् परां प्रकृष्टां अन्यां जीवभूतां मे प्रकृतिं जानीहि॥ परत्वे हेतुः॥ यया चेतनया
क्षेत्रज्ञरूपया स्वकर्मद्वारेण इदं जगद्धार्यते॥५॥ अनयोः प्रकृत्योर्द्वंद्वं दर्शयन्नस्य तत्द्वारं सृष्ट्यादिकार
णत्वमाह॥ एतदिति॥ एते क्षेत्रक्षेत्रज्ञरूपे प्रकृती योनी कारणभूते येषां तानि एतद्योनीनि स्थावरजंगमात्म

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे परां॥ जीवभूतां महाबाहो ययेदं धार्यते जगत्॥५॥
एतद्योनीनि भूतानि सर्वाणीत्युपधारय॥ अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा॥६॥

कानि सर्वाणि भूतानीत्युपधारय बुध्यस्व॥ तत्र जडा प्रकृतिर्देहरूपेण परिणमते चेतना तु मदंशभूता भोक्तृ
त्वेन देहेषु प्रविश्य स्वकर्मणा धारयति ते च मदीये प्रकृती मत्तः संभूते॥ अतोहमेव कृत्स्नस्य जग
तः प्रभवः प्रकर्षेण भवत्यस्मादिति प्रभवः परमकारणमहमित्यर्थः॥ तया प्रलीयतेऽनेनेति प्रलयः संहर्तापि अहमेवे
त्यर्थः॥६॥

यस्मादेवं तस्मान्मत्त इति ॥ मत्तः सकाशात्परतरं श्रेष्ठं जगतः सृष्टिसंहारयोः स्वतंत्रं कारणं किंचि
दपि नास्ति ॥ स्थितिहेतुरप्यहमित्याह ॥ मयि सर्वमिदं प्रोतं ग्रथितं आश्रितमित्यर्थः ॥ दृष्टांतः स्पष्टः
जगत्स्थितिहेतुत्वं प्रपंचयति ॥ रसोहमिति पंचभिः ॥ अप्सु रसोहं रसस्तन्मात्ररूपया विभूत्याश्र

मत्तः परतरं नान्यत्किंचिदस्ति धनंजय ॥ मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥ ७ ॥

रसोहमप्सु कौंतेय प्रभास्मि शशिसूर्ययोः ॥ प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु ॥ ८ ॥

श्रयत्वेनाप्सु स्थितोहमित्यर्थः ॥ तथा शशिसूर्ययोः प्रभास्मि ॥ चंद्रे सूर्ये च प्रकाशरूपया विभू
त्या तदाश्रयत्वेन स्थितोहमित्यर्थः ॥ एवमुत्तरत्रापि द्रष्टव्यं सर्वेषु वेदेषु वैखरीरूपेषु तन्मूल
भूतः ॥ प्रणवः तुं ऑकारोस्मि खे आकाशे शब्दः तन्मात्ररूपोस्मि नृषु पुरुषेषु पौरुषं उद्यमोस्मि उ
द्यमे हि पुरुषास्तिष्ठंति ॥ ८ ॥ ॥

किंच ॥ पुण्य इति ॥ पुण्योऽविकृतो गंधः ॥ गंधतन्मात्रं पृथिव्या आश्रयमित्यर्थः ॥ यद्वा ॥ विभूतिरू
पेणाश्रयतस्य विवक्षिततात् सुरभिगंधस्यैवोत्कृष्टतया विभूतित्वात् पुण्यो गंध इत्युक्तं ॥ तेथा
विभावसौ अग्नौ य तेजः सहजा दीप्तिस्तदहं सर्वभूतेषु जीवनं प्राणधारणं आयुरहमित्यर्थः ॥ तप
स्विषु वानप्रस्थादिषु द्वंद्वसहनरूपं तपोस्मि ॥ ९ ॥ किंच ॥ बीजमिति ॥ सर्वेषां चराचराणां भूता

पुण्यो गंधः पृथिव्यां च तेजश्चास्मि विभावसौ ॥ जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु ॥ ९ ॥

बीजं मां सर्वभूतानां विद्धि पार्थ सनातनं ॥ बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहं ॥ १० ॥

नां बीजं सजातीयकार्योत्पादकसामर्थ्यं सनातनं नित्यं उत्तरोत्तरसर्वकार्येष्वनुस्यूतं ॥ तदेव बीजं मा
द्विभूतिं विद्धि ॥ न तु प्रतिव्यक्ति विनश्यत ॥ तथा बुद्धिमतां बुद्धिमस्मि तेजस्विनां तेजः प्रगल्भानां
तेजः ॥ प्रागल्भ्यं महं ॥ १० ॥ ॥

किंच ॥ बलमिति ॥ बलं सामर्थ्यमोजः बलवतामहं तच्च कामोऽप्राप्ते वस्तुन्यभिलाषो राजसो रागः पुनरभि-
लषितेऽर्थे प्राप्ते पुनरधिकेऽर्थे चित्तरंजनात्मकस्तृष्णापर्यायस्तामसः ॥ ताभ्यां विवर्जितं बलवतां च बलम-
स्मिं सात्विकं स्वधर्मानुष्ठानसामर्थ्यमहमित्यर्थः ॥ स्वधर्मेणाऽविरुद्धः स्वदारेषु पुत्रोत्पत्तिमात्रोप-
योगी कामोऽहं ॥ ११ ॥ किंच ॥ येचेति ॥ ये चान्ये सात्विका भावाः शमदमादयः ॥ राजसा हर्षदर्पादयः

बलं बलवतां चाहं कामरागविवर्जितं ॥ धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ ॥ ११ ॥ ये चै-
व सात्विका भावा राजसास्तामसाश्च ये ॥ मत्त एवेति तान्विद्धि नत्वहं तेषु ते मयि ॥ १३ ॥ ॥

तामसाश्च ये शोकमोहादयः ॥ प्राणिनां स्वकर्मवशाज्जायंते तान्सर्वान्मत्त एव जातान् इति विद्धि
मदीयप्रकृतिगुणकार्यत्वात् ॥ एवमपि तेष्वहं न वर्ते जीववत्तदधीनो न भवामीत्यर्थः ॥ ते-
तु मदधीनाः संतो मयि वर्तंत इत्यर्थः ॥ १२ ॥ ॥ ७३

एवंभूतं त्वां परमेश्वरमयं जनः ॥ किमिति न जानातीत्यत आह ॥ त्रिभिरिति ॥ त्रिभिरेभिः पूर्वोक्तैः का-
मलोभादिभिर्गुणमयैर्गुणविकारैः स्वभावैर्मोहितमिदं जगत् ॥ अतो मां नाभिजानाति ॥ कथंभूतं
एभ्यो भावेभ्यः परं एभिरस्पृष्टं ॥ एतेषां नियंतारं अत एवाव्ययं निर्विकारमित्यर्थः ॥ १३ ॥ केन तर्हि
त्वां जानंतीत्यत आह दैवीत्यञ्जौ किंकौ अत्युत्तुते त्यर्थः ॥ गुणमयी सत्वादिगुणविकारात्मिका म-

त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् ॥ मोहितं नाभिजानाति मामेभ्यः परमव्ययं ॥ १३ ॥
दैवी ह्येषा गुणमयी मम माया दुरत्यया ॥ मामेव ये प्रपद्यंते मायामेतां तरंति ते ॥ १४ ॥

म परमेश्वरस्य शक्तिर्माया दुरत्यया दुस्तरा हि प्रसिद्धमेतत् ॥ तथापि ये मामेवाव्यभिचारिण्या
भक्त्या प्रपद्यंते भजंति ते मायामेतां दुस्तरामपि तरंति ततो मां जानंतीति भावः ॥ १४ ॥ किमिति
तर्हि सर्वे त्वामेव न भजंति ॥ तत्राह ॥ नमामेति ॥ नरेषु ये अधमास्ते मां न भजंति ॥ अधमत्वे हेतुः

गीता॰स॰ ७४

मूढा अविवेकशून्याः नत्कुतो दुःकृतिनः पापशीलाः ॥ अतो माययापहृतं निरस्तं शास्त्राचार्योपदेश
म्यां ज्ञानमपि ज्ञानं येषां ते ॥ अत एवं दंभो दर्पो ऽभिमानश्च क्रोधो पारुष्यमेव चेत्यादिवर्ण्यमाणमा
सुरं स्वभावं प्राप्ताः ॥ संतो न मां भजंति ॥ १५ ॥ सुकृतिनस्तु मां भजंति ते च सुकृततारतम्येन चतुर्विधा

न मां दुःकृतिनो मूढाः प्रपद्यंते नराधमाः ॥ माययापहृतज्ञाना आसुरं भावमाश्रिताः ॥ १५ ॥
चतुर्विधा भजंते मां जनाः सुकृतिनो ऽर्जुन ॥ आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥ १६ ॥

इत्यत्राह ॥ चतुर्विधा इति ॥ पूर्वजन्मसु ये कृतपुण्या जनास्ते मां भजंते चतुर्विधाः ॥ आर्तो रोगता
स्कराद्याद्यभिभूतः ॥ स यदि पूर्वकृतपुण्यस्तर्हि मां भजति ॥ अन्यथा क्षुद्रदेवताभजने न संसर
ति ॥ एवमुत्तरत्रापि द्रष्टव्यं जिज्ञासुर्भगवंतं ज्ञातुमिच्छति रात्मज्ञानेच्छुः ॥ अर्थार्थी अत्र वापरत्र
वा भोगसाधनभूतार्थलिप्सुः ॥ ज्ञानी चात्मवित् ॥ १६ ॥ ॥ ७४

मामेवानुत्तमां गतिं १८

तेषां मध्ये ज्ञानी श्रेष्ठ इत्याह ॥ तेषामिति ॥ तेषां मध्ये ज्ञानी विशिष्टः ॥ तत्र हेतवः ॥ नित्ययुक्तः सदा मन्निष्ठः
एकस्मिन्नस्मय्येव भक्तिर्यस्य सः ॥ ज्ञानिनो देहाद्यभिमानाभावेन चित्तविक्षेपाभावान्नित्ययुक्तत्वमेकांतभ
क्तिश्च संभवति नान्यस्य ॥ अत एव हि तस्याहमत्यंतं प्रियः स च मम ॥ तस्मादेते नित्ययुक्तत्वादिभिश्च
सुर्नेर्हेतुभिः स उत्तम इत्यर्थः ॥ १७ ॥ तर्हि किमितरे त्रयस्य क्राङ्गः संसारति नहि नहीत्याह ॥ उदारा इति

तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते ॥ प्रियो हि ज्ञानिनो ऽत्यर्थमहं स च मम प्रियः ॥ १७ ॥ उदाराः
सर्व एवैते ज्ञानी त्वात्मैव मे मतं ॥ आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिं ॥ १८ ॥ सर्वे ऽप्येते उदारा महांतः मो
क्षभाज एवेत्यर्थः ॥ ज्ञानी त्वात्मैव मे मतं निश्चयः ॥ हि यस्मात्स ज्ञानी युक्तात्मा मदेकचित्तः सन्नाविद्य
ते ॥ उत्तमा यस्याः तामुत्तमां सर्वोत्तमां गतिं प्राप्य आस्थितः आश्रितवान् मद्व्यतिरिक्तमन्यत्फलं न
मन्यत इत्यर्थः ॥ १८ ॥ एवंभूतो भक्तो ऽतिदुर्लभ इत्याह ॥ बहूनामिति ॥ बहूनां जन्मनां किंचित्किंचित्

गीता०स०
७५

पुण्योपचयेनाऽनंतेचरमेजन्मनिज्ञानवान्सन्सर्वमिदंचराचरंवासुदेवएवेति ॥ सर्वात्मदृष्ट्या
मांप्रपद्यतेभजति ॥ अतःसमहात्माऽपरिच्छिन्नदृष्टिःसुदुर्लभः ॥ १९ ॥ तदेवंकामिनोपिसंतः
कामप्राप्तयेपरमेश्वरमेवयेभजंतितेकामान्प्राप्यशनैर्मुच्यंतइत्युक्तं ॥ येत्वत्यंतंराजसास्ता

बहूनांजन्मनामंतेज्ञानवान्मांप्रपद्यते ॥ वासुदेवःसर्वमितिसमहात्मासुदुर्लभः ॥ १९ ॥
कामैस्तैस्तैर्हृतज्ञानाःप्रपद्यंतेन्यदेवताः ॥ तंतंनियममास्थायप्रकृत्यानियताःस्वया ॥ २० ॥

मसाश्चकामाभिभूताःक्षुद्रदेवताःसेवंतेतेसंसरंतीत्याह ॥ कामैरिति ॥ चतुर्भिः ॥ येतुतैस्तैःपुत्र
कीर्तिशत्रुजयादिविषयैःकामैरपहृतविवेकाःसंतः ॥ अन्याःक्षुद्राभूतप्रेतयक्षादिदेवताभजंति ॥
किंकृत्वा ॥ तत्तद्देवताराधनेयोयोनियमउपवासादिलक्षणस्तंतंनियमंस्वीकृत्य ॥ तत्रापिस्वकी
याप्रकृत्यापूर्वाभ्यासवासनयानियतावशीकृताःसंतोदेवताविशेषंयेभजंतितेषांमध्ये ॥ २० ॥ ७५

योयोयांयामिति ॥ योयोभक्तःयांयांतनुंदेवतारूपांमदीयामेवमूर्तिंश्रद्धयार्चितुंप्रवर्ततेतस्य
तस्यभक्तस्यतत्तन्मूर्तिविषयांतामेवश्रद्धामचलांदृढामहमंतर्यामीविदधामिकरोमि ॥ २१ ॥
ततश्चसतयेति ॥ मद्भक्तस्तयादृढयाश्रद्धयातस्यात्मनोराधनमीहतेकरोति ॥ ततश्चयात्संक
ल्पितान्कामांस्तान्ततोदेवताविशेषाल्लभते ॥ किंतु ॥ मयैवतद्देवतांतर्यामिणाविहितान्निर्मि

योयोयांयांतनुंभक्तःश्रद्धयार्चितुमिच्छति ॥ तस्यतस्याचलांश्रद्धांतामेवविदधाम्यहम् ॥
॥ २१ ॥ सतयाश्रद्धयायुक्तस्तस्याराधनमीहते ॥ लभतेचततःकामान्मयैवविहितान्हितान् ॥ २२ ॥

तान् ॥ हिस्फुटमेतद्देवतानामपिमदधीनत्वान्ममभूर्तित्वाच्चेत्यर्थः ॥ २२ ॥ तदेवंयद्यपिसर्वत्रापि
देवतामेवतत्त्वतः ॥ अतस्तत्तदाराधनमपिवस्तुतोमदाराधनमेव ॥ अहमेवचतत्रफलदातापित
यापितुसाक्षान्मद्भक्तानांचतेषांचफलवैषम्यंभवतीत्याह ॥ अंतवत्त्विति ॥ अल्पमेधसां

परिच्छिन्नदृष्टीनां मयादत्तमपि तत्फलं अंतवत् विनाशि भवति ॥ तदेवाह ॥ देवान्यजंतीति देवया
जः ते देवान्तवतो यांति मद्भक्तास्तु मामनाद्यंतं परमानंदं प्राप्नुवंति ॥२३॥ ननु समाने प्रयासे च म
हति च फलविशेषे सति सर्वे किमिति देवतांतरं हित्वा त्वामेव न भजंति तत्राह ॥ अव्यक्तं प्रपंचा

अंतवत्तु फलं तेषां तद्भवत्यल्पमेधसां ॥ देवान्देवयजो यांति मद्भक्ता यांति मामपि ॥२३॥
व्यक्तं अव्यक्तं व्यक्तिमापन्नं मन्यंते मामबुद्धयः ॥ परं भावमजानंतो ममाव्ययमनुत्तमं ॥२४॥

तीतं मां व्यक्तिं मनुष्यमत्स्यकूर्मादिभावं प्राप्तम् अल्पबुद्धयो मन्यंते ॥ तत्र हेतुः ॥ परमं भावं स्वरूपं म
जानंतः ॥ कथंभूतम् अव्ययं नित्यं न विद्यते उत्तमो यस्मात् तं भावं ॥ अतो जगद्रक्षार्थं लीलया आविःकृतनाना
विशुद्धोर्जितसत्वमूर्तिं मां परमेश्वरं च कर्मनिमित्तं भौतिकदेहं देवांतरसमं पश्यंतो मंदमतयो मां ७६
नाद्रियंते प्रत्युत क्षिप्रफलं देवतांतरमेव भजंति ते चोक्तप्रकारेण अंतवत्फलं प्राप्नुवंतीत्यर्थः ॥२४॥

तेषां स्वाज्ञाने हेतुमाह ॥ नाहमिति ॥ सर्वस्य लोकस्य नाहं प्रकाशः प्रकटो न भवामि किंतु मद्भक्ताना
मेव ॥ यतो योगमायया समावृतः ॥ योगो युक्तिर्मदीयः कोप्यचिंत्यः प्रज्ञाविलासः स एव माया अघ
टमानघटनपटीयस्त्वात् तया संछन्नः ॥ अत एव मत्स्वरूपतानभिज्ञः सन्नयं लोको अजमव्ययं च

नाहं प्रकाशः सर्वस्य योगमायासमावृतः ॥ मूढोयं नाभिजानाति लोको मामजमव्ययं ॥२५
वेदाहं समतीतानि वर्त्तमानानि चार्जुन ॥ भविष्याणि च भूतानि मां तु वेद न कश्चन ॥२६॥

मां न जानाति ॥२५॥ सर्वोत्तमं मत्स्वरूपम् अजानंतः इत्युक्तं तदेवं स्वस्य सर्वोत्तमत्वम् अनावृतज्ञानशक्ति
त्वेन दर्शयन् अन्येषाम् अज्ञानम् आह ॥ वेदेति ॥ समतीतानि विनष्टानि वर्त्तमानानि च भावीनि च त्रिकालवर्त्तीनि भू
तानि स्थावरजंगमानि सर्वाण्यहं वेद जानामि मायाश्रयत्वान्मम तस्याः स्वाश्रयव्यामोहकत्वाभावात्
मां तु न कोपि वेत्ति मन्मायामोहितत्वात् प्रसिद्धं हि लोके मायायाः स्वाश्रयाधीनत्वं अन्यमोहकत्वं च ॥२६

तदेवंमायाविषयत्वेनजीवानांपरमेश्वराज्ञानमुक्तंतस्यैवाज्ञानस्यहेतुत्वेकारणमाह॥इच्छाद्वे
षसमुत्थेनेति॥सृज्यतइतिसर्गः॥सर्गेस्थूलदेहोत्पत्तौसत्यांतदनुकूलेइच्छातत्प्रतिकूलेच
द्वेषः॥ताभ्यांसमुत्थः॥समुद्भूतोयः॥शीतोष्णादीद्वंद्वनिमित्तोमोहोविवेकभ्रंशः॥तेनसर्वभूतानि
संमोहंअहमेवसुखीदुःखीचेति॥गाढतमाभिनिवेशंप्राप्नुवंतिअतस्तानिमज्ञानाभावान्मांन

इच्छाद्वेषसमुत्थेनद्वंद्वमोहेनभारत॥सर्वभूतानिसंमोहंसर्गेयांतिपरंतप॥२७॥येषां
त्वंतगतंपापंजनानांपुण्यकर्म्मणां॥तेद्वंद्वमोहनिर्मुक्ताभजंतेमांदृढव्रताः॥२८॥ ॥

जंतीतिभावः॥२७॥कुतस्तर्हिकेचनत्वांभजंतीहत्युयंते॥येषामिति॥येषांतुपुण्याचरणशी
लानांसर्वंप्रतिबंधकंपापमंतगतंनष्टंतेद्वंद्वनिमित्तेनमोहेननिर्मुक्तादृढव्रताएकांतिनःसं
तोमांभजंते॥२८॥ ॥ ७७

एवंचमांभजंतःसर्वविज्ञेयंविज्ञायकृतार्थाभवंतीत्याह॥जरामरणेति॥जरामरणयोर्निरासार्थंमामाश्रि
त्ययेप्रयतंतेतेपरंब्रह्मविदुः॥कृत्स्नमध्यात्मंचविदुः॥येनतत्प्राप्यंतदेहादिव्यतिरिक्तंशुद्धमात्मानंचजा
नंतीत्यर्थः॥तत्साधनभूतमखिलंसरहस्यंकर्मजानंति॥२९॥नैवंभूतानांयोगभ्रंशशंकापीत्याह॥साधिभूता
धिदैवमिति॥अधिभूतादिशब्दानामर्थंभगवानेवानंतराध्यायेव्याख्यापते॥अधिभूतेनाधिदैवेनचस

जरामरणमोक्षायमामाश्रित्यचयतंतिते॥तेब्रह्मतद्विदुःकृत्स्नमध्यात्मंकर्मचाखिलं॥२९॥
साधिभूताधिदैवंमांसाधियज्ञंचमांविदुः॥प्रयाणकालेपिचमांतेविदुर्युक्तचेतसः॥३०॥

हाधियज्ञेनचसहितंयेमांजानंतितेयुक्तचेतसोमय्यासक्तचेतसः॥प्रयाणकालेमरणसमयेपि
मांविदुःनतुतदाव्याकुलीभूयमांविस्मरंति॥अतोमद्भक्तानांनयोगभ्रंशशंकेत्यर्थः॥कृत्स्नभा
क्तैरयत्नेनब्रह्मज्ञानमवाप्यते॥३०॥ ॥

गीता०स०
७८

इति श्रीभगवद्गीतासूपनिषत्सु टीकायां सप्तमोऽध्यायः ॥ ७ ॥ ब्रह्मकर्माधिभूतादि विदुः कृष्णैकचेतसः । इत्यु
क्तं ब्रह्मकर्मादि स्पष्टमष्टमे उच्यते ॥ १ ॥ पूर्वाध्याये ते भगवतोपक्षिप्तानां नो ब्रह्माध्यात्मादि सप्तानां पदार्था
नां तत्त्वजिज्ञासुरर्जुन उवाच । किं तद्ब्रह्मेति ॥ द्वाभ्यां ॥ स्पष्टोऽस्यार्थः ॥ १ ॥ किंच ॥ अधियज्ञ इति ॥ अत्र देहे यो

इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे कृष्णार्जुनसंवादे विज्ञानयोगो सप्तमोऽध्यायः ॥
७ ॥ अर्जुन उवाच ॥ किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम । अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते ॥ १ ॥
अधियज्ञः कथं कोऽत्र देहेऽस्मिन्मधुसूदन । प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः ॥ २ ॥ ॥

धियज्ञो निवर्त्तते । तस्मिन्को ऽधियज्ञः । अधिष्ठाता प्रयोजकः फलदाता च क इत्यर्थः । स्वरूपं पृष्ट्वा अधिष्ठानप्रयो
जकफलदाता च क इत्यर्थः । स्वरूपं पृष्ट्वा अधिष्ठानप्रकारं पृच्छति । कथं केन प्रकारेण असौ अस्मिन् देहे स्थितो यज्ञ
मधितिष्ठतीत्यर्थः । यज्ञग्रहणं सर्वकर्मणामुपलक्षणार्थं । अंतकाले च नियतचित्तैः पुरुषैः कथं केन प्रकारेण ज्ञेयो ७८
सि ॥ २ ॥

ब्रह्मकर्मेणोत्तरं । श्रीभगवानुवाच ॥ अक्षरमिति ॥ त्रिभिः । न क्षरति न चलतीत्यक्षरं । परमं यदक्षरं जग
तो मूलकारणं ॥ तद्ब्रह्म एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदंतीति श्रुतेः ॥ स्वस्यैव ब्रह्मण एवांशतो जीव
रूपेण भवनं स्वभावः । स एवात्मानं देहमधिकृत्य भोक्तृत्वेन वर्त्तमानो ऽध्यात्मशब्देनोच्यत इत्यर्थः ॥ ।
भूतानां जरायुजादीनां भावानामुत्पत्तिः ॥ अग्नौ वस्तु ॥ आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा ॥ इत्युक्तक

श्रीभगवानुवाच ॥ अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते । भूतभावोद्भवकरो विसर्गः कर्मसंज्ञि
तः ॥ ३ ॥ अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतं । अधियज्ञोऽहमेवात्र देहे देहभृतां वर ॥ ४ ॥ ॥

मेण विहितः क्रियमाणो भावोद्भवौ करोति यो विसर्गो देवतोद्देशेन द्रव्यत्यागरूपो यज्ञः सर्वकर्मणामुपल
क्षणमेतत् स कर्मशब्दवाच्यः ॥ ३ ॥ किंच ॥ अधिभूतमिति ॥ क्षरो भावो विनश्वरो देहादिपदार्थो भूतं
प्राणिमात्रं अधिकृत्य भवतीत्यधिभूतमुच्यते पुरुषो वैराजः सूर्यमंडलमध्यवर्त्ती स्वांशभूतसर्वदे

गीता॰स॰ १२५ वतानामधिपतिः सोऽधिदैवतमुच्यते॥ स वै शरीरी प्रथमः स वै पुरुष उच्यते॥ आदिकर्त्ता स भूतानां
ब्रह्माग्रे समवर्त्ततेति श्रुतेः॥ अत्रास्मिन्देहेऽन्तर्यामित्वेन स्थितोऽहमेवाधियज्ञः यज्ञादिकर्मप्रवर्त्त
कः॥ तत्फलदाता च कथं चेत्यस्योत्तरमनेनैव बोद्धव्यं॥ अन्तर्यामिणोऽसंगत्वादिभिर्गुणैर्जीववैल
क्षण्येन देहान्तर्वर्त्तित्वस्य प्रसिद्धत्वात्॥ तथा च श्रुतिः द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते॥४

अन्तकाले च मामेव स्मरन्मुक्त्वा कलेवरं॥ यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः॥५॥ तयोरन्यः पिप्पलं

स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति॥ देहभृतां मध्ये श्रेष्ठेति संबोधयन्नुत्तममप्येवंभूतमन्तर्यामिणं पराधीनस्व
प्रवृत्तिनिवृत्त्यन्वयव्यतिरेकाभ्यां बोद्धुमर्हसीति सूचयति॥ प्रयाणकाले च कथं ज्ञेयोसीत्यनेनेष्टमन्तकाले
ज्ञानोपायं तत्फलं चाह अन्तकाल इति॥ मामेवोक्तलक्षणमन्तर्यामिरूपं परमेश्वरं स्मरन्देहं त्यक्त्वा
यः प्रकर्षेणार्चिरादिमार्गेण याति स मद्रूपतां याति॥ अत्र च संशयो नास्ति स्मरणे ज्ञानोपायो मद्भावापत्तिश्च फ १२५
लमित्यर्थः॥५॥

नकेवलं मां स्मरन्मद्भावं प्राप्नोतीति नियमः किं तर्हि॥ यमिति॥ यं यं भावं देवान्तरं वान्यदपि वा अन्त
काले स्मरन्देहं त्यजति तं तमेव स्मर्यमाणं भावं प्राप्नोति॥ अन्तकाले भावविशेषस्मरणे हेतुः
सर्वदा तस्य भावो भावना अनुचिन्तनं तेन भावितो वासितचित्तः॥६॥ यस्मात्पूर्ववासनैवान्तकाले
स्मृतिहेतुः॥ ननु तदा विवशस्य स्मरणोद्यमः संभवति॥ तस्मादिति तस्मात्सर्वदा मामनुस्म

~~[illegible]~~ यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरं॥ तं तमेवैति कौंतेय सदा तद्भावभावितः॥६॥
तस्मात्सर्वेषु कालेषु मामनुस्मर युध्य च॥ मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयः॥७॥

र्वं तयसंततस्मरणं च चित्तशुद्धिं विना न भवति॥ अतो युध्यस्व चित्तशुद्ध्यर्थं युद्धादिकं स्वध
र्मं चानुतिष्ठेत्यर्थः॥ एवं मय्यर्पितं मनः संकल्पात्मकं बुद्धिश्चाध्यवसायात्मिका येन त्वया स त्वं मामेव
प्राप्स्यसि॥ असंशयः संशयोऽत्र नास्ति॥७॥ ॥

गीता०स०
८०

सततंस्मरणस्यचाभ्यासोंतरंगंसाधनमितिदर्शयन्नाह ॥ अभ्यासेति ॥ अभ्यासःसजातीय-
प्रत्ययप्रवाहः ॥ सएवयोगउपायस्तेनयुक्तेनएकाग्रेण ॥ अतएवनान्यंविषयंगंतुंशीलंय-
स्यतेनचेतसादिव्यंद्योतनात्मकंपरमेश्वरमनुचिंतयन् ॥ हेपार्थ ॥ तमेवयाति ॥ ८ ॥ पुनरप्यनु

अभ्यासयोगयुक्तेनचेतसानान्यगामिना ॥ परमंपुरुषंदिव्यंयातिपार्थानुचिंतयन् ॥ ८ ॥
कविंपुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः ॥ सर्वस्यधातारमचिंत्यरूपमादित्य-
वर्णंतमसःपरस्तात् ॥ ९ ॥

चिंतनीयंपुरुषंविशिनष्टि ॥ द्वाभ्यां ॥ कविमिति ॥ कविंसर्वज्ञं ॥ पुराणमना-
दिसिद्धं ॥ अनुशासितारंनियंतारं ॥ अणोःसूक्ष्मादप्यणीयांसं ॥ अतिसूक्ष्मं ॥ सर्वस्यधातारंपोषकं
अपरिमितमहिमत्वात् ॥ अचिंत्यरूपं ॥ आदित्यवत्स्वप्रकाशात्मकोवर्णः स्वरूपंयस्यतं ॥ तमसः
प्रकृतेःपरस्ताद्वर्तमानं ॥ एवंभूतंपुरुषंअंतकालेभक्तियुक्तोनिश्चलेनमनसायोनुस्मरति ॥ ९ ॥ ॥ ८०

मनोनैश्चल्येहेतुः ॥ योगबलेनाधारात्सम्यक्सुषुम्नामार्गेणभ्रुवोर्मध्येप्राणमावेश्येतिसततंपुरुषंद्योत-
नात्मकंप्राप्नोतीति ॥ १० ॥ केवलादभ्यासयोगादपिप्रणवाभ्यासरूपमभ्यासमंतरंगंविधित्सुःप्रतिजानीते ॥
यदक्षरमिति ॥ यदक्षरंवेदान्तज्ञावदंति ॥ एतावाक्षरस्यप्रशासनेगार्गिसूर्याचंद्रमसौविधृतौतिष्ठ

प्रयाणकालेमनसाचलेनभक्त्यायुक्तोयोगबलेनचैव ॥ भ्रुवोर्मध्येप्राणमावेश्यसम्यक्सतंपरंपुरुषमु-
पैतिदिव्यं ॥ १० ॥ यदक्षरंवेदविदोवदंतिविशंतियद्यतयोवीतरागाः ॥ यदिच्छंतोब्रह्मचर्यंचरंतितत्तेपदंसंग्रहे-
णप्रवक्ष्ये ॥ ११ ॥ सर्वद्वाराणिसंयम्यमनोहृदिनिरुध्यच ॥ मूर्ध्न्याधायात्मनःप्राणमास्थितोयोगधारणां ॥ १२ ॥

तइतिश्रुतेः ॥ वीतोरागोयेभ्यःतेयतयः प्रयत्नवंतोयद्विशंति ॥ यत्ज्ञातुमिच्छंतोगुरुकुलेब्रह्मचर्यंचरंति
तत्तेतुभ्यंपद्यतेगम्यतेइति ॥ पदंप्राप्यंसंक्षेपेणप्रवक्ष्ये ॥ तत्प्राप्त्युपायंकथयिष्यामीत्यर्थः ॥ ११ ॥ प्र-
तिज्ञातमुपायंसांगमाह ॥ सर्वेति ॥ सर्वेंद्रियद्वाराणिसंयम्यप्रत्याहृत्यचक्षुरादिभिर्विषयग्रहणम

कुर्वन्नित्यर्थः॥ मनश्च हृदि निरुध्य बाह्यस्मरणमकुर्वन्नित्यर्थः॥ मनश्च हृदि निरुध्य बाह्यस्मरणम
कुर्वन्नित्यर्थः॥ ऊर्ध्वगया नाड्योर्ध्वमारुह्य मूर्ध्नि भ्रुवोर्मध्ये प्राणमाधाय योगस्य धारणां स्थैर्यमाश्रि
तः॥ आस्थितवान्॥१२॥ ओमित्येवैकं अक्षरं तदेव ब्रह्मवाचकत्वात् प्रतिमादिवद्ब्रह्मप्रतीकत्वाद्वा ब्र
ह्म व्याहरन्नुच्चारयेत्॥ तद्वाच्यं च मामनुस्मरन्नेव देहं त्यजन्यः प्रकर्षेण यात्यर्चिरादिमार्गेण स पर

ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्॥ यः प्रयाति त्यजन्देहं स याति परमां गतिः॥१३॥
अनन्यचेताः सततं यो मां स्मरति नित्यशः॥ तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः॥१४॥

मां श्रेष्ठां गतिं प्राप्नोति॥१३॥ एवं चान्तकाले धारणार्थः मत्प्राप्तिर्नित्याभ्यासवत एव भवति॥ नान्य
स्येति॥ पूर्वोक्तमेवानुस्मारयति अनन्येति॥ नान्यस्मिंश्चेतो यस्य तथाभूतः सन् यो मां सततं निरंतरं
नित्यशः प्रतिदिनं स्मरति॥ तस्य नित्ययुक्तस्य समाहितस्य सुखेनाहं लभ्योऽस्मि नान्यस्य॥१४॥ ॥ ८१

यद्येवं त्वं सुलभोऽसि ततः किमत आह॥ मामिति॥ उक्तलक्षणा महात्मानो मद्भक्ता मां प्राप्य पुनः दुःखाश्र
यमनित्यं च जन्म न प्राप्नुवन्ति॥ यतस्ते परमां सम्यक्सिद्धिं मोक्षमेव प्राप्ताः॥ पुनर्जन्मनो दुःखानां आलयं अस्था
नं ते मामुपेत्य न प्राप्नुवन्तीति वा॥१५॥ एतदेव सर्वेष्वपि लोकेषु पुनरावृत्तिं दर्शयन्निर्धारयति॥ आब्रह्मेति॥ ब्र
ह्मणो भवनं वासस्थानं ब्रह्मलोकस्तमभिव्याप्य सर्वे लोकाः पुनरावर्तनशीलाः॥ ब्रह्मलोकस्यापि विनाशि

मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतं॥ नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः॥१५॥ आब्रह्मभुवना
ल्लोकाः पुनरावर्तिनोऽर्जुन॥ मामुपेत्य तु कौंतेय पुनर्जन्म न विद्यते॥१६॥ त्वात्तत्रत्यानामनुत्पन्नज्ञानानाम

वश्यंभावि पुनर्जन्म॥ ये एवं क्रममुक्तिफलाभिरुपासनाभिर्ब्रह्मलोकं प्राप्तास्तेषामेव तत्रोत्पन्नज्ञानानां ब्रह्म
णा सह मोक्षो नान्येषां॥ मामुपेत्य वर्तमानानां तु पुनर्जन्म नास्त्येवेत्यर्थः॥१६॥ ननु तपस्विनो दानशीलाः
वीतरागास्तितिक्षवः॥ त्रैलोक्यादुपरिस्थानं लभन्ते शोकवर्जितमित्यादिपुराणवाक्यैः त्रैलोक्याः सकाशान्म

ह्मलोकादीनामुत्कृष्टंगम्यते॥ विनाशित्वेचसर्वेषामविशिष्टेकथमसौविशेषःस्यादित्याशंक्याब्रह्म
ल्यचस्थायित्वनिमित्तोसौविशेषइत्याशयेनस्वमानेनशतवर्षायुषोब्रह्मणोऽहन्यहनित्रैलोक्यो
त्पत्तिर्निशिचप्रलयोभवतीतिदर्शयिष्यन्ब्रह्मणोऽहोरात्रयोःप्रमाणमाह॥ सहस्रेति॥ सहस्रंयुगा
निपर्यंतोऽवसानंयस्यतद्ब्रह्मणोयदहस्तद्येविदुः॥ युगसहस्रमंतोयस्यास्तांरात्रिंचयोगबलेनयेवि

सहस्रयुगपर्यन्तमहर्यद्ब्रह्मणोविदुः॥ रात्रिंयुगसहस्रांतांतेऽहोरात्रविदोजनाः॥ १७॥ ॥

दुस्तएवसर्वज्ञाजनाअहोरात्रविदः॥ येषांतुकेवलंचंद्रार्कगत्यैवज्ञानंतेतथाअहोरात्रविदोनभवंति
अल्पदर्शित्वात्॥ युगशब्देनात्रचतुर्युगमभिप्रेतंचतुर्युगसहस्रेणतुब्रह्मणोदिनमुच्यते॥ इत्यादि
पुराणोक्तेर्ब्रह्मणइति॥ महर्लोकादिकल्पनयाद्वादशभिर्वर्षसहस्रैश्चतुर्युगंभवति॥ चतुर्युगसहस्रंच
ब्रह्मणोदिनं॥ तावत्परिमाणैवरात्रिः॥ तादृशैश्चाहोरात्रैःपक्षमासादिक्रमेणवर्षशतंब्रह्मणःपरमायुरिति॥ १७ ८२

ततःकिमतआह॥ अव्यक्तादिति॥ कार्यस्याव्यक्तंरूपंकारणात्मकंतस्मादव्यक्तात्कारणरूपात्
व्यज्यंतइतिव्यक्तयश्चराचराणिभूतानिप्रादुर्भवंति॥ कदाअहरागमेब्रह्मणोदिनस्योपक्रमे॥
तथारात्र्यागमेतस्मिन्नेवाव्यक्तसंज्ञके॥ कारणरूपेप्रलयंयांति॥ यदातेऽहोरात्रविदइत्येतद्विधीय
ते॥ किंवातेप्रसिद्धाहोरात्रविदोजनाः॥ यद्ब्रह्मणोऽहर्विदुस्तस्याऽहरागमेऽव्यक्तात्व्यक्तयःप्रभवंति

अव्यक्ताद्व्यक्तयःसर्वाःप्रभवंत्यहरागमे॥ रात्र्यागमेप्रलीयंतेतत्रैवाव्यक्तसंज्ञके॥ १८॥
भूतग्रामःसएवायंभूत्वाभूत्वाप्रलीयते॥ रात्र्यागमेऽवशःपार्थप्रभवत्यहरागमे॥ १९॥ ॥

यांचरात्रिंविदुस्तस्याविच्छेदंदर्शयति॥ १८॥ भूतग्रामेति॥ भूतानांचराचरप्राणिनांग्रामःसमूहो
यःप्रागासीत्सएवायंअहरागमेभूत्वाभूत्वारात्र्यागमेप्रलीयप्रलीयपुनरप्यहरागमेऽवशःकर्मादि
परतंत्रःप्रभवतीतिनान्यइत्यर्थः॥ १९॥ ॥

लोकानामनित्यत्वं प्रपंच्य परमेश्वरस्वरूपस्य नित्यत्वं प्रपंचयंति ॥ परइति ॥ द्वाभ्यां ॥ तस्माच्चराचर
कारणभूतादव्यक्तात्यस्तस्यापिकारणभूतोऽन्यस्तद्विलक्षणोऽव्यक्तश्चक्षुराद्यगोचरोभावः सना
तनोऽनादिः ॥ सतु सर्वेषु कार्यकारणलक्षणेषु भूतेषु नश्यत्स्वपि न विनश्यति ॥ २० ॥ स्वविनाशे प्रमाणं

परस्तस्मात्तु भावोन्योव्यक्तोव्यक्तः सनातनः ॥ यःसर्वेषु सभूतेषु नश्यत्सु न विनश्यति ॥ २० ॥
अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिं ॥ यं प्राप्य न निवर्त्तंते तद्धाम परमं मम ॥ २१ ॥

दर्शयन्नाह ॥ अव्यक्त इति ॥ यो भावोऽतींद्रियोऽक्षरः प्रदेशनाशशून्य इति ॥ तथाक्षरात्संभव
तीदं विश्वं इत्यादिश्रुतिषु यदक्षर इत्युक्तः तं परमां गतिं गम्यं पुरुषार्थमाहुः पुरुषान्नपरं किंचि
त्सा काष्ठा स परा गतिरित्यर्थः ॥ यं प्राप्य पुनर्न निवर्त्तंते इति तन्ममेव धामस्वरूपम् अतोहमेव
परमा गतिरित्यर्थः ॥ २१ ॥ ॥

तत्प्राप्तौ च भक्तिरंतरंगोपाय इत्युक्तमेवेत्याह ॥ पुरुष इति ॥ स एवाहं परः पुरुषः ॥ अनन्यया एकांतभ
क्त्यैव लभ्यो नान्यथा ॥ परत्वमेवाह ॥ यस्य कारणभूतस्यांतर्मध्ये भूतानि स्थितानि येन च कारणभूतेन सर्व
मिदं जगत्ततं व्याप्तं ॥ २२ ॥ एवं परमेश्वरोपासकास्तत्पदं प्राप्य न निवर्त्तंते ॥ अन्ये चावर्त्तंत इत्युक्तं ॥ तत्र के
न मार्गेण गता आवर्त्तंत इत्यपेक्षायामाह यत्रेति ॥ यत्र यस्मिन्काले प्रयाता योगिनोऽनावृत्तिं यांति ॥ यस्मिं

पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ॥ यस्यांतस्थानि भूतानि येन सर्वमिदं ततं ॥ २२ ॥ ॥
यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः ॥ प्रयाता यांति तं कालं वक्ष्यामि भरतर्षभ ॥ २३ ॥

श्च काले प्रयाता आवृत्तिं यांति तं कालं वक्ष्यामीत्यन्वयः ॥ अत्र च रश्म्यनुसारी ॥ अतश्चायने द
क्षिणे इति सूत्रितन्यायेनोत्तरायणादिकालविशेषमरणस्याविवक्षितत्वात्कालशब्देन कालाभिमा
निनोभिरतिवाहिकाभिर्देवताभिः प्राप्यो मार्ग उपलक्ष्यते ॥ अतोऽयमर्थः ॥ यस्मिन्कालाभिमानिनी

देवतोपलक्षिते मार्गे प्रयाता योगिनः ॥ उपासकाः कर्मिणश्च यथाक्रममनावृत्तिमावृत्तिं यान्ति ।
तं कालाभिमानिनीदेवतोपलक्षितं मार्गं कथयिष्यामीति । अग्निर्ज्योतिषोः अभिमानित्वात्कालत्वे
ऽभावेपि भूयसामहरादिशब्दोक्तानां कालाभिमानित्वाभावेपि भूयसामहरादिशब्दोक्तानां का-
लाभिमानित्वात्साहचर्याद्वाम्रवणमित्यादिवत्कालशब्देनोपलक्षणं मन्दिकृत्वं ॥ २३ ॥ तत्रा-

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणं ॥ तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥ २४ ॥

नावृत्तिमार्गमाह ॥ अग्निरिति ॥ अग्निर्ज्योतिःशब्दाभ्यां तेर्चिषमभिसंभवन्तीति श्रुत्युक्तार्चिरभिमानिनी देवतोपल-
क्ष्यते अहरिति दिवसाभिमानिनी शुक्ल इति ॥ शुक्लपक्षाभिमानिनी उत्तरायणरूपाः षण्मासा इत्युत्तरायणाभिमानि-
नी एतच्चान्यासामपि श्रुत्युक्तानां संवत्सरदेवलोकादिदेवतानामुपलक्षणार्थं ॥ एवंभूतो यो मार्गस्तत्र प्रया-
ता भगवदुपासका जना ब्रह्म प्राप्नुवन्ति ॥ तथा च श्रुतिः ॥ तेर्चिषमभिसंभवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षा-
द्यान् षण्मासानुदङ्ङादित्य एति मासेभ्यो देवलोकमित्यादि ॥ २४ ॥ ॥

आवृत्तिमार्गमाह ॥ धूम इति ॥ धूमाभिमानिनी देवता ॥ रात्र्यादिशब्दैश्च पूर्ववदेव रात्रिकृष्णपक्षदक्षिणायन-
रूपषण्मासाभिमानिन्यस्तिस्रो देवता लक्ष्यन्ते ॥ एताभिर्देवताभिरुपलक्षितो यो मार्गस्तत्र प्रयाता कर्मी
योगी चान्द्रमसं ज्योतिस्तदुपलक्षितं स्वर्गलोकं प्राप्य तत्रेष्टापूर्तकर्मफलं भुक्त्वा पुनरावर्तते ॥ अत्रापि श्रु-
तिः ॥ ते धूममभिसंभवन्तीत्यादि ॥ तदेवं निवृत्तकर्मसहितोपासनया क्रममुक्तिः ॥ काम्यकर्मभिः स्वर्गभो-

धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनं ॥ तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते ॥ २५ ॥
शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते ॥ एकया यात्यनावृत्तिमन्ययावर्तते पुनः ॥ २६ ॥ गानंतरमा-

वृत्तिः ॥ निषिद्धकर्मभिस्तु नरकभोगानंतरमावृत्तिः ॥ शुभकर्मणा तु जन्तुनामत्रैव पुनःपुनर्जन्मेति द्रष्टव्यं
२५ ॥ उक्तौ मार्गावुपसंहरति ॥ शुक्लेति ॥ शुक्लार्चिरादिगतिः प्रकाशमयत्वात् ॥ कृष्णा धूमादिगतिः ॥
तमोमयत्वात् ॥ एते गती मार्गौ ज्ञानकर्माधिकारिणो जगतः शाश्वते नित्ये संसारस्यानादित्वात्

तयोरेकया शुक्लयानावृत्तिं मोक्षं याति अन्यया कृष्णया तु पुनरावर्त्तते ॥२६॥ मार्गज्ञानफलं दर्श-
यन् भक्तियोगमुपसंहरति ॥ नैत इति ॥ एते सृती मार्गौ पार्थ मोक्षसंसारप्रापकौ जानन् कश्चिदपि यो-
गी न मुह्यति ॥ सुखबुद्ध्या स्वर्गादिफलं न कामयते किंतु ॥ परमेश्वरनिष्ठ एव भवतीत्यर्थः ॥ स्पष्टमन्यत् ॥ श्र

नैते सृती पार्थ जानन् योगी मुह्यति कश्चन ॥ तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन ॥२७॥
वेदेषु यज्ञेषु तपःसु चैव दानेषु यत्पुण्यफलं प्रदिष्टं ॥ प्राप्नोति तत्सर्वमिदं विदित्वा योगी परं स्थानमुपैति चा-
द्यं ॥२८॥ अध्यायार्थमष्टप्रश्नार्थनिर्णयं सफलमुपसंहरति ॥ वेदेष्विति ॥ वेदेषु अध्ययनादिभिः ॥ तपः-
सु कायशोषणादिभिः ॥ दानेषु सत्पात्रार्पणादिभिः ॥ यत्पुण्यफलं चोपदिष्टं शास्त्रेषु तत्सर्वमत्येति ततः
श्रेष्ठं योगैश्वर्यं प्राप्नोति ॥ किं वा तादृशमष्टप्रश्नार्थनिर्णयेनोक्तं तत्त्वं विदित्वा ॥ ततश्च योगी ज्ञानी भूत्वा पर-
मनुत्कृष्टं योगैश्वर्यं प्राप्नोति ॥ किंच ॥ आद्यं जगन्मूलभूतं स्थानं विष्णोः परं पदं प्राप्नोति ॥२८॥ ॥

अष्टमे तु विशिष्टोक्तसंदृष्टार्थविनिर्णयैः ॥ अक्लिष्टमिष्टधामाप्तिः स्पष्टिता कृष्णवर्त्मना ॥२९॥ इ-
ति श्रीभगवद्गीतासुबोधिन्यां टीकायां श्रीधरविरचितायां अष्टमोऽध्यायः ॥८॥ परेशः प्राप्यते शुद्धभक्त्यैवे-
ति नवमे ॥ नवमे तु तदैश्वर्यमत्याश्चर्यं प्रपंच्यते ॥१॥ एवं तावत्सप्तमाष्टमयोः स्वीयं परमेश्वरीयं तत्त्वं भ-
क्त्यैव सुलभं नान्यथेत्युक्तं ॥ इदानीमचिंत्यं स्वकीयमैश्वर्यमत्याश्चर्यं भक्तेश्चासाधारणं प्रपंचयिष्यन् ॥

इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे महापुरुषयोगो अष्टमोऽध्या-
यः ॥८॥ श्रीभगवानुवाच ॥ इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ॥ ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥१॥

श्रीभगवानुवाच ॥ इदं त्विति ॥ विशेषेण ज्ञायतेऽनेनेति विज्ञानं उपासनं तत्सहितं ज्ञानमीश्वरविषयमिदं ॥ अ-
नसूयवे ॥ पुनःपुनः स्वमाहात्म्यमेवोपदिशति ॥ इत्येवं परमकारुणिकेऽपि दोषदृष्टिरहिताय तुभ्यं वक्ष्यामि तु-
शब्दो वैशिष्ट्ये ॥ तदेवाह ॥ गुह्यतममित्यादिना ॥ गुह्यं धर्मज्ञानं ततो देहादिव्यतिरिक्तमात्मज्ञानं गुह्यतरं ततो

पिपरमात्मज्ञानंगुह्यतमं॥ ततोपरमात्मज्ञानमितिरहस्यत्वात्ज्ञातान्अशुभात्संसारात्सद्य एवमुक्तोभविष्यसि॥१॥ किंचराजविद्येति॥ इदंज्ञानंराजविद्याविद्यानांराजगुह्यानांचराजाविद्यासुगोप्येषुचअतिश्रेष्ठमित्यर्थः॥ राजदंतादित्वादुपसर्जनस्यपरत्वं॥ उत्तममपवित्रमिदंअत्यंतंपावनमिदं॥ प्रत्यक्षावगमंच॥ दृष्टफलंधर्म्यंधर्मादि

राजविद्याराजगुह्यंपवित्रमिदमुत्तमं॥ प्रत्यक्षावगमंधर्म्यंसुसुखंकर्तुमव्ययं॥२॥ अश्रद्दधानाः पुरुषाधर्मस्यास्यपरंतप॥ अप्राप्यमांनिवर्त्तंतेमृत्युसंसारवर्त्मनि॥३॥

नपेतंसुर्वधर्मफलत्वात् २॥ कर्त्तुंसुसुखंचसुखेनकर्त्तुंशक्यमित्यर्थः॥ अव्ययंअव्ययंअक्षय्यफलत्वात्॥ ननेवमस्यातिसुकरत्वेकेनामसंसारिस्युः॥ तत्राह॥ अश्रद्दधानाइति॥ अस्यभक्तिसहितज्ञानलक्षणस्यधर्मस्येति॥ कर्मणिषष्ठी॥ इमंधर्ममश्रद्दधानाआस्तिक्येनास्वीकुर्वंतः॥ उपायांतरेणमत्प्राप्तयेकृतप्रयत्नाअपिमामप्राप्यमृत्युयुक्तेसंसारवर्त्म~~नि~~मितिनिवर्त्तंत्येमृत्युव्याप्तेसंसारमार्गेपरिभ्रमंतीत्यर्थः॥३॥ ॥

८६

तदेवंवक्ष्यतयाप्रस्तुतस्यज्ञानस्यस्तुत्याश्रोतारमभिमुखीकृत्यतदेवज्ञानंकथयति॥ मयेति॥ मया॥ अव्यक्तातींद्रियमूर्त्तिःस्वरूपंयस्यताद्दृशेनमयाकारणभूतेनसर्वमिदंजगत्॥ ततंव्याप्तं॥ अतएवकारणभूतेमयितिष्ठंतीति॥ मत्स्थानिसर्वाणिचराचराणिभूतानि॥ एवमपिघटपटादिषु सर्वेषुकार्येषुमृत्तिकेवतेषुभूतेषुनाहमवस्थितः॥ असंगत्वात्॥४॥ किंच॥ नचेति॥ नचमत्स्थानि

मयाततमिदंसर्वंजगदव्यक्तमूर्त्तिना॥ मत्स्थानिसर्वभूतानिनचाहंतेष्ववस्थितः॥४॥ नचमत्स्थानिभूतानिपश्यमेयोगमैश्वरं॥ भूतभृन्नचभूतस्थोममात्माभूतभावनः॥५॥ ॥

तानिभूतानि॥ असंगत्वादेवमे॥ ननुतर्हिव्यापकत्वमाश्रयत्वंचपूर्वोक्तंविरुद्धमित्याह॥ मे ऐश्वरमसाधारणंयोगंयुक्तिंअघटितघटनाचातुर्यमिदंपश्यमदीययोगमायावैभवस्याचिंत्यत्वात्किंचिद्विरुद्धमित्यर्थः॥ अन्यदप्याश्चर्यंपश्येत्याह॥ भूतानिबिभर्त्तिधारयतीतिभूतभृत्

भूतानि भावयति पालयतीति भूतभावनः ॥ एवंभूतोपि ममात्मा परं स्वरूपं भूतस्थो न भवति ॥ अयं भावः
यथा जीवो देहे बिभ्रत् पालयंश्चाहंकारेण तत्संश्लिष्टस्तिष्ठति । एवं महं भूतानि धारयन् पालयन्नपि निरंतो
धुतिष्ठामि निरहंकारत्वादिति ॥५॥ असंश्लिष्टयोरप्याधाराधेयभावं दृष्टांतेनाह । यथेति ॥ अवकाशं वि

यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान् ॥ तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ॥
६ ॥ सर्वभूतानि कौंतेय प्रकृतिं यांति मामिकां ॥ कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहं ॥७॥

नावस्थानानुपपत्तेः ॥ नित्यमाकाशस्थितो वायुः सर्वत्रगतोपि महानपि नाकाशेन संश्लिष्यते ॥ निरवय
त्वेन संश्लेषायोगात् ॥ तथा सर्वाणि भूतानि मयि स्थितानि जानीहि ॥६॥ तदेवमसंगस्यैव योगमा
यया स्थितिहेतुत्वमुक्तं ॥ तथैव सृष्टिप्रलयहेतुत्वं चाह ॥ सर्वेति ॥ कल्पक्षये प्रलयकाले सर्वाणि भू
तानि मदीयां प्रकृतिं यांति त्रिगुणात्मिकायां लीयंते । पुनः कल्पादौ सृष्टिकाले तानि विशेषेण सृजामि ॥७॥ ८७

नन्वसंगो निर्विकारश्च त्वं कथं सृजसीत्यपेक्षायामाह ॥ प्रकृतिमिति द्वाभ्यां ॥ स्वीयां स्वाधीनां
प्रकृतिमवष्टभ्याधिष्ठाय प्रलये लीनं संतं चतुर्विधमिमं सर्वं भूतग्रामं कर्मादिवशात् पुनः पुनः
विसृजामि विविधं सृजामि ॥ कथं प्रकृतेर्वशात् प्राचीनकर्मनिमित्तात् तत्स्वभाववशात् ॥ ८
नन्वेवं नानाविधानि कर्माणि कुर्वतस्तव जीववद्बंधः कथं न स्यादित्याशंक्याह ॥ तन्वेति ॥

प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः ॥ भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥ ८ ॥ न
च मां तानि कर्माणि निबध्नंति धनंजय ॥ उदासीनवदासीनमसक्तं तेषु कर्मसु ॥ ९ ॥ ॥

तानि सृष्ट्यादीनि कर्माणि मां न निबध्नंति ॥ कर्मासक्तिर्हि बंधहेतुः ॥ सा चाप्तकामत्वान्मम नास्ति
अत उदासीनवद्वर्तमानस्य मे बंधं नापादयंति ॥ उदासीनत्वे कर्तृत्वानुपपत्तेः ॥ कर्तृत्वे चो
दासीनत्वानुपपत्तेः ॥ उदासीनवत्स्थितमित्युक्तं ॥ ९ ॥ ॥

तदेवोपपादयति॥ मयेति॥ मयाधिष्ठात्रा निमित्तभूतेन प्रकृतिः सचराचरं विश्वं सूयते
जनयति॥ अनेनाधिष्ठानेन हेतुनाहं हेतुं जगद्विपरिवर्तते पुनःपुनर्जायते सन्निधिमात्रे-
णाधिष्ठातृत्वात्कर्तृत्वमुपेक्षकत्वं चाविरुद्धमिति भावः॥ १०॥ नन्वेवंभूतं परमेश्वरत्वं कि-

मयाध्यक्षेण प्रकृतिः सूयते सचराचरं॥ हेतुनानेन कौंतेय जगद्विपरिवर्तते॥ १०॥
अवजानंति मां मूढा मानुषीं तनुमाश्रितं॥ परं भावमजानंतो मम भूतमहेश्वरं॥
॥ ११॥

मिति॥ केचिन्नाद्रियंते तत्राह॥ अवजानंतीति॥ सर्वभूतमहेश्वररूपं म-
दीयं परमं तत्त्वमजानंतो मूढा मामवमन्यंते॥ अवज्ञाने हेतुः॥ शुद्धसत्त्वमयीमपि तनुं त्वा-
त्मेच्छावशान्मनुष्याकारमाश्रितवंतं॥ ११॥ ॥

किंच॥ मोघाशा इति॥ मत्तोऽन्यद्देवतांतरं क्षिप्रं फलं दास्यतीत्येवं मोघीभूता निःफलैवाशा येषां ते॥ अत ए-
व मद्विमुखत्वान्मोघानि व्यर्थानि कर्माणि येषां ते॥ मोघमेव नानाकुतर्काश्रितं शास्त्रज्ञानं येषां ते॥ अ-
तएव विचेतसो विक्षिप्तचित्ताः॥ सर्वत्र हेतुः॥ राक्षसीं तामसीं हिंसादिप्रचुरां॥ आसुरीं च कामदर्पादि-
बहुलां मोहिनीं बुद्धिभ्रंशकरीं प्रकृतिं स्वभावमाश्रिताः संतो मामवजानंतीति पूर्वेणैवान्वयः॥ १२॥ केच-

मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः॥ राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः॥ १२॥
महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः॥ भजंत्यनन्यमनसो ज्ञात्वा भूतादिमव्ययं॥ १३॥

हि त्वामाराधयंतीत्याह॥ महात्मानस्त्विति॥ केऽपि महात्मानः कामाद्यनभिभूतचित्ताः॥ यतः अभयं सत्त्वसंशु-
द्धिरित्यादिना॥ वक्ष्यमाणां दैवीं प्रकृतिमाश्रिताः॥ अत एव मद्व्यतिरेकेण नान्यस्मिन्मनो येषां ते॥ भूतादि-
जगत्कारणमव्ययं नित्यं च मां ज्ञात्वा भजंति॥ १३॥ तेषां भजनप्रकारमाह॥ सततमिति॥ सर्वदा स्तोत्रमंत्रै-

दिभिः कीर्त्तयंतः केचिन्मामुपासते ॥ दृढानि व्रतानि येषां ते दृढव्रताः सन्तो यतंतः ईश्वरपूजादिषु यत्नं कुर्व
तः केचिद्भक्त्या नमस्यन्तः प्रणमंतः मामित्येव नित्ययुक्ताः अवहिताः सेवंते भक्त्येति नित्ययुक्ता इति च कीर्त्तनादि
षु पि द्रष्टव्यं ॥ १४ किंच ज्ञानेति वासुदेवः सर्वमित्येवं सर्वात्मदर्शनं ज्ञानं तदेव यज्ञस्तेन यज्ञेन यजन्तो मां पूजय

सततं कीर्त्तयन्तो मां यतंतश्च दृढव्रताः ॥ नमस्यंतश्च मां भक्त्या नित्ययुक्ता उपासते ॥ १४ ॥ ज्ञानयज्ञेन चाप्यन्ये य
जन्तो मामुपासते ॥ एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखं ॥ १५ ॥ अहं क्रतुरहं यज्ञः स्वधाहमहमौषधं ॥ मंत्रो
ऽहमहमेवाज्यमहमग्निरहं हुतं ॥ १६ ॥

न्तोप्यन्येप्युपासते ॥ तत्रापि केचिदेकत्वेन अभेदभावनया केचित्पृथक्त्वेन
दासोऽहमिति केचित्तु विश्वतोमुखं सर्वात्मकं मां बहुधा ब्रह्मरुद्रादिरूपेणोपासते ॥ १५ ॥ सर्वात्मतां प्रपंचयति ॥
अहमिति ॥ चतुर्भिः क्रतुः श्रौतोऽग्निष्टोमादिः यज्ञस्तु स्मार्त्तः पंचयज्ञादिः स्वधा पित्रर्थं श्राद्धादिः औषधमौषधान्न ८९
ममन्नं भेषजं वा ॥ मंत्रो याज्यापुरोनुवाक्यादिः ॥ आज्यं होमादिसाधनं ॥ अग्निराहवनीयादिः हुतं होमः एतत्सर्वमहमेव १६

किंच ॥ पितेति ॥ धाता कर्मफलविधाता वेद्यं ज्ञेयं वस्तु पवित्रं शोधकं ॥ ऋग्वेदादयो वेदास्त्वहमेव ॥
स्पष्टमन्यत् ॥ १७ ॥ किंच ॥ गतिरिति ॥ गम्यत इति गतिः फलं भर्त्ता पोषणकर्त्ता प्रभुर्नियंता ॥ साक्षी शुभा
शुभद्रष्टा निवासः भोगस्थानं शरणं रक्षकः सुहृत् हितकर्त्ता ॥ प्रकर्षेण भवत्यनेनेति प्रभवः
स्रष्टा प्रलीयतेऽनेनेति प्रलयः संहर्त्ता ॥ तिष्ठत्यस्मिन्निति स्थानं आधारः निधीयतेऽस्मिन्निति निधानं ल

पिताहमस्य जगतो माता धाता पितामहः ॥ वेद्यं पवित्रमोंकार ऋक्साम यजुरेव च ॥ १७ ॥ गति
र्भर्त्ता प्रभुः साक्षी निवासः शरणं सुहृत् ॥ प्रभवः प्रलयः स्थानं निधानं बीजमव्ययं ॥ १८ ॥

यस्थानं ॥ बीजं कारणं ॥ तथाप्यव्ययं ॥ अविनाशि न तु व्रीह्यादिबीजवन्नश्वरमित्यर्थः ॥ १८ ॥ किंच ॥
तपामीति ॥ आदित्यात्मनास्थितानि दावसमये तयाभिर्जगतस्तापं करोति ॥ कदाचित्तु वर्षं निगृह्णामि आ
कर्षामि ॥ अमृतं च जीवनं ॥ मृत्युश्च नाशः ॥ सत्स्थूलं दृश्यं ॥ असच्च सूक्ष्ममदृश्यं ॥ एतत्सर्वमहमेवेति ॥

मत्वा मामेव बहुधा उपासत इति पूर्वेणैवान्वयः ॥१९॥ तदेवमवजानंति मां मूढा इति श्लोकद्वयेनाक्षि
प्रकृत्याश्रयादेवदेवतांतरंभजंतो मां नाभियंतीत्यभक्ता दर्शिताः ॥ महात्मानस्तु मां पार्थेत्यादिना च भ
क्ताः ॥ तत्रैकत्वेन पृथक्त्वेन चापरमेश्वरं ये न भजंति तेषां जन्मप्रवाहो दुर्वार इत्याह ॥ द्वाभ्यां ॥ त्रैविद्या मामि

तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च ॥ अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन ॥१९॥ त्रैविद्या
मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयंते ॥ ते पुण्यमासाद्य सुरेंद्रलोकमश्नंति दिव्यान्दिवि देवभोगा
न् ॥२०॥
ति ॥ ऋग्यजुःसामलक्षणास्तिस्रो विद्या येषां ते त्रिविद्याः ॥ त्रिविद्या एव त्रैविद्याः स्वार्थे तद्धितः ॥
तिस्रो विद्या अधीयंते जानंतीति वा ॥ त्रैविद्या वेदोक्तकर्मपरा इत्यर्थः ॥ वेदत्रयविहितैर्यज्ञैर्मामिष्ट्वा मामे
वरूपं देवांतरमित्यजानंतोपि वस्तुतः इंद्रादिरूपेण मामेवेष्ट्वा संपूज्य यज्ञशेषं सोमं पिबंतीति सोमपाः
ते नैव पूतपापाः शोधितकल्मषाः संतः स्वर्गतिं स्वर्गं प्रति गतिं प्रार्थयंते ॥२०॥

ते पुण्यफलरूपं सुरेंद्रलोकं स्वर्गमासाद्य प्राप्य दिवि स्वर्गे दिव्यानुत्तमान्देवानां भोगानश्नंति ॥ भुंजते ते तं
भुक्त्वेति ॥ ते स्वर्गकामास्तेन प्रार्थितं विपुलं स्वर्गलोकं तत्सुखं भुक्त्वा भोगप्रापके पुण्ये क्षीणे सति मर्त्य
लोकं प्रविशंति पुनरप्येवमेव वेदत्रय्या विहितं धर्ममनुसृताः ॥ कामकामा भोगानुगतागतं लभंते मद्भक्ता
स्तु मत्प्रसादेन कृतार्था भवंति ॥२१॥ अनन्येति ॥ अनन्या नास्ति मद्भक्तिं विना अन्यत्काम्यं च येषां तथाभूता

ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशंति ॥ एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामा
कामा लभंते ॥२१॥ अनन्याश्चिंतयंतो मां ये जनाः पर्युपासते ॥ तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहं ॥२२

ये जना मां चिंतयंतः सेवंते तेषां नित्याभियुक्तानां सदा मदेकनिष्ठानां योगं धनादिलाभं क्षेमं च तत्पालनं मो
क्षं स्वयमेव तैरप्रार्थितमप्यहमेव वहामि प्रापयामि ॥२२॥ ननु त्वद्व्यतिरेकेण वस्तुतो देवतांतरस्याभावादिंद्रादि
सेवितोपि त्वद्भक्ता एवेति कथं ते गतागतं लभंते इत्यत्राह ॥ येपीति ॥ श्रद्धयोपेताः संतो येपि जनाः ॥ यजंतेन्यदेव

गीता॰सं॰ ताइंद्रादिरूपाय यजंति ॥ तेपि मामेव यजंतीति सत्यं ॥ किंतु ॥ अविधिपूर्वकं मोक्षप्रापकं विधिं विना यजंति ॥
९१ अतस्ते पुनरावर्त्तंते ॥२३॥ एतदेव विवृणोति ॥ सर्वेषां यज्ञानां तत्तद्देवतारूपेणाहमेव भोक्ता प्रभुश्च स्वामी फ
लदाता चाहमेवेत्यर्थः ॥ एवंभूतं मां ते तत्त्वेन यथावन्नाभिजानंति अतश्च्यवंते पुनरावर्त्तंते ॥२४॥ ये तु सर्वदेवता

येप्यन्यदेवताभक्ता यजंते श्रद्धयान्विताः ॥ तेपि मामेव कौंतेय यजंत्यविधिपूर्वकं ॥२३॥ अहं हि स
र्वयज्ञानां भोक्ता च प्रभुरेव च ॥ न तु मामभिजानंति तत्त्वेनातश्च्यवंति ते ॥२४॥ यांति देवव्रता देवा
न्पितॄन्यांति पितृव्रताः ॥ भूतानि यांति भूतेज्या यांति मद्याजिनोपि मां ॥२५॥

सु मामेवांतर्यामिणं पश्यंतो
यजंति ते नावर्त्तंते ॥ तदेवोपपादयति यांतीति ॥ देवेष्विंद्रादिषु व्रतं नियमं येषां ते व्रतवंतो देवान्यांति
पितृषु व्रतं येषां श्राद्धादिक्रियापरायणास्ते पितॄन्यांति भूतेषु विनायकमातृकादिषु इज्या पूजा येषां ते
भूतानि यांति ॥ मां यष्टुं शीलं येषां ते मद्याजिनस्ते तु मामेवाक्षयं परमानंदरूपं यांति ॥२५॥ ९१

तदेवं स्वभक्तानामक्षयफलत्वमुक्तं ॥ अनायासत्वं च स्वभक्तेर्दर्शयति ॥ पत्रमिति ॥ पत्रपुष्पादिमात्रम
पि मह्यं भक्त्या प्रीत्या यः प्रयच्छति ॥ तस्य प्रयतात्मनः शुद्धचित्तस्य निःकामभक्तस्य तत्पत्रपुष्पादिकं तेन भ
क्त्योपहृतं समर्पितं ॥ अहमश्नामि प्रीत्या गृह्णामि ॥ न हि महाविभूतिपतेः परमेश्वरस्य मम क्षुद्रदेवतानामि
व बहुवित्तसाध्यैर्यागादिभिः परितोषः स्यात् किंतु भक्तिमात्रेण ॥ अतो भक्त्या समर्पितेन यत्किंचित्पत्रा

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ॥ तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥२६॥ यत्करो
षि यदश्नासि यज्जुहोषि ददासि यत् ॥ यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणं ॥२७॥

दिमात्रमपि तद
नुग्रहार्थमेवं गृह्णामीति भावः ॥ न च पत्रपुष्पादिकमपि यज्ञार्थं पशुसोमादिद्रव्यवत् ॥२६॥ मदर्थमे
वोद्यवैराग्याद्यैः समर्पणीयं किं तर्हि ॥ यदिति ॥ स्वभावतो वा शास्त्रतो वा यत्किंचित्कर्म करोषि ॥ तथा
यदश्नासि ॥ यज्जुहोषि यद्ददासि यत्तपस्यसि तपः करोषि तत्सर्वं मय्यर्पणं यथा भवत्येवं कुरुष्व ॥२७॥ ॥

गीता०स० १८२ एवंयत्फलंप्राप्स्यसितच्छृणु॥ शुभेति॥ एवंकुर्वन्कर्मबंधनैः कर्मनिमित्तैरिष्टानिष्टफलैर्मुक्तोभविष्यसि
कर्मणांमयिसमर्पितत्वेनतत्फलसंबंधानुपपत्तेः॥ तैश्चमुक्तःसन्॥ संन्यासयोगयुक्तात्मासंन्यास
कर्मणांसएवयोगस्तेनयुक्तःआत्माचित्तंयस्यतथाभूतस्त्वंमांप्राप्स्यसि॥२८॥ यदिभक्तेभ्यएवमोक्षं

शुभाशुभफलैरेवंमोक्ष्यसेकर्मबंधनैः॥ संन्यासयोगयुक्तात्माविमुक्तोमामुपैष्यसि॥२८॥
समोहंसर्वभूतेषुनमेद्वेष्योस्तिनप्रियः॥ येभजंतितुमांभक्त्यामयितेतेषुचाप्यहं॥२९॥

ददासिनाभक्तेभ्यस्तर्हितवापिकिंरागद्वेषादिकृतंवैषम्यमस्तिनेत्याह॥ समइति॥ समोहंसर्वेषु
भूतेषु॥ अतोमेप्रियश्चद्वेष्यश्चनास्त्येव॥ एवंसत्यपियेमांभजंतिभक्त्यामयिवर्तंते॥ अहमपितेष्व
नुग्रहकतयावर्ते॥ अयंभावः॥ यथाग्नेःस्वसेवकेष्वेवतमःशीतादिदुःखमपाकुर्वतोनवैषम्यंयथावाकल
ल्पवृक्षस्यतथैवभक्तपक्षपातिनोममनास्त्येववैषम्यं॥ किंतु॥ मद्भक्तेरेवायंमहिमेति॥२९॥ ॥ १८२

अपिचमद्भक्तेरचिंत्यःप्रभावइतिदर्शयन्नाह॥ अपिचेदिति॥ अत्यंतंदुराचारोपिपृथक्त्वेनदेवतांतर
भक्तिमकुर्वन्मामेवश्रीनारायणंभजतितर्हिसाधुःश्रेष्ठएवसमंतव्यः॥ यतोसौसम्यग्व्यवसितःशोभ
नमध्यवसायंकृतवान्॥३०॥ ननुकथंसमीचीनाध्यवसायमात्रेणसाधुर्मंतव्यस्तत्राह॥ क्षिप्रमिति॥
दुराचारोपिमांभजन्सधर्मात्माभवति॥ ततश्चशश्वच्छांतिंशाश्वतीमुपशांतिंपरमेश्वरनिष्ठांगच्छतिप्रा

अपिचेत्सुदुराचारोभजतेमामनन्यभाक्॥ साधुरेवसमंतव्यःसम्यग्व्यवसितोहिसः॥३०॥ ॥
क्षिप्रंभवतिधर्मात्माशश्वच्छांतिंनिगच्छति॥ कौंतेयप्रतिजानीहिनमेभक्तःप्रणश्यति॥३१॥ ॥

प्नोति॥ कुतर्ककर्कशवादिनोनैतन्मन्येरन्निति॥ शंकाव्याकुलमर्जुनंप्रोत्साहयति॥ हेकौंतेय॥ पट
हकाहलादिमहाघोषपूर्वकं॥ विवदमानानांसभांगत्वाबाहुमुत्क्षिप्यनिःशंकंप्रतिजानीहिप्रतिज्ञां
कुरु॥ मयिसमर्पितांतरात्मामेभक्तोनप्रणश्यति॥ कथंमेपरमेश्वरस्यभक्तोदुराचारोपिप्रणश्यति

अपितुकृतार्थएवभवतीति॥ ततश्चत्वत्प्रोद्दीपितविजृंभितविध्वंसितकुतर्काभिःसंशयंत्वामेवगुरुत्वेना-
श्रयेरन्॥३१॥ आचारभ्रष्टंमद्भक्तिः॥ पवित्रीकरोतीति॥ किमत्रचित्रं॥ यतोमद्भक्तिर्दुःकुलानप्यन-
धिकारिणोपिसंसारान्मोचयतीत्याह॥ मांहीति॥ येपिपापयोनयःस्युः॥ निकृष्टजन्मनोंत्यजात-

मांहिपार्थव्यपाश्रित्ययेपिस्युःपापयोनयः॥ स्त्रियोवैश्यास्तथाशूद्रास्तेपियांतिपरांगतिं॥३२॥
किंपुनर्ब्राह्मणाःपुण्याभक्ताराजर्षयस्तथा॥ अनित्यमसुखंलोकमिमंप्राप्यभजस्वमां॥३३॥

योभवेयुः॥ परांगतिंयांतीतिकिंवक्तव्यमित्याह॥ किमिति॥ पुण्याःसुकृतिनोब्राह्मणाः॥ तथारा-
जानश्चऋषयश्चक्षत्रियाः॥ एवंभूताःपरांगतिंयांतीतिकिंवक्तव्यं॥ अतस्त्वमिमंराजर्षिरूपंलो-
कंदेहंप्राप्यलब्ध्वामांभजस्व॥ किंच॥ अनित्यमवेक्ष्य॥ सुखरहितंचलोकंदेहंप्राप्यअनित्यत्वा-
त्विलंबमकुर्वन्असुखत्वाच्चसुखार्थोद्यमंहित्वामामेवभजनंस्वीकुरुइत्यर्थः॥३३॥ ॥

१०३

भजनप्रकारदर्शयन्नुपसंहरति॥ मन्मनाइति॥ मय्येवमनोयस्यसमन्मनास्त्वंभवतथामद्भक्तोमत्सेव-
कोभव॥ मद्याजीमद्यजनशीलोभवमामेवनमस्कुरु॥ एवमेभिःप्रकारैर्मत्परायणःसन्नात्मानंमनोम-
यियुक्त्वासमाधायमामेवपरमानंदरूपमेष्यसि॥ निजयमैश्वर्यमाश्चर्यंभक्तेश्चाद्भुतंवैभवं॥ नव-
मेराजगुह्याख्येकृपयावोचदच्युतः॥१॥ इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांटीकायांनाम

मन्मनाभवमद्भक्तोमद्याजीमांनमस्कुरु॥ मामेवैष्यसियुक्त्वैवमात्मानंमत्परायणः॥३४॥ इतिश्री
भगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेराजगुह्ययोगोनवमोऽध्यायः॥९॥

नवमोऽध्यायः॥९॥ उक्ताःसंक्षेपतःपूर्वंसप्तमादौविभूतयः॥ दशमेताविततास्ताःसर्वत्रेश्वरदृष्टये॥१॥
एवंतावत्सप्तमादिभिस्त्रिभिरध्यायैर्भजनीयंपरमेश्वरस्वरूपंनिरूपितंतद्विभूतयश्चसप्तमेरसोहमप्सुकौं-
तेयेत्यादिनासंक्षेपतोदर्शिताः॥ नवमेचाहंक्रतुरहंयज्ञइत्यादिना॥ अथेदानींताएवविभूतीःप्रपंचयिष्य

गीता०अ० २५४

न्तभक्तेभ्य आवश्यकं करणीयत्वं वर्णयिष्यन् ॥ श्रीभगवानुवाच ॥ भूय एवेति ॥ महाबाहो सुहृदादिस्वधर्मानु
ष्ठाने महत्यरिपर्यायां च कुशलौ बाहू यस्य ॥ हे महाबाहो ॥ भूय एव पुनरपि मे वचः शृणु ॥ कथंभूतं ॥
परमं परमार्थनिष्ठं ॥ मद्वचोमृतेनैव ते प्रीतिं प्राप्नुवते ॥ ते तुभ्यं हितकाम्यया हितेच्छया यदहं वक्ष्या

श्रीभगवानुवाच ॥ भूय एव महाबाहो शृणु मे परमं वचः ॥ यत्तेहं प्रीयमाणाय वक्ष्यामि हितकाम्य
या ॥ १ ॥ न मे विदुः सुरगणाः प्रभवं न महर्षयः ॥ अहमादिर्हि देवानां महर्षीणां च सर्वशः ॥ २ ॥

मि तत् ॥ १ ॥ उक्तस्यापि पुनर्वचने दुर्विज्ञेयत्वं हेतुमाह ॥ न मे इति ॥ मे मम प्रभवं प्रभवं जन्मरहि
तस्यापि नानाविभूतिभिराविर्भावं सुरगणा अपि महर्षयो भृग्वादयो न जानंति ॥ तत्र हेतुः ॥
अहं देवानां महर्षीणां चादिः कारणं सर्वशः कार्यैः ॥ प्रकारैः ॥ उत्पादकत्वेन बुद्ध्यादिप्रवर्तक
त्वेन च ॥ अतो मदनुग्रहं विना मां कोपि विजानातीत्यर्थः ॥ २ ॥ २५४

एवंभूतमज्ञाने फलमाह ॥ यो मामिति ॥ सर्वकारणत्वादेव न विद्यते आदिर्यस्य तं ॥ एवं लोकानां महेश्वरं च
मां यो वेत्ति मनुष्येषु असंमूढः संमोहरहितः सर्वपापैः प्रमुच्यते ॥ ३ ॥ लोकमहेश्वरतामेव स्फुटयति
बुद्धिरिति ॥ बुद्धिः सारासारविवेकनैपुण्यं ॥ ज्ञानमात्मविषयं ॥ असंमोहो व्याकुलताभावः ॥ क्षमा
सहिष्णुत्वं ॥ सत्यं यथार्थभाषणं ॥ दमो बाह्येंद्रियसंयमः ॥ शमोंतःकरणसंयमः ॥ सुखमनुकूल

यो मामजमनादिं च वेत्ति लोकमहेश्वरं ॥ असंमूढः स मर्त्येषु सर्वपापैः प्रमुच्यते ॥ ३ ॥ बु
द्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः ॥ सुखं दुःखं भवोऽभावो भयं चाभयमेव च ॥ ४ ॥

संवेदनीयं ॥ दुःखं तद्विपरीतं ॥ भव उद्भवः ॥ अभावस्तद्विपरीतः ॥ भयं त्रासः ॥ अभयं तद्विपरीतं ॥
अस्य श्लोकस्योत्तरेण मत्त एव भवंतीत्यन्वयः ॥ ४ ॥ किंच ॥ अहिंसेति ॥ अहिंसा परपीडानिवृत्तिः ॥ समता
रागद्वेषादिराहित्यं ॥ तुष्टिर्दैवलब्धेन संतोषः ॥ तपः शारीरादि वक्ष्यमाणं ॥ दानं न्यायार्जितस्य स्व

सनादेः सत्यात्रेर्परीं॥ यशः सत्कीर्त्तिः अयशो दुःकीर्त्तिः॥ एवमेते॥ बुद्धिज्ञानमित्यादयस्तद्विपरीताश्चा
बुद्ध्यादयो नानाभावाः प्राणिनां मत्त एव भवंति॥ ५॥ किंच॥ महर्षयः सप्त भृग्वादयः॥ मदीयो भावः प्रभा
वो येषु ते हिरण्यगर्भात्मनो मम मनसः संकल्पमात्राज्जाताः प्रभावमेवाह॥ येषां भृग्वादीनां सनकादी

अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः॥ भवंति भावा भूतानां मत्त एव पृथग्विधाः॥ ५॥ महर्ष
यः सप्त पूर्वे चत्वारो मनवस्तथा॥ मद्भावा मानसा जाता येषां लोक इमाः प्रजाः॥ ६॥ एतां विभूतिं यो
गं च मम यो वेत्ति तत्त्वतः॥ सोऽविकंपेन योगेन युज्यते नात्र संशयः॥ ७॥

नां मनूनां च इमा ब्राह्मणा
द्या लोके वर्त्तमानाः॥ यथा यथं पुत्रपौत्रादिरूपाः शिष्यरूपाश्च प्रजा जाता वर्त्तंते॥ ६॥ यथोक्तविभूत्या
दितत्त्वज्ञानस्य फलमाह॥ एतामिति॥ एतां विभूतिं भृग्वादिलक्षणां मम योगं चैश्वर्यलक्षणां तत्त्वतो
यो वेत्ति सोऽविकंपेन निःसंशयेन सम्यग्दर्शनेन युक्तो भवति नास्त्यत्र संशयः॥ ७॥ १०५

यथा च विभूतियोगयोर्ज्ञानेन सम्यक्ज्ञानावाप्तिस्तद्दर्शयति॥ अहमिति॥ सर्वस्य जगतः प्रभवो भृग्वादिमन्वा
दिद्वारेणोत्पत्तिहेतुः॥ मत्त एव चास्य बुद्धिर्ज्ञानमसंमोह इत्यादि सर्वं प्रवर्त्तत इति मत्वा अवबुध्य बुधा विवे
किनो भावसमन्विताः॥ प्रीतियुक्ता मां भजंते॥ ८॥ प्रीतिपूर्वकं भजनमेवाह॥ मच्चित्ता इति॥ मय्येव चित्तं येषां

अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते॥ इति मत्वा भजंते मां बुधा भावसमन्विताः॥ ८॥ मच्चित्ता मद्ग
तप्राणा बोधयंतः परस्परं॥ कथयंतश्च मां नित्यं तुष्यंति च रमंति च॥ ९॥ तेषां सततयुक्तानां भ
जतां प्रीतिपूर्वकं॥ ददामि बुद्धियोगं तं येन मामुपयांति ते॥ १०॥

ते मच्चित्ता मामेव गताः प्राप्ताः प्राणा इंद्रि
याणि येषां ते मद्गतप्राणा मदर्पितजीवना इति वा एवंभूतास्ते बुधा अन्योन्यं यो यो वेत्ति तैः श्रुत्यादिप्रमाणैर्बो
धयंतः॥ बुद्ध्वा च मां कथयंतः संकीर्त्तयंतः संतस्तुष्यंति॥ अनुमोदतेन तुष्टिं यांति॥ रमंति च निर्वृत्तिं यांति
९॥ एवंभूतानां च सम्यक्ज्ञानमहं ददामीत्याह॥ तेषामिति॥ एवं सततं युक्तानां मय्यासक्तानां प्रीतिपूर्वकं

भजतांबुद्धिरूपंयोगमुपायंददामियेनतेमद्भक्तामांप्राप्नुवंति ॥१०॥ बुद्धियोगंदत्वाचतस्यानुभवपर्य्यंत
तामापादयन्विद्याकृतसंसारंनाशयामीत्याह ॥ तेषामनुकंपार्थमेवाऽज्ञानाज्जातंतमः संसारस्वं
नाशयामि ॥ कुत्रस्थितःसन्केनवासाधनेनतमोनाशयेतीत्यतआह ॥ आत्मभावस्थबुद्धिस्थोबुद्धिवृ
त्तौस्थितःसन्भास्वताविस्फुरताज्ञानरूपेणदीपेननाशयामि ॥११॥ संक्षेपेणोक्ताविभूतीर्विस्तरेण

तेषामेवानुकंपार्थमहमज्ञानजंतमः ॥ नाशयाम्यात्मभावस्थोज्ञानदीपेनभास्वता ॥११॥ अर्जु
नउवाच परंब्रह्मपरंधामपवित्रंपरमंभवान् ॥ पुरुषंशाश्वतंदिव्यमादिदेवमजंविभुं ॥१२॥

जिज्ञासुर्भगवंतंस्तुवन्नर्जुनउवाच ॥ परंब्रह्मेतिसप्तभिः ॥ परंब्रह्मचपरंधामचआश्रयःपरमंचपवि
त्रंभवानेवकुतइत्यतआह ॥ यतःशाश्वतंनित्यंपुरुषंतथादिव्यंद्योतनात्मकंस्वप्रकाशंच ॥ आदिश्चा
सौदेवश्चतंदेवानामादिभूतमित्यर्थः ॥ तथाजंचाजमानंविभुंचव्यापकंत्वामेवाहुः ॥१२॥

किंऋषयोभृग्वादयःसर्वेदेवर्षिश्चनारदः ॥ असितश्चदेवलश्चव्यासश्चस्वयंत्वमेवचसाक्षान्मेमह्यंब्रवी
षि ॥ अतोममेदानींनतेदैश्वर्येसंभावनानिबद्धेत्याह ॥१३॥ सर्वमिति ॥ एतद्भवानेवपरंब्रह्मेत्यादि ॥ सर्व
मपिऋतंसत्यंमन्ये ॥ यन्मांप्रतित्वंकथयसि ॥ नवैविदुःसुरगणाइत्यादि ॥ तदपिसत्यमेवमन्यइत्याह ॥

आहुस्त्वामृषयःसर्वेदेवर्षिर्नारदस्तथा ॥ असितोदेवलोव्यासःस्वयंचैवब्रवीषिमे ॥१३॥ सर्वमेतदृतंमन्येयन्मां
वदसिकेशव ॥ नहितेभगवन्व्यक्तिंविदुर्देवानदानवाः ॥१४॥ स्वयमेवात्मनात्मानंवेत्थत्वंपुरुषोत्तम ॥ भूतभाव
नभूतेशदेवदेवजगत्पते ॥१५॥ नहीति ॥ हेभगवन् ॥ तेव्यक्तिंदेवानविदुः अस्मदादिदुरवगाह्यमिदमभिव्यक्तिरि
तिनजानंति ॥ दानवाश्चास्यानियद्वार्यमितिनविदुरेव ॥१४॥ किंतर्हिस्वयमिति ॥ स्वयमेवत्वमेवात्मानंवेत्थनान्यः
तदप्यात्मनास्वेनैववेत्थनसाधनांतरेण ॥ अत्यादरेणबहुधासंबोधयति ॥ हेपुरुषोत्तम ॥ पुरुषोत्तमेहेतुगर्भा
णिसंबोधनानि ॥ हेभूतभावन ॥ भूतोत्पादक ॥ भूतानामीशनियंतः ॥ देवानामादित्यादीनांदेवप्रकाशक ॥ जगत्पतेविश्व
पालक ॥१५॥

गीता॰स॰ १८७

यस्मात्तवाभिव्यक्तिं त्वमेव वेत्थ न देवादयः॥ तस्माद्वक्तुमर्हसीति॥ यास्त्वात्मनस्तव दिव्या अत्यद्भुता विभू-
तयस्ताः सर्वा वक्तुं त्वमेवार्हसि यो योग्योसि याभिरीति विभूतीनां विशेषणं स्पष्टार्थं॥ १६॥ कथनप्रयोजनं द
र्शयन् प्रार्थयते॥ कथमिति॥ द्वाभ्यां॥ हे योगिन् कथं केन विभूतिभेदेन सदा परिचिंतयन्नहं त्वां विद्यां जा।

वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः॥ याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि॥ १६॥ क-
थं विद्यामहं योगिंस्त्वां सदा परिचिंतयन्॥ केषु केषु च भावेषु चिंत्योसि भगवन्मया॥ १७॥ विस्तरेणात्म-
नो योगं विभूतिं च जनार्दन॥ भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मेमृतं॥ १८॥ नीयां विभूतिभेदेन चिंत्योपि

त्वं केषु केषु पदार्थेषु मया चिंतनीयोसि॥ १७॥ तदेवं बहिर्मुखेपि चिंतनेन तत्र तत्र विभूतिभेदेन त्वच्चिंतनं व
यथा भवेत्तथा विस्तरेण कथयेत्याह विस्तरेणेति॥ आत्मनस्तव योगं सर्वज्ञत्वसर्वशक्तिमत्त्वादिलक्षणं
योगैश्वर्यं विभूतिं च विस्तरेण पुनः कथय हि यस्मात्त्वद्वाक्यामृतरूपं शृण्वतो मम तृप्तिरलंबुद्धिर्नास्ति॥ १८ १८७

एवं प्रार्थितः सन्॥ श्रीभगवानुवाच॥ हंतेति॥ हंतेत्यनुकंपासंबोधने दिव्या याः मम विभूतयस्ताः प्राधान्येन
तुभ्यं कथयिष्यामि॥ यतो वांतरविभूतिविस्तरस्य मदीयस्यांतो नास्ति॥ अतः प्रधानभूताः कतिचिद्दर्शयि-
ष्यामि॥ १९॥ तत्र प्रथमं मैश्वरं रूपं कथयति अहमिति॥ हे गुडाकेश॥ गुडाका निद्रा तस्या ईशो जितनिद्रोद्यत

श्रीभगवानुवाच॥ हंत ते कथयिष्यामि दिव्या ह्यात्मविभूतयः॥ प्राधान्यतः कुरुश्रेष्ठ नास्त्यंतो विस्तरस्य
मे॥ १९॥ अहमात्मा गुडाकेश सर्वभूताशयस्थितः॥ अहमादिश्च मध्यं च भूतानामंत एव च॥ २०॥ आ-
दित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान्॥ मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी॥ २१॥

केशो वा इति सर्वेषां भूतानामाशयेष्वंतःकरणेषु सर्वज्ञत्वादिगुणैर्नियंतृत्वेनावस्थितः परमात्माहं
आदिर्जन्म मध्यं स्थितिः अंतः संहारः सर्वभूतानां जन्मादिहेतुश्चाहमित्यर्थः॥ २०॥ इदानीं विभूतीः क-
थयति आदित्यानामित्यादिना यावदध्यायसमाप्तिः॥ आदित्यानां द्वादशानां मध्ये विष्णुर्वामनोहं ज्यो

तिषां प्रकाशकानां मध्ये ॥ अंशुमान् विश्वव्यापिरश्मियुक्तो रविः सूर्योहं ॥ मरुतां वायूनां मध्ये मरीचिर्नां
माहमस्मि ॥ यद्वा ॥ सप्तमरुद्गणा देवविशेषास्तेषां मध्ये इति ॥ नक्षत्राणां मध्ये चंद्रोहं ॥ २१ ॥ वेदानां सामवे
दोस्मीति देवानां वासवः इंद्रः इंद्रियाणां मे कादशानां मनोस्मि भूतानां संबंधिनी चेतना ज्ञानशक्तिरहमस्मि

वेदानां सामवेदोस्मि देवानामस्मि वासवः ॥ इंद्रियाणां मनश्चास्मि भूतानामस्मि चेतना ॥ २२ ॥ रुद्राणां
शंकरश्चास्मि वित्तेशो यक्षरक्षसां ॥ वसूनां पावकश्चास्मि मेरुः शिखरिणामहं ॥ २३ ॥ पुरोधसां च मु
ख्यं मां विद्धि पार्थ बृहस्पतिं ॥ सेनानीनामहं स्कंदः सरसामस्मि सागरः ॥ २४ ॥

॥ २४ ॥ रुद्राणामिति ॥ यक्षराक्ष
सानामपि क्रूरत्वान् हिंसामान्याद्यज्ञैः संहैकीकृत्य निर्देशः तेषां मध्ये वित्तेशः कुबेरोस्मि ॥ पावकोग्निः शि
खरिणां शिखरवतां उच्छ्रितानां मेरुः ॥ २३ ॥ पुरोधसामिति ॥ पुरोधसां मध्ये देवपुरोहितत्वान्मुख्यं बृहस्पतिं
मां विद्धि ॥ सेनानीनां मध्ये देवसेनापतिः स्कंदोहमस्मि ॥ सरसां स्थिरजलाशयानां मध्ये समुद्रोस्मि ॥ २४ ॥ १७८

महर्षीणामिति ॥ गिरां वाचां पदात्मिकानां मध्ये एकमक्षरमोंकाराख्यं पदमस्मि यज्ञानां श्रौतस्मार्त्तानां
मध्ये जपरूपो यज्ञोहं ॥ २५ ॥ अश्वत्थ इति ॥ देवाएव संतो मंत्रदर्शनेन ये ऋषित्वं प्राप्तास्तेषां मध्ये नारदो
स्मि सिद्धानामुत्पत्तित एवाधिगतपरमार्थानां कपिलाख्यो मुनिरस्मि ॥ २६ ॥ उच्चैः श्रवसमिति अम

महर्षीणां भृगुरहं गिरामस्म्येकमक्षरं ॥ यज्ञानां जपयज्ञोस्मि स्थावराणां हिमालयः ॥ २५ ॥ अ
श्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः ॥ गंधर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः ॥ २६ ॥ उच्चैः
श्रवसमश्वानां विद्धि माममृतोद्भवं ॥ ऐरावतं गजेंद्राणां नराणां च नराधिपं ॥ २७ ॥ आयुधा
नामहं वज्रं धेनूनामस्मि कामधुक् ॥ प्रजनश्चास्मि कंदर्पः सर्पाणामस्मि वासुकिः ॥ २८ ॥

तार्थं क्षीराब्धिमथने उद्भूतमुच्चैःश्रवसं नामाश्वं मद्विभूतिं विद्धि ॥ अमृतोद्भवमित्येतदैरावतेपि सं
बध्यते ॥ नराधिपं राजानं मां विद्धि ॥ २७ ॥ आयुधानामिति ॥ कामान् दोग्धीति कामधुक् प्रजोत्पत्ति

हेतुः कंदर्पः कामोऽस्मि ॥ न केवलं संभोगप्रधानः कामो मद्विभूतिः अशास्त्रीयत्वात् ॥ सर्पाणां
सविषाणां राजा वासुकिरस्मि ॥ २८ ॥ अनंत इति ॥ नागानां निर्विषाणां राजानंतः शेषोऽस्मि ॥
यादसां जलचराणां राजा वरुणोऽस्मि ॥ संयमतां नियमनं कुर्वतां मध्ये यमोऽस्मि ॥ २९ ॥ प्रह्लाद इति

अनंतश्चास्मि नागानां वरुणो यादसामहं ॥ पितॄणामर्यमा चास्मि यमः संयमतामहं ॥ २९ ॥
प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहं ॥ मृगाणां च मृगेंद्रोऽहं वैनतेयश्च पक्षिणां ॥ ३० ॥
पवनः पवतामस्मि रामः शस्त्रभृतामहं ॥ झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी ॥ ३१ ॥

कलयतां वशीकुर्वतां गणयतां वा मध्ये कालोऽहं ॥ मृगेंद्रः सिंहः ॥ ३० ॥ पवन इति ॥ पवतां पावयि
तॄणां वेगवतां वा वायुरस्मि ॥ रामो दाशरथिः यद्वा परशुरामः ॥ झषाणां मत्स्यानां मध्ये मक
रो मत्स्यविशेषोऽहं स्रोतसां प्रवाहोदकानां मध्ये भागीरथी ॥ ३१ ॥ १०९

सर्गाणामिति ॥ सृज्यंत इति सर्गा आकाशादयस्तेषामादिरंतश्च मध्यं चैवाहं ॥ अहमादिश्च मध्यं चेत्य
त्र सृष्ट्यादिकर्तृत्वपरमैश्वर्यमुक्तं ॥ अत्र तु उत्पत्तिप्रलयस्थितयो मद्विभूतित्वेन ध्येया इत्युच्यत इति वि
शेषः ॥ अध्यात्मविद्यात्मविद्या प्रवदतां वादिनां संबंधिनो वादजल्पवितंडाख्यास्तिस्रः कथाः प्रसिद्धास्ता
सां मध्ये वादोऽहं यत्र वादिभ्यामपि प्रमाणतस्तर्कतः पक्षः स्थाप्यते परपक्षश्च छलजातिनिग्रहस्थानै

सर्गाणामादिरंतश्च मध्यं चैवाहमर्जुन ॥ अध्यात्मविद्या विद्यानां वादः प्रवदतामहं ॥ ३२ ॥
अक्षराणामकारोऽस्मि द्वंद्वः सामासिकस्य च ॥ अहमेवाक्षयः कालो धाताहं सर्वतोमुखः ॥ ३३ ॥

र्दूष्यते स जल्पो नाम ॥ यत्र त्वेकः स्वपक्षं स्थापयति अन्यस्तु छलजातिनिग्रहस्थानैः स्वपक्षं दूषयति
न तु स्वपक्षं साधयति सा तु वितंडा नाम कथा तत्र जल्पवितंडे विजिगीषमाणयोर्वादिनोः शक्तिपरी
क्षामात्रफले वादस्तु वीतरागयोः शिष्याचार्ययोर्वा तत्त्वनिर्णयफलः ॥ अतोऽसौ श्रेष्ठत्वान्मद्विभू

तिरित्यर्थः ॥ ३२ ॥ अक्षराणामिति ॥ अक्षराणां वर्णानां मध्ये अकारोस्मि ॥ तस्य सर्ववाङ्मयत्वेन श्रेष्ठ-
त्वात् ॥ तथा च श्रुतिः ॥ अकारो वै सर्वा वाक् ॥ सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवतीति ॥
सामासिकस्य समाससमूहस्य मध्ये द्वंद्वः रामकृष्णादिसमासोस्मि ॥ उभयपदप्रधानत्वेन श्रेष्ठ-
त्वात् ॥ अक्षयः प्रवाहरूपः कालोहमेव कालः कलयतामित्यत्रायुर्गणनात्मकः ॥ संवत्सरशतादायुः

मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यतां ॥ कीर्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमा ॥ ३४ ॥

पुरुषः काल-
उक्तः स च तस्मिन्नायुषि क्षीणे सति क्षीयते ॥ अक्षयस्तु प्रवाहात्मको अक्षयः काल उच्यते इति विशेषः कर्मफल-
विधातॄणां विश्वतोमुखो धाता सर्वकर्मफलविधाताहमित्यर्थः ॥ ३३ ॥ मृत्युरिति ॥ संहारकाणां मध्ये सर्व-
हरो मृत्युरहं ॥ भविष्यतां भाविकल्याणानां प्राणिनामुद्भवः अभ्युदयोहं ॥ नारीस्त्रीणां मध्ये कीर्त्याद्याः सप्तदे- णां
वतारूपाः स्त्रियोहं ॥ यासामाभासमात्रयोगेन प्राणिनः श्लाघ्या भवन्ति ताः कीर्त्याद्याः स्त्रियो मद्विभूतिः ॥ ३४ ॥ १००

बृहत्सामेति ॥ त्वामिद्धि हवामह इत्यस्यामृचि गीयमानं बृहत्सामतेनेंद्रः सर्वेश्वरत्वेन स्तूयत इति श्रे-
ष्ठ्यं छंदोविशिष्टानां मंत्राणां मध्ये गायत्री मंत्रोहं ॥ द्विजत्वापादकेन सोमाहरणेन च श्रेष्ठत्वात् ॥ कुसु-
माकरो वसंतः ॥ ३५ ॥ द्यूतमिति ॥ छलयतामन्योन्यवंचनपराणां संबंधि द्यूतमस्मि ॥ तेजस्विनां प्रभावव-

बृहत्साम तथा साम्नां गायत्री छंदसामहं ॥ मासानां मार्गशीर्षोहमृतूनां कुसुमाकरः ॥ ३५ ॥
द्यूतं छलयतामस्मि तेजस्तेजस्विनामहं ॥ जयोस्मि व्यवसायोस्मि सत्त्वं सत्त्ववतामहं ॥ ३६ ॥
वृष्णीनां वासुदेवोहं पांडवानां धनंजयः ॥ मुनीनामप्यहं व्यासः कवीनामुशना कविः ॥ ३७ ॥

तां तेजः प्रभावोस्मि ॥ व्यवसायिनामुद्यमवतां व्यवसायोऽस्मि ॥ सत्त्ववतां सात्त्विकानां सत्त्वमहं ॥
३६ ॥ वृष्णीनामिति ॥ वासुदेवोहं त्वामुपदिशामि ॥ धनंजयस्त्वमेव यद्विभूतिः ॥ वेदार्थमननशी-
लानां वेदव्यासोहमस्मि ॥ कवीनां क्रान्तदर्शिनां मध्ये उशना नाम कविः शुक्रः ॥ ३७ ॥

गीता०स०
१०१

दंड इति ॥ दमयतां दंडः कर्तृणां संबंधी दंडोस्मि ॥ येनासंयतास्संयता भवंति स दंडो मद्विभूतिः ॥ जेतुमिच्छतां संबंधिनी सामाद्युपायरूपा नीतिरहमस्मि ॥ गुह्यानां गोप्यानां गोपनहेतुर्मौनं मद्वचनमहमस्मि न हि तूष्णीं स्थितस्याभिप्रायो ज्ञायते ज्ञानवतां तत्त्वज्ञानिनां यत् ज्ञानं तदहं ॥ ३८ ॥ यच्चेति ॥ यदपि

दंडो दमयतामस्मि नीतिरस्मि जिगीषतां ॥ मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहं ॥ ३८ ॥
यच्चापि सर्वभूतानां बीजं तदहमर्जुन ॥ न तदस्ति विना यत्स्यान्मया भूतं चराचरं ॥ ३९ ॥
नांतोस्ति मम दिव्यानां विभूतीनां परंतप ॥ एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया ॥ ४० ॥

सर्वभूतानां बीजं प्ररोहकारणं तदहं ॥ तत्र हेतुः ॥ मया विना यत्स्यात् भवेत्तच्चाचरं चरं वा भूतं नास्त्येवेति ॥ ३९ ॥ प्रकरणार्थमुपसंहरति ॥ अनंतत्वाद्विभूतीनां ताः साकल्येन वक्तुं न शक्यंते ॥ एष तु विभूतेर्विस्तरस्तूद्देशतः संक्षेपतः प्रोक्तः ॥ ४० ॥

१०१

पुनश्च सा कीदृशी इति ॥ कथंचित्साकल्येन कथयति ॥ यद्यदिति ॥ विभूतिमत् ऐश्वर्ययुक्तं श्रीमत्संपत्तियुक्तं ॥ ऊर्जितं केनचित्प्रभावबलादिना गुणेनातिशयितं यद्यत्सत्त्वं वस्तुमात्रं तत्तदेव मम तेजः प्रभावस्यांशेन संभूतं विजानीहि ॥ ४१ ॥ अथवा किमनेन परिच्छिन्नदर्शनेन सर्वत्र मद्दृष्टिमेव कुर्वित्याह ॥ अथवेति ॥ बहुना पृथक्ज्ञानेन न किं कार्यं यस्मादिदं सर्वं जगत्कार्त्स्न्येन एकदेशमात्रेण विष्टभ्य धृत्वा व्याप्येति

यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा ॥ तत्तदेवावगच्छ त्वं मम तेजोंशसंभवं ॥ ४१ ॥ अथवा
बहुनैतेन किं ज्ञातेन तवार्जुन ॥ विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥ ४२ ॥

वा अहमेवास्थितः ॥ न मद्व्यतिरिक्तं किंचिदस्ति पादोस्य विश्वा भूतानि इति श्रुतेः ॥ इंद्रियाद्यारतश्चित्ते बहिर्धावति ॥ सत्यपि ईशदृष्टिविक्षानाय विभूतीर्दिशमेवब्रवीत् ॥ ४२ ॥

गीता०स०
१०२

इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां टीकायां दशमोऽध्यायः ॥१०॥ विभूतिर्वैभवं प्रोच्य कृपया
परया हरिः ॥ दिदृक्षोरर्जुनस्याथ विश्वात्मरूपमदर्शयत् ॥१॥ पूर्वाध्यायान्ते विष्टभ्याहमिदं कृत्स्नमे
कांशेनास्थितो जगदिति विश्वात्मकं पारमेश्वरं रूपं सूचितं तत् दिदृक्षुः पूर्वोक्तमभिनंदन्नर्जुन उवाच ॥

इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे विभूतियोगो
नाम दशमोऽध्यायः ॥१०॥ अर्जुन उवाच ॥ मदनुग्रहाय परमं गुह्यमध्यात्मसंज्ञितं ॥ यत्त्व
योक्तं वचस्तेन मोहोऽयं विगतो मम ॥१॥

मदनुग्रहायेति चतुर्भिः ॥ ममानुग्रहाय शोकनिवृत्त्य
र्थं परमं परमार्थनिष्ठं गुह्यं गोप्यमप्यध्यात्ममिति संज्ञितं ॥ आत्मानात्मविवेकविषयं ॥ यत्त्व
योक्तं ॥ अशोच्याननन्वशोचस्त्वमित्यादि षष्ठाध्यायपर्यंतं यद्वाक्यं तेन ममायं मोहो अहं हंता
एते हन्यंत इत्यादि लक्षणो भ्रमो विगतो विनष्टः ॥ आत्मनो कर्तृत्वाद्यभावोक्तेः ॥१॥ १०२

किंच ॥ भवाप्ययाविति ॥ भूतानां भवाप्ययौ सृष्टिप्रलयौ त्वत्तः सकाशाद्भवत इति श्रुतौ मया ॥ अहं कृत्स्नस्य
जगतः प्रभवः प्रलयस्तथेत्यादौ विस्तरतः पुनः पुनः कमलस्य पत्रे इव सुप्रसन्ने दीर्घे विशाले अक्षिणी यस्य तव हे क
मलपत्राक्ष ॥ माहात्म्यमपि चाव्ययं अक्षयं श्रुतं ॥ विश्वसृष्ट्यादिकर्तृत्वेपि सर्वनियंतृत्वेपि शुभाशुभकर्मका
रयितृत्वेपि बंधमोक्षादिविचित्रफलदातृत्वेपि विकाराभावो वैषम्यासंगौदासीन्यादि लक्षणमपरिमितं महत्त्वं च श्रुतं ॥

भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया ॥ त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययं ॥२॥ एवमेत
द्यथात्थ त्वमात्मानं परमेश्वर ॥ द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम ॥३॥

अव्यक्तं व्यक्तिमापन्नं मन्यते ॥ म
या ततमिदं सर्वं न च मां तानि कर्माणि निबध्नंति ॥ समोहं सर्वभूतेषु इत्यादिना ॥ अतस्त्वत्परतंत्रत्वादपि
जीवानामहं कर्तेति मदीयो मोहो विगत एवेति भावः ॥२॥ किंच ॥ एवमिति ॥ भवाप्ययौ हि भूतानामित्यादि
मया श्रुतं ॥ यथा वेदानीं ॥ मात्मानं त्वमात्थ ॥ विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदित्येवं कथयसि

ति ॥ हे परमेश्वर एवमेतत् ॥ अत्राप्यविश्वासो मम नास्तीत्यर्थः । तथापि हे पुरुषोत्तम तवैश्वर्यज्ञा
क्तिबलेतेजोभिः संपन्नं स्वरूपं कौतूहलादहं द्रष्टुमिच्छामि ॥ ३ ॥ न चाहं द्रष्टुमिच्छामीत्येतावतैव त्वया
तद्रूपं दर्शयितव्यं किं तर्हि मन्यस इति । योगिन एव योगास्तेषामीश्वर मयार्जुनेन तद्रूपं द्रष्टुं शक्यं य

मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो । योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययं ॥ ४ ॥ श्रीभगवा
नुवाच ॥ पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः । नानाविधानि रूपाणि नानावर्णाकृतीनि च ॥ ५ ॥

दि मन्यसे तर्हि तद्रूपवन्तमात्मानमव्ययं नित्यं मे प्रदर्शय ॥ ४ ॥ एवं प्रार्थितः सन् तत्प्रकृते रूपं दर्शयिष्य
न्सावधानो भवेत्यर्जुनमभिमुखीकृत्य श्रीभगवानुवाच पश्येति । चतुर्भिः रूपस्यैकत्वेनानाविधत्वा
द्रूपाणीति बहुवचनं । अपरिमितान्यनेकप्रकाराणि । अलौकिकानि मे रूपाणि पश्य वर्णाः शुक्लकृष्णाद
यः आकृतयोऽवयवसन्निवेशविशेषाः नाना अनेके वर्णा आकृतयश्च येषां तानि नानावर्णाकृतीनि ॥ ५ ॥ १०३

तान्येवाह । पश्येति ॥ आदित्यादीन्मम देहे पश्य ॥ मरुत एकोनपंचाशद्देवविशेषाः ॥ अदृष्टपूर्वाणि त्वया
वान्येन वा पूर्वमदृष्टानि रूपाणि आश्चर्याणि अद्भुतानि ॥ ६ ॥ किंच इहेति ॥ तत्र तत्र परिभ्रमता वर्षकोटिभिर
पि द्रष्टुमशक्यं कृत्स्नमपि चराचरसहितं जगत् ॥ इहास्मिन्मम देहे अवयवरूपेणैकत्रैव स्थितमद्य अधुनै
व पश्य ॥ यच्चान्यज्जगदाश्रयभूतं कारणस्वरूपं ॥ जगतश्चावस्थाविशेषादिकं ॥ यत्पराजयादिकं च यद

पश्यादित्यान्वसून्रुद्रानश्विनौ मरुतस्तथा ॥ बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत ॥ ६ ॥ इहैकस्थं
जगत्कृत्स्नं पश्याद्य सचराचरं ॥ मम देहे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि ॥ ७ ॥ न तु मां शक्यसे द्रष्टुमनेनैव
स्वचक्षुषा । दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरं ॥ ८ ॥
प्यन्यत्द्रष्टुमिच्छसि तत्सर्वं पश्य ॥ ७ ॥ यदुक्तमर्जुनेन
मन्यसे यदि तच्छक्यमिति ॥ तत्राह ॥ न त्विति ॥ अनेनैव स्वीयेन चर्मचक्षुषा मां द्रष्टुं न शक्ष्यसे शक्तो न भविष्यसि
अतो दिव्यमलौकिकं ज्ञानात्मकं चक्षुस्तुभ्यं ददामि मे मे ऐश्वर्यमसाधारणं योगं युक्तिं अघटितघटनासामर्थ्यं
पश्य ॥ ८ ॥

एवमुक्त्वा भगवानर्जुनाय रूपं दर्शितवान् तच्च रूपं दृष्ट्वार्जुनः कृष्णं विज्ञापितवानीमम यं एवमुक्त्वेत्यादि
भिः षड्भिः श्लोकैः धृतराष्ट्रं प्रति ॥ संजय उवाच ॥ एवमिति ॥ हे राजन् ॥ हे धृतराष्ट्र ॥ महांश्चासौ योगेश्वरश्च सं
हरीः परमं ऐश्वरं रूपं दर्शितवान् ॥ ९ ॥ कथंभूतं तदित्यपेक्षायामाह ॥ अनेकेति ॥ अनेकानि वक्त्राणि नयनानि च यस्मि

संजय उवाच ॥ एवमुक्त्वा ततो राजन्महायोगेश्वरो हरिः ॥ दर्शयामास पार्थाय परमं रूपमैश्वरं ॥ ९ ॥ अ
नेकवक्त्रनयनमनेकाद्भुतदर्शनं ॥ अनेकदिव्याभरणं दिव्यानेकोद्यतायुधं ॥ १० ॥ दिव्यमाल्यांबरधरं दि
व्यगंधानुलेपनं ॥ सर्वाश्चर्यमयं देवमनंतं विश्वतोमुखं ॥ ११ ॥

स्मिन्तत् ॥ अनेकानामद्भुतानां दर्शनं यस्मि
न्तत् ॥ दिव्यान्यनेकानि उद्यतानि आयुधानि यस्मिन्तत् ॥ दिव्यान्यनेकानि उद्यतानि आयुधानि यस्मिन्
तत् ॥ १० ॥ किंच दिव्येति ॥ दिव्यानि माल्यांबराणि धारयतीति तथा ॥ दिव्यो गंधो यस्य तादृशमनुलेपनं यस्य त
त् ॥ सर्वाश्चर्यं अनेकाश्चर्यमयं देवं द्योतनात्मकं ॥ अनंतमपरिच्छिन्नं विश्वतः सर्वतो मुखानि यस्मिंस्तत् ॥ ११ ॥ १०४
श्चर्य

विश्वरूपदीप्तेर्निरुपमत्वमाह ॥ दिवीति ॥ दिवि आकाशे सहस्रस्य युगपदुत्थितस्य यदि युगपदुत्थिता भायेत ॥ त
र्हि सा तस्य महात्मनो विश्वरूपस्य भासः प्रभायाः कथंचित्सदृशी स्यात् ॥ नान्योपमास्तीत्यर्थः तथाभूतं रूपं द
र्शयामासेति पूर्वेणैवान्वयः ॥ १२ ॥ ततः किं वृत्तमित्यपेक्षायामाह संजयः ॥ तत्रेति ॥ अनेकधा प्रविभक्तं नानावि

दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता ॥ यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः ॥ १२ ॥ तत्रैकस्थं जगत्कृत्स्नं
प्रविभक्तमनेकधा ॥ अपश्यद्देवदेवस्य शरीरे पांडवस्तदा ॥ १३ ॥ ततः स विस्मयाविष्टो हृष्टरोमा धनंजयः ॥ प्रण
म्य शिरसा देवं कृतांजलिरभाषत ॥ १४ ॥ अर्जुन उवाच ॥ पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूतविशेषसंघान् ॥ ॥

भागेनावस्थितं कृत्स्नं जगत् ॥ देवदेवस्य तस्य वपुषि तेनैकत्रैवावस्थितं ॥ तदा पांडवोर्जुनोपश्यत् ॥ १३ ॥ एवं दृष्ट्वा किं कृ
तवानित्यत आह ॥ तत इति ॥ ततो दर्शनानंतरं विस्मयेनाविष्टो व्याप्तः सन् ॥ हृष्टानि उत्पुलकितानि रोमाणि
यस्य सः ॥ धनंजयो देवं ॥ तमेव शिरसा प्रणम्य संपुटीकृतहस्तो भूत्वा अभाषत उक्तवान् ॥ १४ ॥ भाषणमेव अर्जु

नउवाच । पश्यामीति ॥ सप्तदशभिः हे देव देहे । तव देहे देवानामित्यादीन्पश्यामि । तथा सर्वान्भूतविशेषसंघान्
जरायुजांडजादीनां संघांश्च । तथा दिव्यानृषीन्वसिष्ठादीनुरगांश्च तक्षकादीन् । तथा तेषां देवादीनामीशं स्वा
मिनं ब्रह्माणं च । कथंभूतं कमलासनस्थं पृथ्वीपद्मकर्णिकायां मेरौ स्थितं । यद्वा नाभिपद्मासनस्थं । १५ किंच

ब्रह्माणमीशंकमलासनस्थंमृषींश्चसर्वानुरगांश्चदिव्यान् ॥ १५ ॥ अनेकबाहूदरवक्त्रनेत्रंपश्यामित्वां
सर्वतोनंतरूपं ॥ नांतंनमध्यंनपुनस्तवादिंपश्यामिविश्वेश्वरविश्वरूपं ॥ १६ ॥ किरीटिनंगदिनंचक्रिणं
चतेजोराशिंसर्वतोदीप्तिमंतं ॥ पश्यामित्वांदुर्निरीक्ष्यंसमंताद्दीप्तानलार्कद्युतिमप्रमेयं ॥ १७ ॥ अनेकेति

अनेकानि बाह्वादीनि यस्य तादृशं त्वां पश्यामि । अनंतानि रूपाणि यस्य तं त्वां सर्वतः पश्यामि । तव तु अंतं मध्यं
आदिं च न पश्यामि सर्वगतत्वात् । १६ किंच किरीटिनमिति । किरीटिनं मुकुटवंतं च गदिनं गदावंतं च चक्रिणं चक्रवं १०५
तं च । सर्वतो दीप्तिमंतं तेजःपुंजरूपं त्वया दुर्निरीक्ष्यं द्रष्टुमशक्यं तत्र हेतुः दीप्तयोरनलार्कयोर्द्युतिरिव द्युतिस्तेजो यस्य तं । १७ ।

अत एव अप्रमेयं । एवंभूत इति निश्चेतुमशक्यं त्वां समंततः पश्यामि यस्मादेवं तवातर्क्यमैश्वर्यं तस्मात् । त्वमिति
त्वमेवाक्षरं परमं ब्रह्म कथंभूतं वेदितव्यं मुमुक्षुभिर्ज्ञातव्यं । त्वमेवास्य विश्वस्य परं निधानं निधीयतेऽस्मिन्निति निधा
नं प्रकृष्टमाश्रयः । अत एव त्वमव्ययो नित्यः शाश्वतस्य धर्मस्य गोप्ता पालकः सनातनश्चिरंतनः पुरुषो मम

त्वमक्षरंपरमंवेदितव्यंत्वमस्यविश्वस्यपरंनिधानं त्वमव्ययःशाश्वतधर्मगोप्तासनातनस्त्वंपुरुषोमतोमे ॥ १८ ॥
अनादिमध्यांतमनंतवीर्यमनंतबाहुंशशिसूर्यनेत्रं ॥ पश्यामित्वांदीप्तहुताशवक्त्रंस्वतेजसाविश्वमिदंतपंतं ॥ १९ ॥
द्यावापृथिव्योरिदमंतरंहिव्याप्तंत्वयैकेनदिशश्चसर्वाः ॥ दृष्ट्वाद्भुतंरूपमिदंतवोग्रंलोकत्रयंप्रव्यथितंमहात्मन् ॥ २० ॥

संमतोसि । १८ किंच अनादीति । अनादिमध्यांतं उत्पत्तिस्थितिप्रलयरहितं । अनंतं वीर्यं यस्य तं अनं
तबाहुं अनंता बाहवो यस्य तं । शशिसूर्यौ नेत्रे यस्य तादृशं त्वां पश्यामि । तथा दीप्तो हुताशो वह्निर्वक्त्रे यस्य तं ।
स्वतेजसा इदं विश्वं तपंतं पश्यामि । १९ किंच द्यावापृथिव्योरिति । द्यावापृथिव्योरिदमंतरं चांतरिक्षं त्वयैकेन व्या

तं दिशश्च व्याप्ताः ॥ अद्भुतं च दृष्टपूर्वं त्वदीयमिदमुग्रं घोरं रूपं दृष्ट्वा लोकत्रयं प्रव्यथितं अतिभीतं पश्या
मीति पूर्वमेवानुषंगः ॥ २० ॥ किंच ॥ अमी हीति ॥ अमी सुरसंघा भीताः संतस्त्वां विशंति । शरणं प्रविशंति
तेषां मध्ये केचिद्भीता दूरत एव स्थिताः कृतसंपुटकरयुगलाः संतो गृणंति । जय जय रक्ष रक्षेति प्रार्थयंते ।

अमी हि त्वां सुरसंघा विशंति केचिद्भीताः प्रांजलयो गृणंति । स्वस्तीत्युक्त्वा महर्षिसिद्धसंघाः स्तुवंति त्वां
स्तुतिभिः पुष्कलाभिः ॥ २१ ॥ रुद्रादित्या वसवो ये च साध्या विश्वेऽश्विनौ मरुतश्चोष्मपाश्च ॥ गंधर्वयक्षा-
सुरसिद्धसंघा वीक्षंते त्वां विस्मिताश्चैव सर्वे ॥ २२ ॥

स्पष्टमन्यत् ॥ २१ ॥ किंच ॥ रुद्राश्च आदित्याश्च वसवश्च ये च
साध्या नाम देवा विश्वेदेवा अश्विनौ देवौ मरुतो मरुद्गणाः ॥ ऊष्माणं पिबंतीत्यूष्मपाः पितरः ऊष्मभागा हि पि-
तर इत्यादिश्रुतेः स्मृतिश्च ॥ यावदुष्णं भवेदन्नंति वाग्यताः पितरस्तावदश्नंति यावन्नोक्ता हविर्गुणा इति ॥ गंधर्वा
श्च यक्षाश्च असुराश्च विरोचनादयः ॥ सिद्धानां संघाश्च ते सर्व एव विस्मिताः संतः त्वां वीक्षंत इत्यन्वयः ॥ २२ ॥ १०६

किंच ॥ रूपमिति ॥ हे महाबाहो ॥ महत् अत्यूर्जितं तव रूपं दृष्ट्वा लोकाः सर्वेऽपि प्रव्यथिता अतिभीताः ॥ तथा
हं प्रव्यथितोस्मि कीदृशं रूपं दृष्ट्वा बहूनि वक्त्राणि नेत्राणि यस्मिन् तत् ॥ बहवो बाहव ऊरवः पादाश्च यस्मि
न् ॥ बहून्युदराणि यस्मिन् तत् ॥ बह्वीभिर्दंष्ट्राभिः करालं विकृतं रौद्रमित्यर्थः ॥ २३ ॥ न केवलं भीतोहमि-

रूपं महत्ते बहुवक्त्रनेत्रं महाबाहो बहुबाहूरुपादं ॥ बहूदरं बहुदंष्ट्राकरालं दृष्ट्वा लोकाः प्रव्य
थितास्तथाहं ॥ २३ ॥ नभःस्पृशं दीप्तमनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रं ॥ दृष्ट्वा हि त्वां प्रव्य
थितांतरात्मा धृतिं न विंदामि शमं च विष्णो ॥ २४ ॥ ॥

त्येतावदेव ॥ अपितु ॥ नभःस्पृशमिति ॥ नभःस्पृशतीति नभस्पृक् तं अंतरिक्षव्यापकमित्यर्थः ॥
दीप्तं तेजोयुक्तं अनेकवर्णं यस्य तं अनेकवर्णं ॥ व्यात्तानि विवृतान्याननानि यस्य तं दीप्तानि विशालानि
नेत्राणि यस्य तं ॥ एवंभूतं हि त्वां दृष्ट्वा प्रव्यथितः अंतरात्मा मनो यस्य सोहं धृतिं धैर्यमुपशमं च न लभे ॥ २४ ॥

गीता०स०
१०७

किंच ॥ दृष्ट्वेति ॥ भो देवेश तव मुखानि दृष्ट्वा भयावेशेन दिशो न जानामि ॥ शर्म च सुखं न लभे ॥ भो जगन्नि
वास ॥ प्रसन्नो भव ॥ कीदृशानि मुखानि दंष्ट्राभिः ॥ करालानि ॥ कालानलः प्रलयाग्निस्तत्सदृशानि ॥ अ
यच्चान्यदपि द्रष्टुमिच्छसीत्यनेनास्मिन्संग्रामे भाविनं भयपराजयादिकं मम देहे पश्येति ॥ यद्भगवतोक्तं

दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसन्निभानि ॥ दिशो न जाने न लभे च शर्म प्रसीद देवे
श जगन्निवास ॥ २५ ॥ अमी च त्वां धृतराष्ट्रस्य पुत्राः सर्वे सहैवावनिपालसंघैः ॥ भीष्मो द्रोणः ॥
सूतपुत्रस्तथासौ सहास्मदीयैरपि योधमुख्यैः ॥ २६ ॥

तदिदानीं पश्यन्नाह ॥ अमी चेति ॥ पंचभिः ॥
अमी धृतराष्ट्रस्य पुत्रा दुर्योधनादयः ॥ सर्वैरवनिपालानां जयद्रथादीनां राज्ञां संघैः सहैव त्वद्वक्त्रा
णि विशन्तीत्युत्तरेणान्वयः ॥ तथा भीष्मश्च द्रोणश्च असौ सूतः कर्णश्च ॥ न केवलं त एव विशन्ति अ
पितु प्रतियोद्धारो ये अस्मदीया योधमुख्याः शिखंडिधृष्टद्युम्नादयस्तैः सह ॥ २६ ॥ १०७

वक्त्राणीति ॥ एते सर्वे त्वरमाणा धावन्तः ॥ तव दंष्ट्राभिः विकृतानि भयंकराणि वक्त्राणि विशन्ति ॥ तेषां मध्ये
केचिच्चूर्णीकृतैः शिरोभिरुपलक्षिताः ॥ दंतसंधिषु संश्लिष्टा दृश्यन्ते ॥ प्रवेशमेव दृष्टान्तेनाह ॥ २७ ॥ यथेति
नदीनामनेकमार्गप्रवृत्तानां बहवोऽम्बुवेगाः प्रवाहाः समुद्राभिमुखाः संतो यथा समुद्रमेव द्रवन्ति प्रविश

वक्त्राणि ते त्वरमाणा विशन्ति दंष्ट्राकरालानि भयानकानि ॥ केचिद्विलग्ना दशनान्तरेषु संदृश्यन्ते चू
र्णितैरुत्तमांगैः ॥ २७ ॥ यथा नदीनां बहवोऽम्बुवेगाः समुद्रमेवाभिमुखा द्रवंति ॥ तथा तवामी नरलोक
वीरा विशन्ति वक्त्राण्यभिविज्वलन्ति ॥ २८ ॥

न्ति ॥ तथा अमीपि नरलोकवीरास्ते अभिविज्वलन्ति ॥ सर्वतः प्र
दीप्यमानानि तव वक्त्राणि प्रविशन्ति ॥ २८ ॥ अवशानां तेन प्रवेशो नदीवेगदृष्टान्तेनोक्तः ॥ बुद्धिपूर्वकं प्रवे
शे दृष्टान्तमाह ॥ यथेति ॥ प्रदीप्तं ज्वलनमग्निं पतंगाः शलभा बुद्धिपूर्वकं समृद्धवेगा येषां ते यथा तथा ना
शाय मरणायैव विशन्ति ॥ २९ ॥ ततः किमत आह ॥ लेलिह्यस इति ॥ ग्रसमानो गिलन्समग्रान् लोकान् सर्वतः

स्तान्वीरान्त्वामसमंतात्सर्वतो लेलिह्यसे इति ॥ त्वं निशायेन भक्षयसि ॥ कैर्ज्वलद्भिर्वदनैः ॥ किंच हे वि
ष्णो तव भासो दीप्तयस्तेजोभिर्विस्फुरणैः ॥ समस्तं जगद्व्याप्य तीव्राः सत्यः प्रतपंति संतापयंति ॥ ३० ॥
यत एवं तस्मादाख्याहीति ॥ भवानुरूपः कः इत्याख्याहि कथय यतस्तुभ्यं नमोस्तु ॥ हे देववर ॥ प्रसन्नो भ

यथा प्रदीप्तं ज्वलनं पतंगा विशंति नाशाय समृद्धवेगाः ॥ तथैव नाशाय विशंति लोकास्तवापि व
क्त्राणि समृद्धवेगाः ॥ २९ ॥ लेलिह्यसे ग्रसमानः समंताल्लोकान्समग्रान्वदनैर्ज्वलद्भिः ॥ तेजोभि
रापूर्य जगत्समग्रं भासस्तवोग्राः प्रतपंति विष्णो ॥ ३० ॥ आख्याहि मे को भवानुग्ररूपो नमोस्तु ते दे
ववर प्रसीद ॥ विज्ञातुमिच्छामि भवंतमाद्यं न हि प्रजानामि तव प्रवृत्तिं ॥ ३१ ॥

वत्वमाद्यं पुरुषं विशेषेण ज्ञातुमिच्छामि ॥ यतस्तव प्रवृत्तिं चेष्टां किमर्थमेवं प्रवृत्तोसीति न जाना
मि ॥ एवंभूतस्य तव प्रवृत्तिमपि न जानामीति वा ॥ ३१ ॥ १०८

एवं प्रार्थितः सन् ॥ श्रीभगवानुवाच ॥ कालोस्मीति ॥ त्रिभिः ॥ लोकानां क्षयकर्त्ता प्रवृद्धोत्युग्रः कालोस्मि लो
कान्प्राणिनः संहर्तुमिह लोके प्रवृत्तोस्मि ॥ अतः त्वत्तेपि त्वा इति ॥ त्वां हंतारं विनापि न भविष्यंति ॥ केषु प्रत्यनी
केषु प्रत्यनीकानि प्रतिभीष्मद्रोणादीन्सर्वास्तु सेनासु ये योद्धारो व्यवस्थितास्ते सर्वेपि ॥ ३२ ॥ यस्मादेवं

श्रीभगवानुवाच ॥ कालोस्मि लोकक्षयकृत्प्रवृद्धो लोकान्समाहर्तुमिह प्रवृत्तः ॥ ऋतेपि त्वां न भवि
ष्यंति सर्वे येवस्थिताः प्रत्यनीकेषु योधाः ॥ ३२ ॥ तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून्भुंक्ष्व राज्यं सम
द्धं ॥ मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन् ॥ ३३ ॥ तस्मादिति ॥ तस्मात्त्वं युद्धायोत्तिष्ठ दे
वैरपि दुर्जया भीष्मद्रोणादयोर्जुनेन निर्जिता इत्येवंभूतं यशो लभस्व प्राप्नुहि ॥ अयत्नेन शत्रून्जित्वा समृद्धं
राज्यं भुंक्ष्व ॥ एते च तव शत्रवः त्वदीययुद्धात्पूर्वमेव ममैव कालात्मना निहतप्रायाः ॥ तथापि त्वं निमित्तमात्रं
भव हे सव्यसाचिन् सव्येन वामहस्तेन सवितुं संधातुं शीलमस्येति सव्यसाची त्वया वामेनापि बाणक्षेपात्सव्यसाची
त्युच्यते ॥ ३३ ॥

नचैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुरित्याशंकापि न कार्येत्याह ॥ द्रोणं चेति ॥ ये
भ्यस्त्वं शंकसे नान्द्रोणादीन्मयैव हतान् त्वं जहि घातय मा व्यथिष्ठाः ॥ भयं मा कार्षीः सपत्नान् र
णे रणे युद्धे निश्चितं जेतासि ॥ ३४ ॥ ततो यद्वृत्तं तत्कृतं धृतराष्ट्रं प्रति ॥ संजय उवाच ॥ एतत्सूर्वे

द्रोणं च भीष्मं च जयद्रथं च कर्णं तथान्यानपि योधवीरान् ॥ मया हतांस्त्वं जहि मा व्यथिष्ठा
स्व युध्यस्व जेतासि रणे सपत्नान् ॥ ३४ ॥ संजय उवाच ॥ एतच्छ्रुत्वा वचनं केशवस्य कृताञ्जलि
र्वेपमानः किरीटी ॥ नमस्कृत्वा भूय एवाह कृष्णं सगद्गदं भीतभीतः प्रणम्य ॥ ३५ ॥

स्वीकृतप्रतापात्मकं केशवस्य वचनं श्रुत्वा वेपमानः किरीटी अर्जुनः कृताञ्जलिः संपुटीकृतहस्तः
कृष्णं नमस्कृत्य भूयः पुनरप्याह ॥ भयहर्षाभ्यां गद्गदेन कंठवर्कपनेन सह वर्तत इति सगद्गदं यथा
भवति तथा ॥ किंच ॥ भीतादपि भीतः सन्प्रणम्यानतो भूत्वा ॥ ३५ ॥ १०१

अर्जुन उवाच ॥ स्थान इत्येकादशभिरर्जुनस्योक्तिः ॥ स्थाने इत्यव्ययं युक्तमित्यस्मिन्नर्थे हृषी
केशायतएत एवं त्वमद्भुतप्रभावो भक्तवत्सलश्च ॥ अतस्तव प्रकीर्त्या माहात्म्यसंकीर्तनेन न
के केवलमहमेव प्रहृष्यामि ॥ किंतु ॥ जगत्सर्वं प्रहृष्यति प्रहर्षेण हर्षं प्राप्नोति ॥ एतत्स्थाने
युक्तमित्यर्थः ॥ तथा जगदनुरज्यते च ॥ अनुरागं चोपैतीति इति वत् तथा रक्षांसि भीतानि संति

अर्जुन उवाच ॥ स्थाने हृषीकेश तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च ॥ रक्षांसि भीता
नि दिशो द्रवन्ति सर्वे नमस्यंति च सिद्धसंघाः ॥ ३६ ॥

दिशः प्रति द्रवन्ति पलायंति यत् ॥ सर्वे योगमंत्रादिसिद्धानां संघा नमस्यंति इति यत् ॥ तच्च
स्थाने युक्तमेव न चित्रमित्यर्थः ॥ ३६ ॥ तत्र हेतुमाह ॥ कस्मादिति ॥ हे महात्मन् ॥ हे अनंत हे दे
वेश ॥ हे जगन्निवास ॥ कस्माद्धेतोस्ते तुभ्यं न नमेरन् नमस्कारं कुर्युः ॥ कथंभूताय ब्रह्मणोपि गरी

गीता०स० यसेगुरुतराय ॥ आदिकर्त्रेच ॥ ब्रह्मणोपिजनकाय ॥ किंच ॥ सत्व्यक्तंचअसत्अव्यक्तंचता
१०१० भ्यांपरंमूलंकारणंयदक्षरंब्रह्मतत्त्वमेव ॥ एतैर्नवभिर्हेतुभिस्त्वांसर्वेनमंतीतिनचित्रमित्यर्थः
३७ ॥ किंच ॥ त्वमिति ॥ त्वमादिदेवोदेवानामादिर्यतःपुराणःअनादिपुरुषस्त्वं ॥ अतएव ॥

कस्माच्चतेननमेरन्महात्मन्गरीयसेब्रह्मणोप्यादिकर्त्रे ॥ अनंतदेवेशजगन्निवासत्वम
क्षरंसदसत्तत्परंयत् ॥ ३७ ॥ त्वमादिदेवःपुरुषःपुराणस्त्वमस्यविश्वस्यपरंनिधानं ॥
वेत्तासिवेद्यंचपरंविधामत्वयाततंविश्वमनंतरूपं ॥ ३८ ॥

त्वमस्यविश्वस्यपरंनिधानंलयस्थानं ॥ तथाविश्वस्यवेत्ताविदिताज्ञाताचत्वंयच्चवेद्यंवे
स्तुजातंपरंमधामवैष्णवंपदंतदपित्वमेवासि ॥ अतएव ॥ हेअनंतरूपस्त्वयैवविश्वंततं ११९
व्याप्तमिति ॥ ३८ ॥

सर्वदेवकात्मकस्त्वमितिस्तुवन्स्वयंनमस्करोतिवाय्वादिरूपसर्वदेवतात्मत्वोपलक्षणार्थमु
क्तंप्रजापतिःप्रपितामहस्तस्यापिजनकत्वात् ॥ प्रपितामहश्चअतस्तेतुभ्यंसहस्रकृत्वःसहस्रशो
नमोस्तुते ॥ भूयोपिपुनरपिसहस्रकृत्वोनमोनमइतिभक्तिश्रद्धातिरेकेणनमस्कारेपुनरुक्तिम

वायुर्यमोग्निर्वरुणःशशांकःप्रजापतिस्त्वंप्रपितामहश्च ॥ नमोनमस्तेस्तुसहस्रकृत्वः
पुनश्चभूयोपिनमोनमस्ते ॥ ३९ ॥ नमःपुरस्तादथपृष्ठतस्तेनमोस्तुतेसर्वतएवसर्व ॥
अनंतवीर्यामितविक्रमस्त्वंसर्वंसमाप्नोषिततोसिसर्वः ॥ ४० ॥

नधिगच्छन्बहुशःप्रणमति ॥ ३९ ॥ किंच ॥ नमइति ॥ हेसर्वास्वपिदिक्षुतुभ्यंनमोस्तु ॥ सर्वात्मकत्वं
सुपपादयन्नाह ॥ अनंतवीर्यंसामर्थ्यंयस्यतथाअमितोविक्रमःपराक्रमोयस्यसः ॥ एवंभूतस्त्वंसर्वंवि
श्वंसम्यगंतर्बहिश्चसमाप्नोषि ॥ सुवर्णमिवकटककुंडलादीन्स्वकार्यंव्याप्यवर्तसेततःसर्वस्वरूपोसि ॥ ४०

इदानींभगवन्तंक्षमापयति ॥ सखेति ॥ द्वाभ्यां ॥ तंप्राकृमयासखेत्येवंमत्वाप्रसभंहठेनतिरस्कारे
ण ॥ यदुक्तं ॥ तत्क्षामयेत्वामित्युत्तरेणान्वयः ॥ किंतदेहेकृष्ण ॥ हेयादव ॥ हेसखेतिचसंधिरा
र्षः ॥ प्रसभोक्तौहेतुः ॥ तवमहिमानमिदंचविश्वरूपमजानतामयाप्रमादात्प्रणयेनहेतुनापि

सखेतिमत्वाप्रसभंयदुक्तंहेकृष्णहेयादवहेसखेति ॥ अजानतामहिमानंतवेदंमयाप्र
मादात्प्रणयेनवापि ॥ ४१ ॥ यच्चावहासार्थमसत्कृतोसिविहारशय्यासनभोजनेषु ॥
एकोथवाप्यच्युततत्समक्षंतत्क्षामयेत्वामहमप्रमेयं ॥ ४२ ॥

वाप्युक्तमिति ॥ किंच ॥ ४१ ॥ यच्चेति ॥ हेअच्युत ॥ यच्चपरिहासार्थंक्रीडादिषुतिरस्कारः ॥ ए
कःएकलः ॥ सखीन्विनारहसिस्थितइत्यर्थः ॥ अथवातत्समक्षंतेषांपरिहसतांसखीनांसमक्षं
न पुरेपितत्सर्वमपराधमजानतानतात्वांअप्रमेयंअचिंत्यप्रभावंक्षामयेक्षमांकारयामि ॥ ४२ १११

अचिंत्यप्रभावमेवाह ॥ पितेति ॥ नविद्यतेप्रतिमाउपमायस्यसोप्रतिमः ॥ तथाविधःप्रभावोयस्यतवहेऽ
प्रतिमप्रभावत्वमस्यचराचरस्यपितासि ॥ जनकोसि ॥ अतएवपूज्यश्चगुरुरीश्वरोगरीयान्गुरुतरः ॥ अतोलो
कत्रयेपित्वत्समएवतावदन्योनास्तिपरमेश्वरस्त्वान्यस्याभावात् ॥ ततोभ्यधिकःकुतःस्यात् ॥ ४३ ॥
यस्मादेवंतस्मादिति ॥ तस्मात्त्वामीशंजगतःस्वामिनमीड्यंस्तुत्यंप्रसादयामिकथंकायंप्रणिधायदंडव

पितासिलोकस्यचराचरस्यत्वमस्यपूज्यश्चगुरुर्गरीयान् ॥ नत्वत्समोस्त्यभ्यधिकःकुतोन्योलोकत्र
येप्यप्रतिमप्रभावः ॥ ४३ ॥ तस्मात्प्रणम्यप्रणिधायकायंप्रसादयेत्वामहमीशमीड्यं ॥ पितेवपुत्रस्यस
खेवसख्युःप्रियःप्रियायार्हसिदेवसोढुं ॥ ४४ ॥
न्निपत्यप्रणम्यनत्वा ॥ अतस्त्वंममापराधंसोढुंक्षंतुमर्ह
सिकस्येवपुत्रस्यापराधंकृपयापितायथासहतेसख्युर्मित्रस्यापराधंसखानिरुपाधिबांधुर्यथाप्रियश्च
प्रियायाअपराधंतत्प्रियायथातद्वत् ॥ ४४ ॥ एवंक्षमापयित्वाप्रार्थयते ॥ अदृष्टपूर्वमिति ॥ द्वाभ्यां ॥ हेदेव

अदृष्टं तव रूपं दृष्ट्वा हृषितोस्मि तथा भयेन च मे मनः प्रव्यथितं प्रचलितं । तस्मात्त्वमव्ययानिवर्त्तयेत
देवरूपं दर्शय हे देवेश ॥ हे जगन्निवास प्रसन्नो भव ॥ ४५ तदेव रूपं विशेषयन्नाह ॥ किरीटिनमिति ॥ कि
रीटवन्तं गदावन्तं चक्रहस्तं त्वां द्रष्टुमिच्छामि पूर्वं यथा दृष्टोसि तथैव ॥ अतो हे सहस्रबाहो ॥ हे विश्वमूर्ते ॥ इ
दं रूपं संहृत्य तेनैव किरीटादियुक्तेन चतुर्भुजेन रूपेण आभव आविर्भव तदनेनाग्नी रूपमर्जुनः पूर्वमपि किरी

अदृष्टपूर्वं हृषितोस्मि दृष्ट्वा भयेन च प्रव्यथितं मनो मे ॥ तदेव मे दर्शय देवरूपं प्रसीद देवेश जगन्निवास
४५ ॥ किरीटिनं गदिनं चक्रहस्तमिच्छामि त्वां द्रष्टुमहं तथैव ॥ तेनैव रूपेण चतुर्भुजेन सहस्रबाहो भव
विश्वमूर्ते ॥ ४६ ॥
टादियुक्तमेव पश्यतीति गम्यते ॥ युक्तश्चैतद्विश्वरूपदर्शने किरीटिनं गदिनं च
क्रिणं च पश्यामीति ॥ तच्च बृहत्किरीटाद्यभिप्रायेण ॥ यद्वा ॥ एतावत्तं कालं यत्त्वं किरीटिनं चक्रिनं
च सुप्रसन्नमपश्यं तं न वेदानीं तेजोराशिं दुर्निरीक्ष्यं पश्यामीत्येवं तत्त्रवचनं व्यक्तिरित्यविरोधः ॥ ४६ ११२

एवं प्रार्थितः सन् तमाश्वासयन् ॥ श्रीभगवानुवाच ॥ मयेति त्रिभिः ॥ हे अर्जुन ॥ किमिति ॥ त्वं बिभेषि य
तो मया प्रसन्नेन त्वदनुग्रहायानवेदं परमुत्तमं रूपं दर्शितं ॥ आत्मनो मम योगात्योगमायासामर्थ्यात्परम
त्वमाह ॥ तेजोमयं विश्वं विश्वात्मकं चानंतं चाद्यं च यन्मम रूपं त्वदन्यो न त्वादृशाः कादन्येन न पूर्वदृ
ष्टं तत ॥ द्वौ त्वे समायां भीष्मादिभिर्दृष्टत्वादेवं व्याख्यातं ॥ ४७ एतद्दर्शनमिति दुर्लभं न जातं कृतार्थोसि

श्रीभगवानुवाच ॥ मया प्रसन्नेन तवार्जुनेदं रूपं परं दर्शितमात्मयोगात् ॥ तेजोमयं विश्वमनंतमाद्यं
यन्मे त्वदन्येन न दृष्टपूर्वं ॥ ४७ न वेदयज्ञाध्ययनैर्न दानैर्न च क्रियाभिर्न तपोभिरुग्रैः ॥ एवंरूपः शक्य अहं
नृलोके द्रष्टुं त्वदन्येन कुरुप्रवीर ॥ ४८
त्याह ॥ न वेदेति ॥ वेदाध्ययनातिरेकेण यज्ञाध्ययनस्याभावाद्यज्ञ
विनयपूर्वकं कल्पसूत्राद्यध्ययनं ॥ वेदानां यज्ञविद्यानां चाध्ययनैरित्यर्थः ॥ न च दानैर्न च क्रियाभिरग्निहोत्रादिभिः
न चोग्रैस्तपोभिश्चांद्रायणादिभिः ॥ एवंरूपोहं त्वत्तोन्येनामुष्य लोके द्रष्टुं शक्यः ॥ अपितु त्वमेव केवलं मत्प्रसादे
दृष्टवान् कृतार्थोसि ॥ ४८ ॥

गीता०स० एवमपि चेत्तवेदं रूपं घोरं दृष्ट्वा व्यथा भवति॥ तर्हि तदेव रूपं दर्शय॥ मित्याह॥ इदृक् इदृशं मदी
११३ यं घोरं रूपं दृष्ट्वा ते व्यथा मास्तु विमूढभावो मूढत्वं च मास्तु व्यपगतभयः प्रीतमनाश्च सन् पुनस्त्वं
तदेवेदं मम रूपं प्रपश्य॥ ४९॥ एवमुक्त्वा प्राक्तनमेव रूपं दर्शितवानिति॥ संजय

मा ते व्यथा मा च विमूढभावो दृष्ट्वा रूपं घोरमीदृङ्ममेदं। व्यपेतभीः प्रीतमनाः पुनस्त्वं त
देव मे रूपमिदं प्रपश्य॥ ४९॥ संजय उवाच। इत्यर्जुनं वासुदेवस्तथोक्त्वा स्वकं रूपं दर्शया
मास भूयः। आश्वासयामास च भीतमेनं भूत्वा पुनः सौम्यवपुर्महात्मा॥ ५०॥

उवाच॥ इति श्रीवासुदेवोऽर्जुनमेवमुक्त्वा यथा पूर्वमासीत्॥ तथैव किरीटादियुक्तं चतुर्भुज
स्वीयरूपं पुनर्दर्शयामास॥ एनमर्जुनं भीतमेनं प्रसन्नवपुर्भूत्वा पुनरप्याश्वासितवान् महा ११३
विश्वरूपः कृपालुरिति वा॥ ५०॥

ततो निर्भयः सन्नर्जुन उवाच। दृष्ट्वेति। सचेताः प्रसन्नचित्त इदानीं संवृत्तः जातोऽस्मि प्रकृतिं स्वा
स्थ्यं च प्राप्तोऽस्मि शेषं स्पष्टं॥ ५१॥ सकृतस्यानुग्रहस्यातिदुर्लभत्वं दर्शयन्॥ श्रीभगवानुवाच॥ सु
दुर्दर्शमिति॥ यन्मम विश्वरूपं त्वं दृष्टवानसि इदं सुदुर्दर्शं स्वत्यं तद्द्रष्टुमशक्यं॥ यतो देवा अप्य

अर्जुन उवाच॥ दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन। इदानीमस्मि संवृत्तः सचेताः प्रकृतिं ग
तः॥ ५१॥ श्रीभगवानुवाच सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम। देवा अप्यस्य रूपस्य नित्यं दर्शन
कांक्षिणः॥ ५२॥ नाहं वेदैर्न तपसा न दानेन न चेज्यया। शक्य एवंविधो द्रष्टुं दृष्टवानसि यन्मम॥ ५३॥

स्य रूपस्य सर्वदा दर्शनमिच्छन्ति केवलं न तु पुनरिदं पश्यंति॥ ५२॥ तत्र वेदैर्नाहमिति तस्य स्पष्टार्थः॥ केनो
पायेन तर्हि द्रष्टुं शक्य इति॥ ५३॥ तत्राह॥ भक्त्येति॥ अनन्यया मदेकनिष्ठया भक्त्या तु एवंभूतो
विश्वरूपस्तत्त्वेन परमार्थतो ज्ञातुं शक्यः। शास्त्रतो द्रष्टुं च प्रत्यक्षतः प्रवेष्टुं च तादात्म्येन शक्यो नान्ये

श्र

गीता०स० रूपायैरित्यर्थः ॥ ५४ ॥ अतः सर्वशास्त्रसारं परमं रहस्यं एवेत्याह ॥ मत्कर्मकृदिति ॥ मदर्थंकर्म-
११४ करोतीति मत्कर्मकृत् ॥ अहमेव परमः पुरुषार्थो यस्य सः ॥ ममैव भक्तिमाश्रितः पुत्रादिषु
संगवर्जितः ॥ निर्वैरः सर्वभूतेषु च एवंभूतो यः स मामाप्नोति ॥ नान्य इति ॥ ५५ ॥ वेदैरपि सु-

भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ॥ ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप ॥ ५४ ॥ मत्क-
र्मकृन्मत्परमो मद्भक्तः संगवर्जितः ॥ निर्वैरः सर्वभूतेषु यः स मामेति पांडव ॥ ५५ ॥ इति श्री-
भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे विश्वरूपदर्शनो-
नाम एकादशोऽध्यायः ॥ ११ ॥

दुर्दर्शं तपोयज्ञादिकोटिभिः ॥ भक्त्याय भगवानेव विश्वरूपमद-
र्शयत् ॥ १ ॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे टी- ११४
कायां श्रीधरस्वामिविरचितायां एकादशोऽध्यायः ॥ ११ ॥ ॥

निर्गुणोपासनस्यैवं सगुणोपासनस्य च ॥ श्रेयः कतरदित्येवं निर्णेतुं द्वादशोद्यमः ॥ १ ॥ पूर्वाध्यायांते
मत्कर्मकृन्मत्परम इत्येवं भक्तिनिष्ठस्य तत्त्वमुक्तं कौन्तेय प्रतिजानीहीत्यादिना ॥ ततस्ततस्तस्यैव श्रे-
ष्ठत्वं ॥ तथा तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यत इत्यादिना च सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्य-
सीत्यादिना च ज्ञाननिष्ठस्य श्रेष्ठत्वमुक्तं ॥ एवमुभयोः श्रेष्ठत्वेपि विशेषजिज्ञासया भगवंतं प्रत्यर्जुन उवा-

अर्जुन उवाच ॥ एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ॥ ये चाप्यक्षरमव्यक्तं तेषां के योगवि-
त्तमाः ॥ १ ॥ श्रीभगवानुवाच ॥ मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ॥ श्रद्धया परयोपेता-
स्ते मे युक्ततमा मताः ॥ २ ॥

च ॥ एवमिति ॥ एवं सर्वकर्मार्पणादिना सततं युक्ताः त्वन्निष्ठाः संतो ये भ-
क्तास्त्वां विश्वरूपं सर्वज्ञं सर्वशक्तिं पर्युपासते ध्यायन्ति ॥ ये चाप्यक्षरं ब्रह्म अव्यक्तं निर्विशेषं उपा-
सते ॥ तेषामुभयोर्मध्ये के अतिशयेन योगविदो श्रेष्ठा इत्यर्थः ॥ तत्र प्रथमाः श्रेष्ठा इत्युत्तरं श्रीभ-

गवानुवाच॥मयीति॥मयिपरमेश्वरेसर्वज्ञत्वादिगुणविशिष्टेमनआवेश्यैकाग्र्यंकृत्वानित्ययुक्ता
मत्कर्मानुष्ठानादिनामन्निष्ठाःसंतःश्रद्धयापरयायुक्ताः॥येमामाराधयंतितेयुक्ततमाममाभि
मताः॥२॥तर्हिइतरेकिंनश्रेष्ठाइत्यतआह॥येत्विति॥द्वाभ्यां॥येत्वक्षरमुपासते।तेध्यायंतितेपिमामे

येत्वक्षरमनिर्देश्यमव्यक्तंपर्युपासते।सर्वत्रगमचिंत्यंचकूटस्थमचलंध्रुवं॥३॥संनियम्येंद्रि
यग्रामंसर्वत्रसमबुद्धयः।तेप्राप्नुवंतिमामेवसर्वभूतहितेरताः॥४॥

वप्राप्नुवंतीतिद्वयोरन्वयः॥अक्षरस्यलक्षणमनिर्देश्यमित्यादि॥अनिर्देश्यंशब्देनव्यपदेष्टुमश
क्यं॥अतोव्यक्तंरूपादिहीनंसर्वत्रगंसर्वव्यापि॥अव्यक्तत्वादेवाचिंत्यं॥कूटस्थं॥कूटेमायाप्र
पंचेअधिष्ठानत्वेनस्थितं॥अचलंवृद्ध्यादिरहितंअतएवध्रुवंनित्यंसदैकरूपमित्यर्थः॥ननुचतेपि
चेन्मामेवप्राप्नुवंतितर्हितरेषांयुक्ततमत्वंकुतइत्यपेक्षायां॥४॥

क्लेशाक्लेशकृतंविशेषमाह॥क्लेशइति॥त्रिभिः॥अव्यक्तेकेनिर्विशेषणेअक्षरेआसक्तंचेतोयेषां
तेषांक्लेशोधिकतरः॥हियस्मादव्यक्तविषयागतिर्निष्ठादेहाभिमानिभिर्दुःखेनयाभवत्येवमवाप
ते॥देहाभिमानिनांनित्यंप्रत्यक्प्रवणत्वस्यदुर्घटत्वादितिभावः॥५॥मद्भक्तानांतुमत्प्रसादादनायास

क्लेशोधिकतरस्तेषामव्यक्तासक्तचेतसां।अव्यक्ताहिगतिर्दुःखंदेहवद्भिरवाप्यते॥५॥
येतुसर्वाणिकर्माणिमयिसंन्यस्यमत्पराः।अनन्येनैवयोगेनमांध्यायंतउपासते॥६॥
तेषामहंसमुद्धर्तामृत्युसंसारसागरात्।भवामिनचिरात्पार्थमय्यावेशितचेतसां॥७॥

तणवसिद्धिर्भवतीत्याह॥येत्विति॥द्वाभ्यां॥मयिपरमेश्वरेसर्वाणिकर्माणिसंन्यस्यसमर्प्यमत्
परामूत्वामांध्यायंते॥अनन्येननविद्यतेअन्योभजनीयोयस्मिन्तेनैवएकान्तभक्तियोगेनोपा
सतइत्यर्थः॥६॥एवंमय्यावेशितचेतसोयेतेषांमृत्युयुक्तात्संसारसागरादहंसम्यगुद्धर्ताअचिरेणभवा
मि॥७॥

गीता०स० ११६ यस्मादेवंतस्मान्मय्येवेति॥मय्येवसंकल्पविकल्पात्मकंमनः।आधत्स्वस्थिरीकुरु॥बुद्धिम
पिअध्यवसायात्मिकांमय्येवप्रवेशय।एवंकुर्वन्मत्प्रसादेनलब्धज्ञानः सन्नूर्द्धंदेहान्तेमय्ये
वंनिवसिष्यसिमदात्मनावासंकरिष्यसि॥निवत्स्यसिनात्रसंशयः।तथाचश्रुतिः।देहान्तेदे-

मय्येवमनआधत्स्वमयिबुद्धिंनिवेशय॥ निवसिष्यसिमय्येवमतऊर्द्धंनसंशयः॥
॥८॥अथचित्तंसमाधातुंनशक्नोषिमयिस्थिरं॥अभ्यासयोगेनततोमामिच्छाप्तुंध-
नंजय॥९॥

वःपरंब्रह्मतारकंव्याचष्टइति॥८॥असमर्थंप्रतिसुगमोपायमाह।अथेति।स्थिरंयथा
भवत्येवंमयिचित्तंधारयितुंयदिशक्तोनभवसि॥तर्हिविक्षिप्तंपुनःपुनःप्रत्याहृत्यममानु-
स्मरणलक्षणोयोभ्यासयोगस्तेनमांप्राप्तुमिच्छप्रयत्नंकुरु॥९॥ ११६

यदिपुनः।अभ्यासइति।अभ्यासेपियद्यशक्तोसितर्हिमत्प्रीत्यर्थानियानिकर्माणिएकादस्युप
वासव्रतचर्यानामसंकीर्तनादीनि।तदनुष्ठानमेवपरमंयस्यतादृशोभव।एवंभूतानिकर्माण्य
पिमदर्थंकुर्वन्मोक्षंप्राप्स्यसि॥१०॥अत्यंतमवरुद्धर्मपरिनिष्ठायामसक्तस्यपक्षांतरमाह।
अथैतदपीति।अथैतदपिकर्तुमशक्तोसिमद्योगंमदेकशरणमाश्रितःसन्सर्वेषांदृष्टाया

अभ्यासेप्यसमर्थोसिमत्कर्मपरमोभव॥मदर्थमपिकर्माणिकुर्वन्सिद्धिमवाप्स्यसि॥१०॥
अथैतदप्यशक्तोसिकर्तुमुद्योगमाश्रियः॥सर्वकर्मफलत्यागस्त्यागाच्छांतिरनंतरं॥११॥

नामावश्यकानांवाग्निहोत्रादिकर्मणांफलानिनियतचित्तोभूत्वापरित्यज।एतदुक्तंभवति।
मुपानावदीश्वराज्ञावायथाशक्तिकर्माणिकर्तव्यानिफलंपुनर्दृष्टमदृष्टंवापरमेश्वराधीनमि-
त्येवंमयिभारमारोप्यफलाशक्तिंपरित्यज्यवर्त्तमानोमत्प्रसादेनकृतार्थोभविष्यसीति॥११॥

तमिमं फलत्यागं स्तौति ॥ श्रेयो सम्यक् ज्ञान रहितादभ्यासात् युक्ति सहितोपदेश पूर्वकं ज्ञानं श्रेष्ठं
तस्मादपि तत्पूर्वकं ध्यानं विशिष्टं ॥ तेन स्तु तं पश्यति निः कृतेध्यायमान इति श्रुतेः तस्मादपि ज्ञा
कर्मणः कर्मफलत्यागः श्रेष्ठः ॥ तस्मादेवंभूतात्यागात् कर्मसु तत्फलेषु वा शक्तिनिवृत्त्या वादेम

श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते ॥ ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिरन
न्तरं ॥ १२ ॥ अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ॥ निर्ममो निरहंकारः समदुःखसु
खः क्षमी ॥ १३ ॥

च समनंतरमेव संसारशांतिर्भवति ॥ १२ ॥ एवंभूतस्य भक्तस्य क्षिप्रमेव परमेश्वरप्रसा
ददेतून्धर्मानाह ॥ अद्वेष्टेत्यष्टभिः ॥ सर्वभूतानां यथा यथा अद्वेष्टा मैत्रः करुणश्च तत्तमे
षु द्वेषमकृत्वा ॥ १३ ॥ ११८

संतुष्ट इति ॥ सततं ॥ लाभेऽलाभे च संतुष्टः प्रसन्नचित्तः ॥ योगी अप्रमत्तः यतात्मा संयतस्वभावः
दृढो मद्विषयो निश्चयो यस्य ॥ मय्यर्पिते मनोबुद्धे येन एवंभूतो मद्भक्तः स मे प्रियः १४ किंच ॥ य
स्मादिति ॥ यस्मात्का रणाल्लोको जनो नोद्विजते भयं शंकां क्षोभं न प्राप्नोति ॥ यश्च लोकान्नोद्विज

संतुष्टः सततं योगी यतात्मा दृढनिश्चयः ॥ मय्यर्पितमनोबुद्धिर्यो मे भक्तः स मे प्रियः ॥ १४ ॥
यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ॥ हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥ १५ ॥
अनपेक्षः शुचिर्दक्षः उदासीनो गतव्यथः ॥ सर्वारंभपरित्यागी यो मद्भक्तः स मे प्रियः ॥ १६ ॥

ते यश्च स्वभाविकैर्हर्षादिभिर्मुक्तः ॥ तत्र हर्षः ॥ स्वस्येष्टार्थलाभे उत्साहः ॥ अमर्षः परस्य लाभे
असहनं भयं त्रासः ॥ उद्वेगो भयादिनिमित्तश्चित्तक्षोभः ॥ एतैर्विमुक्तो यो मद्भक्तः स मे प्रियः ॥ १५ ॥
किंच ॥ अनपेक्ष इति ॥ अनपेक्षः यदृच्छोपस्थितेप्यर्थे निस्पृहः शुचिर्बाह्याभ्यंतरशौचसंपन्नः

दक्षो नत्व सः ॥ उदासीनः पक्षपातरहितः ॥ गतव्यथः ॥ आधिशून्यः सर्वान्दृष्टादृष्टार्थाना-
रंभानुद्यमान्परित्यक्तुं शीलं यस्य सः ॥ एवंभूतः सर्वो मद्भक्तः स च मे प्रियः ॥ १६ ॥ किंच ॥
यो नेति ॥ प्रियं प्राप्य यो न हृष्यति ॥ अप्रियं प्राप्य यो न द्वेष्टि ॥ इष्टार्थनाशे सति यो न शोचति ॥

यो न हृष्यति न द्वेष्टि न शोचति न कांक्षति ॥ शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः ॥
१७ ॥ समः शत्रौ च मित्रे च तथा मानापमानयोः ॥ शीतोष्णसुखदुःखेषु तथा संग-
विवर्जितः ॥ १८ ॥ अप्राप्तमर्थं न कांक्षति शुभाशुभे पुण्यपापे परित्यक्तुं शीलं यस्य ॥
एवंभूतो यो भक्तिमान्स मे प्रियः ॥ १७ ॥ किंच ॥ सम इति ॥ शत्रौ मित्रे च समः ॥ एकरूपः ॥ मा-
नापमानयोरपि तथा सम एव हर्षविषादशून्य इत्यर्थः ॥ शीतोष्णयोः सुखदुःखयोश्च समः
संगविवर्जितः क्वचिदप्यनासक्तः ॥ १८ ॥ ॥ ॥

तुल्य इति ॥ तुल्ये निंदास्तुती यस्य मौनी संयतवाक् ॥ येन केनचिद्यथालब्धेन संतुष्टः ॥ अनिके-
तो नियतवासशून्यः ॥ स्थिरमतिर्व्यवस्थितचित्तः ॥ एवंभूतो भक्तिमान्मे प्रियो नरः ॥ १९ ॥ उक्तं च
धर्मजातमुपसंहरति ॥ ये त्विति ॥ यथोक्तं उक्तप्रकारं धर्म एवामृतं अमृतत्वसाधनत्वात् ॥ धर्म्या-

तुल्यनिंदास्तुतिर्मौनी संतुष्टो येन केनचित् ॥ अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः ॥ १९
ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते ॥ श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ॥ २० ॥ इति श्री-
भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे भक्तियोगो नाम द्वादशोऽध्यायः ॥ १२

मृतमिदं केचित्पठंति ॥ तद्ये उपासते अनुतिष्ठंति ॥ श्रद्धधाना मत्परमा भक्तास्ते च मे प्रिया इति ॥ दुः-
खमव्यक्तवर्त्मैतद्दृद्विद्यमतो बुधः ॥ सुसेव्यं कृष्णपदांभोजभक्तिसत्पथमाश्रयेत् ॥ २० ॥ इति ॥
श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां सुबोधिन्यां टीकायां श्रीधरस्वामिविरचितायां द्वादशोऽध्यायः ॥ १२ ॥

भक्तानामहं समुद्धर्त्ता संसारादित्यवादीत् ॥ तयोर्द्वयोरप्यतत्सिद्धेत तत्त्वज्ञानमुदीर्यते ॥ १ ॥ तेषामहं स
मुद्धर्त्ता मृत्युसंसारसागरात् ॥ भवामीति पूर्वं प्रतिज्ञातं । न चात्मज्ञानं विना संसारादुद्धरणं संभवा
तीति । तत्त्वज्ञानोपदेशार्थं प्रकृतिपुरुषविवेकार्थमध्यायमारभते । तत्र यत्सप्तमेऽध्याये । अपरापरा
चेति प्रकृतिद्वयमुक्तं । तयोरविवेकाज्जीवभावमापन्नस्य जीवस्यायं संसारः । याभ्यां च जीवोपभोगार्थ

अर्जुन उवाच । प्रकृतिं पुरुषं चैव क्षेत्रं क्षेत्रज्ञमेव च ॥ एतद्वेदितुमिच्छामि ज्ञानं ज्ञेयं च केशव ॥ १ ॥
श्रीभगवानुवाच । इदं शरीरं कौंतेय क्षेत्रमित्यभिधीयते ॥ एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञमिति तद्विदः २

मीश्वरः सृष्ट्यादिषु प्रवर्त्तते । तदेव प्रकृतिद्वयं क्षेत्रक्षेत्रज्ञशब्दवाच्यं परस्परं विविक्तं तत्त्वतो निरूप
यिष्यन् । श्रीभगवानुवाच । इदमिति भोगायतनं शरीरं क्षेत्रमित्यभिधीयते संसारस्य प्ररोहभूमित्वात्
एतद्यो वेत्ति अहं ममेति मन्यते । तं क्षेत्रज्ञं प्राहुः कृषीवलवत्तत्फलभोक्तृत्वात् । तद्विदः क्षेत्रक्षेत्रज्ञयोर्विवेक
ज्ञाः ॥ २ ॥ ११९

तदेवं संसारिस्वरूपमुक्त्वा । इदानीं तस्यैव पारमार्थिकमसंसारिस्वरूपमाह । क्षेत्रज्ञमिति । तं चैव क्षेत्रज्ञं
संसारिणं वस्तुतः सर्वक्षेत्रेष्वनुगतं मामेव विद्धि । तत्त्वमसीति श्रुत्याज्ञप्तेन चिदंशेन मद्रूपस्योक्त
त्वात् । न्यादरार्यमेतत् ज्ञानं स्तौति । क्षेत्रक्षेत्रज्ञयोर्यदेवं वैलक्षण्येन ज्ञानं तदेव मोक्षहेतुत्वात् मम
ज्ञानं मतं । अन्यत्तु ह्यापांडित्यं बंधहेतुत्वादित्यर्थः । तदुक्तं । तत्कर्म यन्न बंधाय सा विद्या या विमु

क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत ॥ क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम ॥ ३ ॥

क्तये ॥ आयासायापरं कर्म्म विद्यान्या शिल्पनैपुणमिति ॥ ३ ॥ अत्र चतुर्विंशतिभेदैर्भिन्ना प्र
कृतिः क्षेत्रमित्यभिप्रेतं तयापि देहरूपेण परिणतायामेव तस्यामहंभावेनाविवेकः स्फुरतीति
तद्विवेकार्थमिदं शरीरं क्षेत्रमित्याद्युक्तं । तदेव तत्त्वप्रपंचयिष्यन् प्रतिजानीते । तत्क्षेत्रमिति
यदुक्तं मया क्षेत्रं । तच्च क्षेत्रं यत्स्वरूपतो जडं दृश्यादिस्वभावं यादृक् यादृशं चेच्छादिधर्मकं य

गीता०म०
१२०

द्विकारियैरिंद्रियादिविकारैर्युक्तं ॥ यतश्च प्रकृतिपुरुषसंयोगाद्भवति । यैः स्थावरजंगमादिभेदैर्भि
न्नमित्यर्थः ॥ स च क्षेत्रज्ञो यः स्वरूपतो यत्प्रभावश्च अचिंत्यैश्वर्ययोगेन यैः प्रभावैः संपन्नस्तत्सर्वं
संक्षेपतो मे वाक्यतः शृणु ॥ केन विस्तरेणोक्तस्यायं संक्षेप इत्यपेक्षायामाह । ऋषिभिरिति । ऋषिभिर्वसिष्ठा
द्यादिभिर्योगशास्त्रेषु ध्यानधारणाविषयत्वेन वैराजादिरूपेण बहुधा गीतं । ब्रह्मणः सूत्रैः पदैश्च

तत्क्षेत्रं यच्च यादृक्च यद्विकारि यतश्च यत् । स च यो यत्प्रभावश्च तत्समासेन मे शृणु ॥ ३ ॥

ब्रह्म सूच्यते सूच्यते एभिरिति ॥ ब्रह्मसूत्राणि यतो वा इमानि भूतानि जायंते इत्यादीनि तत्वस्य लक्ष
णपराण्युपनिषद्वाक्यानि ॥ तथा च ब्रह्म पद्यते गम्यते साक्षात्क्रियते एभिरिति पदानि स्वरू
पलक्षणपराणि सत्यं ज्ञानमनंतं ब्रह्मेत्यादीनि तैश्च बहुधा गीतं किंच । हेतुमद्भिः सदेव सोम्येदमग्र
मासीत् । कथमसतः सज्जायतेति । तथा को ह्येवान्यात्कः प्राण्यात् यदेष आकाश आनंदो न स्यात् । एष ह्येवा
नंदयति ॥ ४ ॥ १२०

इत्यादियुक्तिमद्भिरन्यथानुपपत्त्या चेष्टां कः कः कुर्यात् । प्राणात् प्राणानां व्यापारं को वा कुर्यादिति श्रु
तिपदयोरर्थः ॥ विनिश्चितैरुपक्रमोपसंहारैकवाक्यतयाऽसंदिग्धार्थप्रतिपादकैरित्यर्थः ॥ य
द्येवमेतैर्विस्तरेणोक्तं क्षेत्रं संग्रहं संक्षेपतस्तुभ्यं कथयिष्यामि शृण्वित्यर्थः । यद्वा ॥ अथातो ब्रह्मजिज्ञा
सेत्यादीनि ब्रह्मसूत्राणि गृह्यंते ॥ तान्येव ब्रह्मसूत्राणि ब्रह्म पद्यते निश्चीयते एभिरिति पदानि तैर्हे

ऋषिभिर्बहुधा गीतं छंदोभिर्विविधैः पृथक् ॥ ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चि
तैः ॥ ५ ॥

तुमद्भिरीक्षतेर्नाशब्दमानंदमयोऽभ्यासादित्यादिभिर्युक्तिमद्भिर्विनिश्चितार्थैर्ज्ञे
षं समानं ॥ ५ ॥ तत्क्षेत्रस्वरूपमाह ॥ महाभूतानीति ॥ द्वाभ्यां ॥ महाभूतानि भूम्यादीनि अहंका
रस्तत्कारणभूतः ॥ बुद्धिर्विज्ञानात्मकं महत्तत्वं ॥ अव्यक्तं च मूलप्रकृतिः ॥ इंद्रियाणि बाह्यानि
दश एकं च मनः ॥ इंद्रियगोचराश्च पंच ॥ तन्मात्ररूपाः एव शब्दादयः ॥ आकाशादिविशेषगुण

एतैर्व्यक्ताः संतः इंद्रियविषयाः पंच॥ ६॥ तदेवं चतुर्विंशतितत्त्वान्युक्तानि ॥ इच्छादयः
प्रसिद्धाः संघातः शरीरं ॥ चेतना ज्ञानात्मिका मनोवृत्तिः ॥ धृतिर्धैर्यं एते इच्छादयो दृश्यत्वान्ना-
त्मधर्माः अपितु मनोधर्माः अतः क्षेत्रांतःपातिन एव ॥ उपलक्षणं चैतत्संकल्पादीनां त-

महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च ॥ इंद्रियाणि दशैकं च पंच चेंद्रियगोचराः ॥
६॥ इच्छा द्वेषः सुखं दुःखं संघातश्चेतना धृतिः ॥ एतत्क्षेत्रं समासेन सविकारमु-
दाहृतं ॥७॥

था च श्रुतिः ॥ कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एवेति
अनेन च यादृगिति प्रतिज्ञाताः क्षेत्रधर्मा दर्शिता ॥ एतत्क्षेत्रं सविकारं विकारसहितं संक्षेपे-
ण तुभ्यं मयोक्तमिति क्षेत्रोपसंहारः ॥७॥ १२१

इदानीमुक्तलक्षणात्क्षेत्राद्विविक्ततया ज्ञेयं पुरुषं क्षेत्रज्ञं विस्तरेण वर्णयिष्यन् तत्र ज्ञानसाधनान्या-
ह ॥ अमानित्वमिति पंचभिः ॥ अमानित्वं स्वगुणश्लाघाराहित्यं अदंभित्वं दंभराहित्यं अहिंसा
परपीडावर्जनं क्षांतिः सहिष्णुत्वं ॥ आर्जवं अवक्रता ॥ आचार्योपासनं सद्गुरुसेवनं शौचं बाह्यमा-
भ्यंतरं तत्र बाह्यं मृज्जलादिना ॥ आभ्यंतरं रागादिमलक्षालनं ॥ तथा च स्मृतिः शौचं च द्विविधं प्रोक्तं

अमानित्वमदंभित्वमहिंसा क्षांतिरार्जवं ॥ आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥ ८॥
इंद्रियार्थेषु वैराग्यमनहंकार एव च ॥ जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनं ॥ ९॥

बाह्यमाभ्यंतरं तथा ॥ मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिस्तथांतरं ॥ स्थैर्यं सन्मार्गे प्रवृत्तस्य तदेक-
निष्ठता आत्मविनिग्रहः शरीरसंयमः एतज्ज्ञानमिति प्रोक्तमिति पंचमेनान्वयः ॥ ८ ॥ किंच इंद्रियार्थेष्वि-
ति ॥ जन्मादिषु दुःखदोषयोरनुदर्शनं ॥ पुनः पुनरालोचनं दुःखरूपस्य दोषस्यानुदर्शनमिति वा समस्तमन्यत ॥ ९॥

किंच ॥ असक्तिरिति ॥ असक्तिः पुत्रादिपदार्थेषु प्रीतित्यागः ॥ अनभिष्वंगः ॥ पुत्रादीनां
सुखदुःखे चाहमेव सुखी दुःखी चेत्यध्यासीतिरेको भावः ॥ इष्टानिष्टयोरुपपत्तिषु नित्यं
सर्वदा समन्विषु नित्यं सर्वदा सच्चित्तत्वं ॥१०॥ किंच ॥ मयि चेति ॥ मयि परमेश्वरे अनन्या

असक्तिरनभिष्वंगः पुत्रदारगृहादिषु ॥ नित्यं च समचित्तत्वमिष्टानिष्टो-
पपत्तिषु ॥१०॥ मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ॥ विविक्तदेशसेवित्व-
मरतिर्जनसंसदि ॥ ११ ॥

योगेन सर्वात्मदृष्ट्या अव्यभिचारिणी एकांतभक्तिः ॥ विविक्तः शुद्धः चित्तप्रसादकरः
तं देशं सेवितुं शीलं यस्य तस्य भावस्तत्त्वं ॥ प्राकृतानां जनानां संसदि सभायां अरतिः ॥ र-
त्यभावः ॥११॥ ॥ ॥

किंच ॥ अध्यात्मेति ॥ आत्मानमधिकृत्य वर्तमानं ज्ञानमध्यात्मज्ञानं तस्मिन्नित्यत्वं नित्यभावः
तत्त्वपदार्थशुद्धिनिष्ठमित्यर्थः ॥ एतज्ज्ञानमेधिस्यर्थः ॥ प्रयोजनं मोक्षस्य सर्वोत्कृष्टतालोचनमित्य-
र्थः ॥ एतदमानित्वमदंभित्वमित्यादिविंशतिसंख्याकं ॥ यदुक्तमेतज्ज्ञानमिति ॥ प्रोक्तं ज्ञानसा-
धनत्वात् ॥ अतोऽन्यथा यस्माद्विपरीतं मानित्वादि यदेतदज्ञानमिति प्रोक्तं वसिष्ठादिभिः ॥ ज्ञान-

अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनं ॥ एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ॥१२॥

विरोधित्वात् ॥ अतः सर्वथा त्याज्यमित्यर्थः ॥ १२ ॥ एभिः साधनैर्यज्ज्ञेयं तदाह ॥ ज्ञेयमिति पञ्चभिः ॥
यत्तत्प्रवक्ष्यामि श्रोतुरादरसिद्धये ज्ञानफलं दर्शयति ॥ यज्ज्ञेयमाणं ज्ञात्वा अमृतं मोक्षं प्राप्नोति ॥
किं तत् अनादिमत् ॥ आदिमन्न भवतीत्यनादिमत् परं निरतिशयं ब्रह्म अनादित्वे तावच्चैतेव ब-
हुव्रीहिणा अनादित्वसिद्धेपि पुनर्मतुः प्रयोगो छांदसः ॥ यद्वा ॥ अनादि मत्परमिति ॥ वपदच्छे

गीता॰स॰
१२३

यं मम विष्णोः परं निर्विशेषं ब्रह्मेत्यर्थः ॥ तदेवाह न सत्तन्नासदुच्यते ॥ निषेधस्य विशेषयत्वस्य बा
द्धेनोच्यते ॥ इदं तु तदुभयविलक्षणं अविषयत्वादित्यर्थः ॥ १३ ॥ नन्वेवं ब्रह्मणः सदसद्विलक्षणत्वे स
ति सर्वं खल्विदं ब्रह्म ब्रह्मैवेदं सर्वमित्यादिश्रुतिभिर्विरुद्धेतेत्याशंक्य परास्य शक्तिर्विविधैव श्रूयते ।
स्वाभाविकी ज्ञानबलक्रिया चेत्यादिश्रुतिप्रसिद्धयाचिंत्यशक्त्या सर्वात्मतां तस्य दर्शयन्नाह ॥

ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते ॥ अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ॥ १३ ॥
सर्वतःपाणिपादं तत्सर्वतोक्षिशिरोमुखं ॥ सर्वतःश्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ १४ ॥

सर्वत इति पंचभिः ॥ सर्वतःपाणयःपादाश्च यस्य तत् ॥ सर्वतोक्षीणि शिरांसि मुखानि च यस्य
तत् ॥ सर्वतःश्रुतिमत् श्रवणेंद्रिययुक्तं सल्लोके सर्वमावृत्य व्याप्य तिष्ठति ॥ सर्वप्राणिवृत्तिभिः पा
ण्यादिभिरुपाधिभिः ॥ सर्वव्यवहारास्पदत्वेन तिष्ठतीत्यर्थः ॥ १४ ॥

१२३

किंच ॥ सर्वेंद्रियेति ॥ सर्वेषां चक्षुरादीनामिंद्रियाणां गुणेषु रूपाद्याकारासु वृत्तिषु तत्तदाकारेण
भासत इति ॥ तथा सर्वाणींद्रियाणि गुणांश्च तद्विषयानाश्रयतीति वा सर्वेंद्रियैर्विवर्जितं च ॥ तथा
च श्रुतिः ॥ अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्ण इत्यादि ॥ असक्तं संगशू
न्यं तथापि सर्वं बिभर्तीति सर्वभृत् ॥ सर्वस्याधारभूतं तदेव निर्गुणं सत्त्वादिगुणरहितं गुणा

सर्वेंद्रियगुणाभासं सर्वेंद्रियविवर्जितं ॥ असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥ १५ ॥
बहिरंतश्च भूतानामचरं चरमेव च ॥ सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चांतिके च तत् ॥ १६ ॥

नां सत्त्वादीनां भोक्तृ च पालकं ॥ १५ ॥ किंच बहिरिति ॥ भूतानां चराचराणां स्वकार्या
णां बहिश्चांतश्च एव सुवर्णमिव कटककुंडलादीनां अचरं स्थावरं चरं च जंगमं भूतजा
तं तदेव कारणात्मकत्वात् कार्यस्य एवमपि सूक्ष्मत्वात् ॥ रूपादिहीनत्वात् ॥ किं तदविज्ञेयं

इदं तदिति ॥ सष्टं ज्ञानार्हं न भवति । अंतरा बहिश्च अविदुषां योजनलक्षांतरितमिव दूर
स्थं वा संवीकारायाः प्रकृतेः परत्वात् ॥ विदुषां पुनः प्रत्यगात्मत्वादंतिके चांतर्नित्यं सन्नि
हितं ॥ तथा च मंत्रः ॥ तदेजति तन्नैजति तद्दूरे तदंतिके तदंतरस्य सर्वस्य तदु सर्वस्यास्य बा

अविभक्तं च भूतेषु विभक्तमिव च स्थितं ॥ भूतभर्तृ च तज्ज्ञेयं
ग्रसिष्णु प्रभविष्णु च ॥ १७ ॥

ह्यत इति ॥ एजति चलति नैजति न चलति तत्तु अंतिक इति च्छेदः ॥ १६ ॥ किंच ॥ अविभ
क्तमिति ॥ भूतेषु स्थावरजंगमात्मकेषु अविभक्तं कारणात्मना अभिन्नं कार्यात्मना वि
भक्तं भिन्नमिवा च स्थितं च तत्पूर्वोक्तं ज्ञेयं भूतानां भर्तृ पोषकं स्थितिकाले प्रलयकाले ग्र
सिष्णु ग्रसनशीलं सृष्टिकाले प्रभविष्णुना कार्यात्मना प्रभवनशीलं ॥ १७ ॥

किंच ॥ ज्योतिषामपि ज्योतिषां चंद्रादित्यानामपि तज्ज्योतिः प्रकाशकं तत् । येन सूर्यस्तपति तेजसेद्धः
न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्युतो भांति कुतोयमग्निः । तमेव भांतमनुभाति सर्वं तस्य भासा स
र्वमिदं विभातीत्यादिश्रुतेः । अतएव तमसो अज्ञानात्परं तेनासंस्पृष्टमुच्यते । आदित्यवर्णं तमसः पर
स्तादिति श्रुतिभिः ज्ञानं च तदेव बुद्धिवृत्त्या अभिव्यक्तं । तदेव रूपाद्याकारेण ज्ञेयं च । ज्ञानेन गम्यं च ।

ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते । ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य धिष्ठितं ॥ १८ ॥
इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः ॥ मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ॥ १९ ॥

अमानित्वमदंभित्वमित्यादिलक्षणेन पूर्वोक्तेन ज्ञानसाधनेन प्राप्यमित्यर्थः ॥ ज्ञानगम्यं ॥ विशि
नष्टि ॥ सर्वस्य प्राणिमात्रस्य हृदि धिष्ठितं विशेषेण अप्रच्युतस्वरूपेण नियंतृतया स्थितं धिष्ठित
मिति पाठे अधिष्ठाय स्थितमित्यर्थः ॥ १८ ॥ उक्तं क्षेत्रादिकमधिकारिफलसहितमुपसंहरति ॥

इतीति॥ इत्येवंक्षेत्रंमहाभूतादिधृत्यंतंतथाज्ञानंचअमानित्वादितत्त्वज्ञानार्थदर्शनांतं॥ ज्ञेयं
चानादिमत्परंब्रह्मेत्यादिधिष्ठितमित्यंतंवसिष्ठादिभिर्विस्तरेणोक्तं॥ सर्वमपिमयासंक्षेपेणो
क्तं॥ एतच्चपूर्वाध्यायोक्तलक्षणोमद्भक्तोविज्ञायमद्भावायब्रह्मत्वायोपपद्यतेयोग्योभवति॥१९॥
तदेवंतत्क्षेत्रंयच्चयादृक्चेत्येवात्रसंक्षेपंचितं। इदानींतुयद्विकारियतश्चयत्सयोयत्प्रभावश्चेत्येतत्प्रपंचप्रतिज्ञा

प्रकृतिंपुरुषंचैवविद्ध्यनादीउभावपि। विकारांश्चगुणांश्चैवविद्धिप्रकृतिसंभवान्।२०।

तमेवप्रकृतिःपुरु
षयोःसंसारहेतुत्वकथनेनप्रपंचयति। प्रकृतिमितिपंचभिः। तत्रप्रकृतिपुरुषयोरादिमत्त्वेतयोरप्यन्यप्रकृत्यंत
रेणभाव्यमित्यनवस्थापत्तिःस्यात्। अतस्तावुभावनादीविद्धि। अनादेरीश्वरस्यशक्तित्वात्प्रकृतिरनादिःपु
रुषोपितदंशत्वादनादिरेव। अतएवपरमेश्वरस्यतच्छक्तीनांचानादित्वंनित्यत्वंश्रीमच्छंकरभगवत्पादकृति
भिःप्रबंधेनोपपादितमितिनास्माभिःप्रतन्यते। विकारांश्चदेहेंद्रियादीन्गुणांश्चगुणपरिणामान्सुखमोहादीन्प्रकृतेः
संभवान्संभूतान्विद्धि।२०॥

विकाराणांप्रकृतिसंभवत्वंदर्शयन्पुरुषस्यसंसारहेतुत्वंदर्शयति। कार्यकारणेति। कार्यंशरीरंकारणानिसु
खदुःखसाधनानिइंद्रियाणितेषांकर्तृत्वेतदाकारपरिणामेप्रकृतिर्हेतुरुच्यते। तथापुरुषोजीवः
सुखदुःखानांभोक्तृत्वेहेतुरुच्यते। अयंभावः। यद्यप्यचेतनायाःप्रकृतेःस्वतःकर्तृत्वंनभवति तथा
पुरुषस्याप्यविकारिणोभोक्तृत्वंनसंभवति। तथापिकर्तृत्वंतत्त्वचेतनस्यापिचेतनादृष्टवशात्संभवति।२१

कार्यकारणकर्तृत्वेहेतुःप्रकृतिरुच्यते। पुरुषःसुखदुःखानांभोक्तृत्वेहेतुरुच्यते॥२१॥
पुरुषःप्रकृतिस्थोहिभुंक्तेप्रकृतिजान्गुणान्। कारणंगुणसंगोस्यसदसद्योनिजन्मसु।२२।

तथाप्यविकारिणोजन्मरहितस्यचभोक्तृत्वंकथमित्यतआह॥ पुरुषइति॥ हियस्मात्प्रकृतिस्थः तत्का
र्यदेहतादात्म्येनस्थितःपुरुषः। अतस्तज्जनितान्सुखादीन्भुंक्ते। अस्यचपुरुषस्यसतीषुशुभदेवादियोनि
षुअसतीषुतिर्यगादियोनिषुयानिजन्मानितेषुगुणसंगःशुभाशुभकर्मकारिभिरिंद्रियैःसंगःकारणमि
त्यर्थः॥२२॥

तदनेनप्रकारेणप्रकृत्याविवेकात्पुरुषस्यसंसारः।नतुस्वरूपतइत्याशयेनतस्यस्वरूपमाह॥उपद्रष्टेति।अस्मि
न्प्रकृतिकार्येदेहेवर्त्तमानोपिपुरुषःपरभिन्नएव।नतुतद्गुणैर्युज्यतइत्यर्थः।तदेवाहहेतवः।तस्यउपद्रष्टापृथग्
भूतएवसमीपेस्थितत्वाद्द्रष्टासाक्षीत्यर्थः।तथाऽनुमन्ताऽनुमोदितेवसन्निधिमात्रेणानुग्राहकः।साक्षीचेता
केवलोनिर्गुणश्चेत्यादिः।श्रुतेः।तथाऐश्वर्येणरूपेणभर्त्ताविधारकइतिचोक्तः।भोक्ताकंपालकइतिच

उपद्रष्टाऽनुमंताचभर्त्ताभोक्तामहेश्वरः।परमात्मेतिचाप्युक्तोदेहेस्मिन्पुरुषःपरः॥२३॥यएवंवेत्तिपु
रुषंप्रकृतिंचगुणैःसह।सर्वथावर्त्तमानोपिनसभूयोभिजायते॥२४॥

महांश्चासावीश्वरश्चसब्रह्मादीना
मधिपतिरितिचपरमात्माऽन्तर्यामीतिचोक्तः।तथाचश्रुतिः।एषभूताधिपतिरेषलोकेश्वरएषलोकपाल
इत्यादि॥२३॥एवंपुरुषप्रकृतिविवेकज्ञानिनंस्तौति।यएवमिति।एवमुपद्रष्टादिरूपेणपुरुषंयोवेत्तिप्रकृतिंच
गुणैःसुखदुःखादिपरिणामैःसहितांयोवेत्तिसपुरुषोसर्वथाविधिमतिलंघ्यमानोपिपुनर्नाभिजायतेमुच्य १२६
तएवेत्यर्थः॥२४॥

एवंभूतविविक्तात्मज्ञानेसाधनविकल्पानाह॥ध्यानेनेति॥ध्यानेनात्माकारप्रत्ययाहृ
त्याऽऽत्मनिदेहेऽऽत्मनामनसाएवनमात्मानंकेचित्पश्यंति॥अन्येतुसांख्येनप्रकृतिपुरुषवि
वेकज्ञानाऽऽलोचनेनयोगेनाष्टांगेनापरे॥अपरेकर्मयोगेनपश्यंतीतिसर्वत्रानुषंगः॥एतेषांचध्याना
दीनांयथायोग्यंक्रमसमुच्चयेसत्यपितन्निष्ठाभेदाभिप्रायेणाविकल्पोक्तिः॥२५॥अतिमं

ध्यानेनात्मनिपश्यंतिकेचिदात्मानमात्मना॥अन्येसांख्येनयोगेनकर्मयोगेनचापरे॥२५॥
अन्येत्वेवमजानंतःश्रुत्वाऽन्येभ्यउपासते॥तेपिचातितरंत्येवमृत्युंश्रुतिपरायणाः॥२६॥

दाधिकारिणांनिस्तारोपायमाह॥अन्यइति॥अन्येतुसांख्ययोगादिमार्गेणैवंभूतमुपद्रष्टत्वा
दिलक्षणमात्मानंसाक्षात्कर्तुमजानंतोऽन्येभ्यआचार्येभ्यःउपदेशेनश्रुत्वाउपासतेध्यायंति॥तेचा
श्रद्धयाउपदेशमात्रपरायणाःसंतोमृत्युंसंसारंशनैरतितरंत्येव॥२६॥

गीता०स० तत्र कर्म्मयोगस्य तृतीयचतुर्थपंचमेषु प्रपंचितत्वात् ॥ अष्टांगयोगस्य षष्ठाष्टमप्रपंचितत्वात् ॥
१२७ ध्यानादेश्च सांख्यविविक्तात्मविषयत्वात्तं स्वयमेव प्रपंचयन्नाह ॥ यावदित्यादि ॥ यावत्समाप्तिः
यावत्किंचिद्वस्तुमात्रं सत्त्वमुत्पद्यते ॥ तत्सर्वं क्षेत्रक्षेत्रज्ञयोर्योगात् ॥ अविवेककृतात्तादात्म्याध्या

यावत्संजायते किंचित्सत्त्वं स्थावरजंगमं ॥ क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ ॥२७॥
समं सर्वेषु भूतेषु तिष्ठंतं परमेश्वरं ॥ विनश्यत्स्वविनश्यंतं यः पश्यति स पश्यति ॥२८॥

साद्भवतीति जानीहि ॥२७॥ अविवेककृतं संसारोद्भवमुक्त्वा तन्निवृत्तये विविक्तात्मविषयं सम्य
ग्दर्शनमाह ॥ सममिति ॥ स्थावरजंगमात्मकेषु भूतेषु निर्विशेषं सद्रूपेण समं यथा भवति
एवं तिष्ठंतं परमात्मानं यः पश्यति ॥ अतएव तेषु विनश्यत्स्वपि ॥ अविनश्यंतं यः पश्यति स
एव सम्यक् पश्यति नान्यः ॥२८॥ ॥ ॥ १२७

कुत इत्यत आह ॥ सममिति ॥ सर्वत्र भूतमात्रे सम्यगप्रच्युतस्वरूपेणावस्थितं परमात्मानं पश्य
न्हि यस्मादात्मनात्मानं न हिनस्ति ॥ अविद्यया सच्चिदानंदरूपमात्मानं तिरस्कृत्य
विनाशयति ॥ ततः परां गतिं मोक्षं प्राप्नोति ॥ यस्त्वेवं न पश्यति स हि देहात्मदर्शनात्तद्देहेन सहा
त्मानं हिनस्ति ॥ तथा च श्रुतिः ॥ असूर्या नाम ते लोका अंधेन तमसावृताः । तांस्ते प्रेत्याभिग

समं पश्यन्हि सर्वत्र समवस्थितमीश्वरं ॥ न हिनस्त्यात्मनात्मानं ततो याति परां ग
तिं ॥२९॥

छन्ति ये के चात्महनो जना इति ॥२९॥ ननु शुभाशुभकर्तृत्वेन वैषम्ये दृश्य
माने कथमात्मनः समत्वमित्याशंक्याह ॥ प्रकृत्यैवेति ॥ प्रकृत्यैव देहेंद्रियाकारेण परिण
तया सर्वशः ॥ सर्वैः प्रकारैः क्रियमाणानि कर्म्माणि यः पश्यति ॥ तथात्मानं चाकर्ता
रं देहाभिमानेनैवात्मनः कर्तृत्वं न स्वत इत्येवं यः ॥ पश्यति स एव सम्यक् पश्यति नान्य

गीता०स० इत्यर्थः ॥ ३० ॥ इदानीं तु भूतानां प्रकृतौ वा यन्मात्रत्वेनाभेदाद्भूतकृतमप्यात्मनो भेदमपश्यन् ब्र
१२८ ह्मत्वमुपैतीत्याह ॥ यदेति ॥ यदा भूतानां स्थावरजंगमानां पृथग्भावं भेदं पृथक्त्वं एकस्थं एक
स्यामेवेश्वरशक्तिरूपायां प्रकृतौ स्थितं प्रलयेऽनुपश्यति आलोचयति ॥ तत एव तस्या एव प्र

प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः ॥ यः पश्यति तथात्मानमकर्तारं स पश्यति ॥ ३०
यदा भूतपृथग्भावमेकस्थमनुपश्यति ॥ तत एव च विस्तारं ब्रह्म संपद्यते तदा ॥ ३१ ॥

कृतेः सकाशात् भूतानां विस्तारं सृष्टिसमयेऽनुपश्यति ॥ तदा प्रकृतिस्तावन्मात्रत्वेन भूता
नामप्यभेदं पश्यन् परिपूर्णं ब्रह्म संपद्यते ॥ ब्रह्मैव भवतीत्यर्थः ॥ तथापि परमेश्वरस्य
संसारावस्थायां देहसंबंधनिमित्तैः ॥ कर्मभिस्तत्फलैश्च सुखदुःखादिभिश्च वैषम्यं दुःपर १२८
हमिति ॥ ३१ ॥

कुतः समदर्शनं तत्राह ॥ अनादित्वादिति ॥ यदुत्पत्तिमत् देवहि व्येति विनाशमेति ॥ यच्च गुणव
द्वस्तु तस्य गुणनाशे व्ययो भवति ॥ अयं तु परमात्मा अनादिर्निर्गुणश्चातोऽव्ययः ॥ अविकारीत्यर्थः
तस्मात् शरीरस्थोऽपि किंचिन्न करोति न च कर्मफलैर्लिप्यते ॥ ३२ ॥ तत्र दृष्टांतमाह ॥ यथेति ॥
यथा सर्वत्र पंकादिष्वपि स्थितमाकाशं सौक्ष्म्यादसंगत्वात् पंकादिभिर्नोपलिप्यते ॥ तथा सर्व

अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः ॥ शरीरस्थोऽपि कौंतेय न करोति न लिप्यते ॥ ३२ ॥
यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते ॥ सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ॥ ३३ ॥

त्रोत्तममध्यमेषु वा देहेष्ववस्थितोऽप्यात्मा नोपलिप्यते दैहिकैर्गुणदोषैर्न युज्यत इत्यर्थः ॥ ३३ ॥ असं
गत्वाल्लेपो नास्तीत्याकाशदृष्टांतेनोक्तं प्रकाशकत्वाच्च प्रकाश्यधर्मैर्न युज्यत इति रविदृष्टां
तेनाह ॥ यथेति ॥ यथा प्रकाशयति अवभासयति एकः कृत्स्नं लोकमिमं रविः ॥ तथा देहं परा

गीता०स० मात्मा प्रकाशयति ॥ स्पष्टोर्थः ॥३४॥ अध्यायार्थमुपसंहरति ॥ क्षेत्रक्षेत्रज्ञयोरिति ॥ एवमुक्तप्र-
१२८ कारेण क्षेत्रक्षेत्रज्ञयोरंतरं विविक्तज्ञानलक्षणेन चक्षुषा ये विदुः ॥ तथा च भूतानां प्रकृतिस्तस्याः
सकाशात् मोक्षो ज्ञेयाय ध्यानादिकं ये विदुः ते परं यांति ॥३५॥ विविक्तौ येन तत्वेन मिथः प्रकृतिपूरुषौ

यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः ॥ क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥३४॥
क्षेत्रक्षेत्रज्ञयोरेवमंतरं ज्ञानचक्षुषा ॥ भूतप्रकृतिमोक्षं च ये विदुर्यांति ते परं ॥३५॥ इति श्रीभगवद्-
गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे नाम त्रयोदशोऽध्यायः ॥१३॥

रम तं वंदे परमानंदं नंदनंदनमीश्वरं ॥१॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे टीकायां सुबोधिन्यां नाम त्रयोदशोऽध्यायः ॥१३॥ पुंप्रकृत्योः स्वतं-
त्रत्वं वारयन् गुणसंगतः ॥ प्राह संसारवैचित्र्यं विस्तरेण चतुर्दशे ॥१॥ १२८

यावत्संजायते किंचित्सत्वं स्थावरजंगमं ॥ क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभेत्युक्तं ॥ स च क्षेत्रक्षेत्र-
ज्ञयोः संयोगो निरीश्वरसांख्यानामिव न स्वातंत्र्येण ॥ किंत्वीश्वरेच्छयैवेति ॥ कथं न पूर्वकं कारणं
गुणसंयोगोस्य सदसद्योनिजन्मसु इत्यनेनोक्तं सत्वादिगुणकृतं संसारवैचित्र्यं प्रपंचयिष्यन् ॥
एवंभूतं वक्ष्यमाणमर्थं स्तौति ॥ श्रीभगवानुवाच ॥ परं भूय इति ॥ द्वाभ्यां ॥ परमात्मार्थं

श्रीभगवानुवाच ॥ परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमं ॥ यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो
गताः ॥१॥ इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ॥ सर्गेपि नोपजायंते प्रलये न व्यथंति च ॥२॥

निष्ठं ज्ञायते ॥ अनेनेति ज्ञानमुपदेशं भूयोपि तुभ्यं प्रकर्षेण वक्ष्यामि ॥ कथंभूतं ज्ञानानां तपःकर्मा-
दिविषयाणां मध्ये उत्तमं मोक्षहेतुत्वात्तदेवाह ॥ यज्ज्ञात्वा प्राप्य मुनयो मननशीलाः सर्वे इतो देहबं-
धनात्परां सिद्धिं प्राप्ताः ॥१॥ किंच ॥ इदमिति ॥ इदं च वक्ष्यमाणं ज्ञानमुपाश्रित्य इदं ज्ञानं साधनमनु-

गीता०स०
१३०

श्रित्य मम साधर्म्यं मद्रूपत्वं प्राप्ताः संतः सर्गेपि ब्रह्मादिषूत्पद्यमाना नोत्पद्यंते ॥ तथा प्रलये
पि न व्यथंति प्रलयदुःखानि नानुभवंति ॥ पुनर्नावर्तंत इत्यर्थः ॥ २ ॥ तदेवं प्रशंसया श्रोतारमा
भिमुखीकृत्य परमेश्वराधीनयोः प्रकृतिपुरुषयोः सर्वभूतोत्पत्तिं प्रति हेतुत्वं न स्वतंत्रयोरि
तीमं विवक्षितमर्थं कथयति ॥ ममेति ॥ देशतः कालतश्चानवच्छिन्नत्वान्महत् ॥ बृंहणत्वाच्च

मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहं ॥ संभवः सर्वभूतानां ततो भवति भारत ॥ ३ ॥

स्वकार्याणां वृद्धित्वे हेतुत्वात् ब्रह्म प्रकृतिरित्यर्थः ॥ तन्महद्ब्रह्म मम परमेश्वरस्य योनिः ग
र्भाधानस्थानं तस्मिन्नहं गर्भं जगद्विस्तारहेतुं चिदाभासं दधामि निक्षिपामि प्रलये मयि
लीनं संतमविद्याकामकर्मानुशयवंतं क्षेत्रज्ञं सृष्टिसमये भोगक्षेत्रेण संयोजयामीत्यर्थः
ततो गर्भाधानात्सर्वभूतानां ब्रह्मादीनां संभव उत्पत्तिर्भवति ॥ ३ ॥ १३०

न केवलं सृष्ट्युपक्रम एव मदधिष्ठिताभ्यां प्रकृतिपुरुषाभ्यामयं भूतोत्पत्तिप्रकारः ॥ अपि तु सर्वदैवेत्या
ह सर्वयोनिष्विति ॥ मनुष्यादियोनिषु या मूर्तयः स्थावरजंगमात्मिका उत्पद्यंते ॥ तासां मूर्तीनां महत् ब्रह्म
प्रकृतिर्योनिर्मातृस्थानीया ॥ अहं च बीजप्रदः गर्भाधानादिकर्ता पिता ॥ ४ ॥ तदेवं परमेश्वराधीनाभ्यां
प्रकृतिपुरुषाभ्यां सर्वभूतोत्पत्तिं निरूप्येदानीं प्रकृतिसंयोगेन पुरुषस्य संसारं प्रपंचयति ॥ सत्वं रजस्तम इति

सर्वयोनिषु कौंतेय मूर्तयः संभवंति याः ॥ तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता ॥ ४ ॥ सत्वं
रजस्तम इति गुणाः प्रकृतिसंभवाः ॥ निबध्नंति महाबाहो देहे देहिनमव्ययं ॥ ५ ॥

एवं संज्ञकास्त्रयो गुणाः ॥ प्रकृतिसंभवाः प्रकृतितः संभव उत्पत्तिर्येषां ते ॥ तयोः गुणसाम्यं प्र
कृतिस्तस्याः सकाशात्पृथक्त्वेनाभिव्यक्ताः संतः प्रकृतिकार्ये देहे तादात्म्येनावस्थितं देहिनं चिदं
शं वस्तुतोऽव्ययं निर्विकारमेव संतं निबध्नंति स्वकार्यैः सुखदुःखमोहादिभिः ॥ संयोजयंतीत्यर्थः ॥ ५

तत्र सत्त्वस्य लक्षणं बंधकत्वप्रकारं चाह ॥ तत्रेति ॥ तत्र तेषां गुणानां मध्ये सत्त्वस्य एवं तावल्लक्षणमुच्य
ते निर्मलत्वात् स्वच्छत्वात् स्फटिकमणिरिव प्रकाशकं भास्वरं अनामयं च निरुपद्रवं शांतमित्यर्थः ॥ अतः
शांतत्वात् स्वकार्येण सुखेन यः संगस्तेन बध्नाति ॥ प्रकाशकत्वात् स्वकार्येण ज्ञानेन यः ॥ संगस्तेन च बध्नाति

तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयं ॥ सुखसंगेन बध्नाति ज्ञानयोगेन चानघ ॥ ६
रजो रागात्मकं विद्धि तृष्णासंगसमुद्भवं ॥ तन्निबध्नाति कौंतेय कर्मसंगेन देहिनम् ॥ ७

हे अनघ ॥ निःपाप ॥ अहं सुखी ज्ञानी चेति ॥ मनोधर्मस्तदभिमानिनि क्षेत्रज्ञे संयोजयतीत्यर्थः ॥ ६
रजसो लक्षणं बंधकत्वं चाह ॥ रजो रागेति ॥ रागः संतकं गुणं रागात्मकं ॥ अनुरंजनरूपं विद्धि ॥ अत तत्
तृष्णासंगसमुद्भवं ॥ तृष्णा प्राप्तार्थेऽभिलाषः संगोऽवाप्तेऽर्थे प्रीतिविशेषेणासक्तिः ॥ तयोस्तृष्णासंगयोः
समुद्भवो यस्मात् तत् रजो देहिनं दृष्टादृष्टार्थेषु कर्मसु संगेनासक्त्या नितरां बध्नाति ॥ तृष्णासंगाभ्यां हि कर्मस्वासक्ति
र्भवति ॥ ७ ॥ १३१

तमसो लक्षणं बंधकत्वं चाह ॥ तमस्त्विति ॥ तमस्त्वज्ञानांशात् आवरणशक्तिप्रधानात् वा ॥ प्रकृत्यंशादु
द्भूतं विद्धीत्यर्थः ॥ अतः सर्वेषां देहिनां मोहनं भ्रांतिजनकं ॥ अत एव प्रमादेनालस्येन निद्रया च तत्तमो देहि
नं निबध्नाति ॥ तत्र प्रमादोऽनवधानत्वं आलस्यमनुद्यमः ॥ निद्रा चित्तस्यावसादः ॥ ८ ॥ सत्त्वादीनामेवं स्वस्वकार्यकार

तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनां ॥ प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ॥ ८ ॥ सत्त्वं सुखे संजयति
रजः कर्मणि भारत ॥ ज्ञानमावृत्य तु तमः प्रमादे संजयत्युत ॥ ९ ॥ रजस्तमश्चाभिभूय सत्त्वं भवति भारत ॥ रजः
सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा ॥ १० ॥

णे सामर्थ्यातिशयमाह ॥ सत्त्वमिति ॥ सत्त्वं सुखे संजयति संश्लेष
यति दुःखशोकादिकारणे सत्यपि सुखाभिमुखमेव देहिनं करोतीत्यर्थः ॥ एवं सुखादिकारणे सत्यपि रजः
कर्मण्येव संजयति ॥ तमस्तु महत्संगेनोत्पद्यमानमपि ज्ञानमावृत्य आच्छाद्य प्रमादे संजयति ॥ महद्भिरुपदि
श्यमानस्यार्थस्यानवधाने योजयति ॥ उत अपि आलस्यादावपि योजयतीत्यर्थः ॥ ९ ॥ तत्र हेतुमाह ॥ रजइति

रजस्तमश्चेति । गुणद्वयमभिभूय तिरस्कृत्य सत्त्वं भवति ॥ ततः स्वकार्ये सुखज्ञानादौ संजयति । ततः स्वका
र्ये तृष्णाकर्मादौ संजयति । एवं तमोऽपि सत्त्वं रजश्चाभिभूयोद्भवति । ततः स्वकार्ये प्रमादालस्यादौ संजयती
त्यर्थः ॥ १० इदानीं सत्त्वादीनां वृद्धानां लिंगान्याह ॥ त्रिभिः सर्वद्वारेष्विति । अस्मिन्नात्मनो भोगायतने देहे सर्वे
ष्वपि द्वारेषु श्रोत्रादिषु यदा शब्दादिज्ञानात्मकः प्रकाश उत्पद्यते तदा अनेन प्रकाशकलिंगेन सत्त्वं विवृद्धं

सर्वद्वारेषु देहेऽस्मिन्प्रकाश उपजायते । ज्ञानं यदा तदा विद्याद्विवृद्धं सत्त्वमित्युत । ११ । लोभः प्रवृत्तिरारंभः
कर्मणामशमः स्पृहा । रजस्येतानि जायंते विवृद्धे भरतर्षभ ॥ १२ ॥ जानीयात् सुखादिलिंगेनापि जानीया

दित्युक्तं ॥ ११ किंच लोभ इति लोभो धनागमे बहुधा जायमानेऽपि पुनः पुनर्वर्द्धमानोऽभिलाषः प्रवृत्तिर्नित्यं कु
र्वद्रूपता कर्मणामारंभः गृहादिषु कर्मोद्यतः । इदं कृत्वेदं करिष्यामीत्यादिसंकल्पविकल्पानुपरमः अश
मः स्पृहा उच्चावचेषु दृष्टमात्रेषु वस्तुष्विच्छा ततो रजसि प्रवृद्धे एतानि लिंगानि जायंते एतैर्लिंगैः रजोगुण
स्य वृद्धिं विद्यादित्यर्थः ॥ १२ ॥ १३२

किंच । अप्रकाश इति । अप्रकाशो विवेकभ्रंशः । अप्रवृत्तिरनुद्यमः । प्रमादः कर्तव्यार्थानुसंधानराहि
त्यंराहित्यमोहो मिथ्याभिनिवेशः । तमसि प्रवृद्धे एतानि लिंगानि जायंते । एतैस्तमसो वृद्धिं जानीयात् ॥ १३ ॥
मरणे एवमप्रवृद्धानां सत्त्वादीनां फलविशेषमाह । यदेति । द्वाभ्यां । सत्त्वे प्रवृद्धे सति यदा जीवो मृत्युं प्रा

अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च ॥ तमस्येतानि जायंते विवृद्धे कुरुनंदन ॥ १३ ॥
यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत् ॥ तदोत्तमविदां लोकान्निर्मलान्प्रतिपद्यते ॥ १४ ॥
रजसि प्रलयं गत्वा कर्मसंगिषु जायते ॥ तथा प्रलीनस्तमसि मूढयोनिषु जायते ॥ १५ ॥

प्नोति । तदा उत्तमान् हिरण्यगर्भादीन्विदंति ॥ उपासत इत्युत्तमविदः ॥ तेषां ये अमलाः प्रकाशमया
लोकाः सुखोपभोगस्थानविशेषास्तान्प्रतिपद्यते प्राप्नोति ॥ १४ ॥ किंच ॥ रजसीति । रजसि प्रवृद्धे स
ति मृत्युं प्राप्य कर्मासक्तेषु मनुष्येषु जायते । तथा तमसि प्रवृद्धे सति प्रलीनो मृतो मूढयोनिषु पश्वादिषु जायते १५ ॥

इदानीं सत्वादीनां स्वानुरूपकर्मद्वारेण विचित्रफलत्वमाह ॥ कर्मण इति ॥ सुकृतस्य सात्विकस्य
कर्मणः सात्विकं सत्वप्रधानं निर्मलं प्रकाशबहुलं फलमाहुः ॥ कपिलादयः रजस इति ॥ राजसस्य क
र्मण इत्यर्थः ॥ फलमाहुः तमस इति ॥ तामसस्य कर्मण इत्यर्थः ॥ तस्याज्ञानं मूढत्वं फलमाहुः ॥ सा
त्विकादिकर्मलक्षणं च नियतं संगरहितमित्यादिनाष्टादशे वक्ष्यति ॥ १६ ॥ तत्र हेतुमाह ॥ सत्वा

कर्मणः सुकृतस्याहुः सात्विकं निर्मलं फलं ॥ रजसस्तु फलं दुःखमज्ञानं तमसः फलं ॥ १६ ॥
सत्वात्संजायते ज्ञानं रजसो लोभ एव च ॥ प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥ १७ ॥

दिति ॥ सत्वात् ज्ञानं संजायते ॥ अतः सात्विकस्य कर्मणः प्रकाशबहुलं सुखं फलं भवति ॥
राजसस्य लोभो जायते तस्य च दुःखहेतुत्वात्तत्पूर्वकस्य कर्मणो दुःखं फलं भवति ॥ तमसस्तु
प्रमादमोहाज्ञानानि भवन्ति ॥ ततस्तामसस्य कर्मणो ज्ञानबाधकं फलं भवतीति युक्तमेवेत्यर्थः ॥ १७ ॥ १३३

इदानीं सत्वादिवृत्तिशीलानां फलमाह ॥ ऊर्ध्वमिति ॥ सत्वस्थाः सत्ववृत्तिप्रधाना ऊर्ध्वं गच्छन्ति ॥ सत्वोत्कर्ष
तारतम्यादुत्तरोत्तरशतगुणानंदान् मनुष्यगंधर्वपितृदेवलोकान् सत्यलोकपर्यंतान् प्राप्नुवंतीत्यर्थः
राजसास्तु तृष्णाद्याकुला मध्ये तिष्ठन्ति ॥ मनुष्यलोक एवोत्पद्यंते ॥ जघन्यो निकृष्टस्तमोगुणः ॥ त
स्य वृत्तं प्रमादमोहादि ॥ तत्र स्थिता अधो गच्छन्ति तमोवृत्तितारतम्यात्तामिस्रादिषु निरयेषु पच्यंते ॥ १८ ॥

ऊर्ध्वं गच्छंति सत्वस्था मध्ये तिष्ठंति राजसाः ॥ जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ॥ १८ ॥
नान्यं गुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति ॥ गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति ॥ १९ ॥

तदेवं प्रकृतिगुणसंगकृतं संसारप्रपंचमुक्त्वेदानीं गुणातीतं मोक्षं दर्शयति ॥ नान्यमिति ॥ यदा तु द्रष्टा वि
वेकी भूत्वा बुद्ध्याद्याकारपरिणतेभ्यो गुणेभ्योऽन्यं कर्तारं नानुपश्यति ॥ अपि तु गुणा एव कर्माणि कुर्वन्तीति
पश्यति ॥ गुणेभ्यश्च परं व्यतिरिक्तं तत्साक्षिणमेवमात्मानं वेत्ति ॥ स तु मद्भावं ब्रह्मत्वमधिगच्छति प्राप्नोति ॥ १९ ॥

ततश्च गुणकृतसर्वानर्थनिवृत्त्या कृतार्थो भवतीत्याह ॥ गुणानिति ॥ देहाकारः समुद्भवः ॥ परि-
णामो येषां ते देहसमुद्भवास्तानेतांस्त्रीनपि गुणानतीत्यातिक्रम्य तत्कृतैर्जन्मादिभिर्मुक्तः
सन्नमृतं ब्रह्मानंदं प्राप्नोति ॥२०॥ गुणानेतानतीत्यामृतमश्नुते ॥ इत्येतच्छ्रुत्वा गुणातीतस्य लक्ष-

गुणानेतानतीत्य त्रीन्देही देहसमुद्भवान् ॥ जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते ॥२०॥ अ-
र्जुन उवाच ॥ कैर्लिंगैस्त्रीन्गुणानेतानतीतो भवति प्रभो ॥ किमाचारः कथं चैतांस्त्रीन्गु-
णानतिवर्तते ॥२१॥

णमाचारं च गुणानां जयोपायं च सम्यक् बुभुत्सुः ॥ अर्जुन उवाच
कैर्लिंगैरिति ॥ हे प्रभो कैः लिंगैः कीदृशैर्लक्षणैर्युक्तस्त्रीन्गुणातीतो देही भवतीति ॥ लक्ष-
णप्रश्नः ॥ कश्चाचारोऽस्येति किमाचारः कथं वर्तत इत्यर्थः ॥ कथं केनोपायेनैतांस्त्रीन-
पि गुणानतीत्य वर्तते तच्च कथयेति ॥२१॥ ॥

स्थितप्रज्ञस्य का भाषेत्यादिना ॥ द्वितीयाध्याये दृष्टमपि दत्तोत्तरमपि पुनर्विशेषबुभुत्सया पृच्छतीति
ज्ञात्वा प्रकारान्तरेण तस्य लक्षणादिकं ॥ श्रीभगवानुवाच ॥ प्रकाशं चेति ॥ प्रकाशं च सर्वद्वारेषु देहे-
ऽस्मिन्निति पूर्वोक्तं सत्त्वकार्यं ॥ प्रकाशं चेत्यादिषड्भिस्तत्र केन लक्षणमाह ॥ प्रकाशं प्रवृत्तिं च रजःका-
र्यं ॥ उपलक्षणमेतत्सत्त्वादीनां सर्वाण्यपि कार्याणि यथायथं प्रवृत्तानि स्वतः प्राप्तानि संति दुःखबु-

श्रीभगवानुवाच ॥ प्रकाशं च प्रवृत्तिं च मोहमेव च पांडव ॥ न द्वेष्टि संप्रवृत्तानि न निवृत्तानि कांक्ष-
ति ॥२२॥ उदासीनवदासीनो गुणैर्यो न विचाल्यते ॥ गुणा वर्तंत इत्येव योऽवतिष्ठति नेंगते ॥२३॥

द्ध्या यो न द्वेष्टि ॥ निवृत्तानि च संति सुखबुद्ध्या न कांक्षति गुणातीतः स उच्यते ॥ इति चतुर्थेनान्वयः
२२ ॥ तदेवं स्वसंवेद्यं तस्य लक्षणमुक्त्वा परसंवेद्यं तस्य लक्षणं वक्तुं किमाचार इति ॥ द्वितीयप्र-
श्नस्योत्तरमाह ॥ उदासीनवदिति त्रिभिः ॥ उदासीनवत्साक्षितया आसीनः स्थितः सन्गु-

गौर्गुणकार्यैः सुखदुःखादिभिर्यो न विचाल्यते स्वरूपान्न प्रचाल्यते ॥ अपीत्यं गुणा एव स्वका-
र्येषु वर्त्तंते एतैर्मम संबंध एव नास्तीति विवेकेन ज्ञानेन यस्तूष्णीमवति परस्मैपदमार्षं नेंगते न चा-
लति ॥ २३ ॥ अपि च समेति ॥ समे सुखदुःखे यस्य यतः स्वस्थः स्वरूपव्यवस्थितः अतएव समालो-

समदुःखसुखः स्वस्थः समालोष्टाश्मकांचनः ॥ तुल्यप्रियाप्रियो धीरस्तुल्यनिंदात्मसंस्तुतिः ॥
२४ ॥ मानापमानयोस्तुल्यो मित्रारिपक्षयोः ॥ सर्वारंभपरित्यागी गुणातीतः स उच्यते ॥ २५ ॥

ष्टाश्मकांचनानि यस्य ॥ तुल्ये प्रियाप्रिये सुखदुःखहेतुभूते यस्य स धीरो धीमान् तुल्या निंदा चा-
त्मसंस्तुतिश्च यस्य ॥ २४ ॥ अपि च ॥ मानापमानयोरिति ॥ माने अपमाने च तुल्यः ॥ मित्रा-
रिपक्षे च तुल्यः ॥ सर्वान् दृष्टादृष्टार्थानारंभानुद्यमान्परित्यक्तुं शीलं यस्य सः ॥ एवंभूताचा- १३५
रयुक्तो गुणातीत उच्यते ॥ २५ ॥

कथं चैतान्गुणानतिवर्त्तत इत्यस्य प्रश्नोत्तरमाह ॥ मां चेति ॥ चशब्दोऽवधारणार्थः ॥ मामेव
परमेश्वरं श्रीनारायणमव्यभिचारेण एकांतभक्तियोगेन यः सेवते ॥ स एतान्गुणा-
न्समतीत्य सम्यगतिक्रम्य ब्रह्मभूयाय ब्रह्मभावाय कल्पते योग्यो भवति ॥ २६ ॥ तत्र हे-
तुमाह ॥ ब्रह्मणो हीति ॥ हि यस्मात् ब्रह्मणोऽहं प्रतिष्ठा प्रतिमा घनीभूतं ब्रह्मैवाहं यथा घनी-

मां च योऽव्यभिचारेण भक्तियोगेन सेवते ॥ स गुणान्समतीत्यैतान्
ब्रह्मभूयाय कल्पते ॥ २६ ॥

भूतः प्रकाश एव सूर्यमंडलं तद्वदित्यर्थः ॥ तथाव्ययस्य नित्यस्यामृतस्य मोक्षस्य
मोक्षस्य च नित्यसुखत्वात् ॥ तथा तत्साधनस्य शाश्वतस्य च धर्मस्य शुद्धसत्त्वात्मकत्वा-
त् ॥ तथा एकांतस्याखंडितस्य सुखस्य च प्रतिष्ठाहं परमानंदैकरूपत्वात् ॥ अतो मत्से-

गीता० स० विनीमज्ञावस्यावश्यंभावित्वात् ॥ सुखमेवोक्तं ॥ ब्रह्मभूयाय कल्पत इति ॥ २७ ॥ कृष्णा
१३६ द्धीनगुणासंगप्रसंजितमर्वांबुधिं ॥ सुखं तरंति मद्भक्ता इत्यभाणि चतुर्दशे ॥ १ ॥ ॥ इ
श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे टीकायां सु-

ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च ॥ शाश्वतस्य च धर्मस्य सुखस्यैकां-
तिकस्य च ॥ २७ ॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्री-
कृष्णार्जुनसंवादे गुणत्रयविभागो नाम चतुर्दशोऽध्यायः ॥ १४ ॥

बोधिन्यां श्रीधरस्वामिविरचितायां नाम चतुर्दशोऽध्यायः ॥ १४ ॥ वैराग्येण विना ज्ञानं
न च भक्तिरतः स्फुटं ॥ वैराग्योपस्कृतं ज्ञानमीशः पंचदशेऽदिशत् ॥ १ ॥ १३६

पूर्वाध्यायांते मां च योऽव्यभिचारेण भक्तियोगेन सेवत इत्यादिना ॥ परमेश्वरमेकांतभक्त्या
भजतस्तत्प्रसादलब्धज्ञानेन ब्रह्मभावो भवतीत्युक्तं ॥ न चैकांतभक्तिर्ज्ञानं चाविरक्तस्य सं-
ग भवतीति ॥ वैराग्यपूर्वकं ज्ञानमुपदेष्टुकामः ॥ प्रथमं तावत्सार्धश्लोकाभ्यां संसारस्वरूपं वृक्षा-
रूपमलंकारेण वर्णयन् ॥ श्रीभगवानुवाच ॥ ऊर्ध्वमूलमिति ॥ ऊर्ध्वमुत्तमः क्षराक्षराभ्यां

श्रीभगवानुवाच ॥ ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययं ॥ १

उत्कृष्टः पुरुषोत्तमो मूलं यस्य तं ॥ अधः इति ॥ ततोऽर्वाचीनाः कार्योपाधयो हिरण्यग-
र्भादयो गृह्यंते ॥ ते शाखा इव शाखा यस्य तं विनश्वरत्वेन श्वः प्रभातपर्यंतमपि स्थास्य-
तीति विश्वासानर्हत्वादश्वत्थं प्राहुः प्रवाहरूपेणाविच्छेदादव्ययं प्राहुः ॥ ऊर्ध्वमूलोर्वाक्

शाखवराकोऽश्वत्थः ॥ सनातन इत्याद्याः श्रुतयः ॥ छंदांसि वेदा यस्य पर्णानि धर्माधर्मप्र
तिपादनद्वारेणच्छायास्थानीयैः कर्मफलैः ॥ संसारवृक्षस्य सर्वजीवाश्रयणीयत्वा
पादनात्पर्णस्थानीया वेदा यस्य ॥ एवंभूतमश्वत्थं वेद स एव वेदार्थवित् ॥ संसार

छंदांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥१॥

वृक्षस्य मूलमीश्वरः श्रीनारायणः ॥ ब्रह्मादयस्तदंशाः शाखास्थानीयाः ॥ स च संसार
वृक्षो विनश्वरः प्रवाहरूपेणनित्यश्च ॥ वेदोक्तैः कर्मभिः सेव्यतामापादितश्चेत्येतावा
निह वेदार्थः ॥ अत एव विद्वान्वेदविदिति सूच्यते ॥१॥

अपि च ॥ अध इति ॥ हिरण्यगर्भादयः कार्योपाधयो जीवाः शाखास्थानीयास्तेनोक्ताः ॥ तेषु च दुःकृ
तिनस्तेऽधः पश्वादियोनिषु प्रसृता विस्ताराङ्गताः सुकृतिनकर्ध्वं देवादियोनिषु सृताः ॥ तस्य संसा
रवृक्षस्य शाखाः किंच ॥ गुणैः सत्वादिवृत्तिभिः ॥ जलसेचनैरिव यथायथं प्रवृद्धिं प्राप्ताः किंच ॥ वि
षयारूपादयः प्रवालाः पल्लवस्थानीया सांताः शाखाग्रस्थानीयाभिरिंद्रियवृत्तिभिः ॥ संयुक्त

अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः ॥ अधश्च मूलान्यनुसंततानि कर्मा
नुबंधीनि मनुष्यलोके ॥२॥ न रूपमस्येह तथोपलभ्यते नांतो न चादिर्न च संप्रतिष्ठा

तात् ॥ किंच ॥ अधश्च च ब्राह्मादूर्ध्वं तदनुबंधीनि कर्माणि मूलानि च विच्छन्नतु संततानि विस्तृतानि मुख्यं
मूलं ईश्वर एक एव ॥ इमानि त्ववांतरमूलानि तद्भोगवासनाजन्यानि तेषां कार्यमाह ॥ मनुष्य
लोकेषु कर्मानुबंधः अनंतरविषयो येषां तानि ॥ ऊर्ध्वं घि लोकेषु यद्भुक्तं ॥ तद्भोगवासनादिभिर्हि कर्म

गीता० स०
१३८

ध्वयेमनुष्यलोकंप्राप्तानांतेतदनुरूपेषुकर्मसुप्रवृत्तिर्भवति॥तस्मिन्नेवहिकर्माधिकारोनान्येषुलो
केष्वतोमनुष्यलोकइत्युक्तं॥२॥किंच॥नरूपमस्येति॥इहसंसारेनस्थितैःप्राणिभिःअस्यसं
सारवृक्षस्यतथोर्ध्वमूलत्वादिप्रकारेणरूपंनोपलभ्यते॥नचांतःअवसानंअपर्यंतत्वात्॥नचादिः
अनादित्वात्॥नचसंप्रतिष्ठाकथंतिष्ठतीतिनचोपलभ्यते॥यस्मादेवंभूतत्वादयंसंसारवृक्षोदुरु

नरूपमस्येहतथोपलभ्यतेनांतोनचादिर्नचसंप्रतिष्ठा॥अश्वत्थमेनंसुविरूढमूलमसंगशस्त्रे
णदृढेनछित्वा॥३॥

च्छेद्यः॥अनर्थकरश्चतस्मादेनंदृढेनवैराग्येणछित्वाततस्तज्ज्ञानेयतेतेत्याह॥अ
श्वत्थमेनमितिसार्धेन॥एनमश्वत्थंसुविरूढमूलं॥अत्यंतबद्धमूलंसंतं॥असंगःसंगराहि
त्यंअहंममतात्यागस्तेनशस्त्रेणदृढेनसम्यग्विचारवताछित्वापृथक्कृत्य॥३॥ १३८

ततस्तस्यमूलभूतंवैष्णवंपदंपरिमार्गितव्यं॥अन्वेष्टव्यंकीदृशंयस्मिन्गतास्तत्पदंव्याप्ताः
सन्तोभूयोननिवर्त्तंतेनावर्त्तंतइत्यर्थः॥अन्वेषणप्रकारमाह॥यतएषापुराणीचिरंतनीसं
सारप्रवृत्तिःप्रसृताविस्तृता॥तमेवचाद्यंपुरुषंप्रपद्येशरणंव्रजामीति॥४॥एवमेकांतभ
क्त्यान्वेष्टव्यमित्यर्थः॥तत्प्राप्तौसाधनान्तराणिदर्शयन्नाह॥निर्मानेति॥निर्गतोमानमो

ततःपदंतत्परिमार्गितव्यंयस्मिन्गतानिवर्त्तंतिभूयः॥तमेवचाद्यं
पुरुषंप्रपद्येयतःप्रवृत्तिःप्रसृतापुराणी॥४॥

हौअहंकारमिथ्याभिनिवेशौयेषांतेजिताःपुत्रादिसंगरूपादोषायैः॥अध्यात्मेआत्म
ज्ञानेनित्याःपरिनिष्ठिताः॥विशेषेणनिवृत्ताःकामायेभ्यस्तेसुखदुःखहेतुत्वात्॥सुखं
दुःखसंज्ञानिशीतोष्णादीनिद्वंद्वानितैर्विमुक्ताः॥अतएवामूढानिवृत्ताविद्याः॥संत

गीता०स० स्तदव्ययं पदं वैष्णवं गच्छंति ॥५॥ तदेव गंतव्यं पदं विशिनष्टि न तदिति । यत्पदं सूर्यादि-
१३८ यी न प्रकाशयन्ति तत्प्राप्य न निवर्तंते योगिनस्तद्धाम स्वरूपं परमं सूर्यादिप्रकाशावि-

निर्मानमोहा जितसंगदोषा अध्यात्मनित्या विनिवृत्तकामाः ॥ द्वंद्वै-
र्विमुक्ताः सुखदुःखसंज्ञैर्गच्छंत्यमूढाः पदमव्ययं तत् ॥५॥ न तद्भास-
यते सूर्यो न शशांको न पावकः ॥ यद्गत्वा न निवर्तंते तद्धाम परमं
मम ॥६॥

षयत्वेन जडत्वशीतोष्णादिदोषप्रसंगो निरस्तः ॥६॥ १३८

ननु च त्वदीयं धाम प्राप्ताः संतो यदि न निवर्तंते तर्हि संति संपद्य न विदुः । संति संपद्यामह इत्यादिश्रुतेः
सुषुप्तिसमये प्रलये च त्वत्प्राप्तिः सर्वेषामस्तीति को नाम संसारी स्यादित्याशंक्य संसारिणं दर्शयति । ममैवे-
ति पंचभिः ॥ ममैवांशो यो यमविद्यया जीवभूतः । सनातनः । सर्वदा संसारित्वेन प्रसिद्धः । असौ सु-
षुप्तिप्रलययोः प्रकृतौ लीनतया स्थितानि । मनःषष्ठं येषां तानींद्रियाणि पुनर्जीवलोके संसारभोगार्थमा-

ममैवांशो जीवलोके जीवभूतः सनातनः ॥ मनःषष्ठानींद्रियाणि प्रकृतिस्थानि कर्षति ॥७॥

कर्षति । एतच्च कर्मेंद्रियाणां प्राणस्य चोपलक्षणार्थं । अयं भावः । सत्यं सुषुप्तिप्रलययोरपि मदं-
शत्वात्सर्वस्यापि जीवमात्रमपि लयादस्त्येव मत्प्राप्तिः । तथाप्यविद्यावृतस्य सानुशयस्यास ।
प्रकृतिके मयि लयो न तु सिद्धो । यदुक्तं । अव्यक्ताद्व्यक्तयः सर्वाः प्रभवंतीत्यादिना । अतस्तस्य पुनः संसार-
य निर्गच्छत एव विलानप्रकृतौ स्थितानि स्वोपाधिभूतानि इंद्रियाण्याकर्षंति । विदुषां तु मत्स्वरूपप्राप्तेर्ना-
वृत्तिरिति ॥७॥

तान्याकृष्य किं करोतीत्यत्राह ॥ यत् यदा शरीरांतरं कर्मवशादवाप्नोति ॥ यतः शरीरादुत्क्राम-
ति ॥ ईश्वरो देहादीनां स्वामी तदा पूर्वस्माच्छरीरादेतानि गृहीत्वा तच्छरीरांतरं सम्यग्याति शरीरे
सति चेंद्रियग्रहणे दृष्टांतः ॥ आशयात्स्वस्थानात् कुसुमादेः सकाशात् गंधान् गंधवतः सूक्ष्मां-

शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ॥ गृहीत्वैतानि संयाति वायुर्गंधानिवाशयात् ॥
८ ॥ श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च ॥ अधिष्ठाय मनश्चायं विषयानुपसेव-
ते ॥ ९ ॥

शान् गृहीत्वा यथा वायुर्गच्छति तद्वत् ॥ ८ ॥ तान्येवेंद्रियाणि दर्शयन् यदर्थं गृही-
त्वा गच्छति तदाह ॥ श्रोत्रमिति ॥ श्रोत्रादीनि बाह्येंद्रियाणि मनश्चांतःकरणमधिष्ठायाश्रि-
त्य शब्दादीन् विषयानयं जीव उपभुंक्ते ॥ ९ ॥

ननु च कार्यकारणसंघातव्यतिरेकेणैवंभूतमात्मानं सर्वेपि किं न पश्यन्ति ॥ तत्राह ॥ उत्क्रामंत-
मिति ॥ उत्क्रामंतं देहांतरं गच्छंतं तस्मिन्नेव देहे स्थितं वा ॥ विषयं भुंजानं वा गुणान्वितमिंद्रिया-
दियुक्तं जीवं विमूढा नानुलोकयंति ॥ ज्ञानमेव चक्षुर्येषां ते विवेकिनः पश्यंति ॥ १० ॥ दुर्ज्ञेय-
श्चायं यतोस्विपेष्वपि केचिदेव पश्यंतीत्याह ॥ यतंत इति ॥ यतंतः ध्यानादिभिः प्रयतमाना

उत्क्रामंतं स्थितं वापि भुंजानं वा गुणान्वितं ॥ विमूढा नानुपश्यंति पश्यंति ज्ञानचक्षुषः ॥ १० ॥
यतंतो योगिनश्चैवं पश्यंत्यात्मन्यवस्थितं ॥ यतंतोप्यकृतात्मानो नैनं पश्यंत्यचे-
तसः ॥ ११ ॥

योगिनः केचिदेनमात्मनि देहेऽवस्थितं विविक्तं पश्यंति शास्त्राभ्यासा-
दिभिः ॥ यत्नं कुर्वाणा अप्यकृतात्मानः ॥ अविशुद्धचित्ताः ॥ अत एवाचेतसो मंदम-
तयः ॥ एनं पश्यंति ॥ ११ ॥ ॥ ॥

तदेवंनतद्भासयतेसूर्यइत्यनेनपारमेश्वरंपरंधामोक्तं ॥ तत्प्राप्तानांचापुनरावृत्तिरुक्ता।
तत्रसंसारिणोभावमाशंक्यसंसारिस्वरूपंदेहादिव्यतिरिक्तंदर्शितं ॥ इदानींतमेवपारमेश्व
रंरूपमनंतशक्तित्वेननिरूपयति ॥ यदादित्यादि ॥ चतुर्भिः ॥ आदित्यादिषुस्थितंपदंने।

यदादित्यगतंतेजोजगद्भासयतेऽखिलं ॥ यच्चंद्रमसियच्चाग्नौतत्तेजोविद्धिमामकं ॥
१२ ॥ गामाविश्यचभूतानिधारयाम्यहमोजसा ॥ पुष्णामिचौषधीःसर्वाःसोमो
भूत्वारसात्मकः ॥ १३ ॥

कप्रकारंतेजोविश्वंप्रकाशयति ॥ तत्सर्वंतेजोमदीयमेवजानीहि ॥ १२ ॥ किंच ॥ गामा
विश्येति ॥ गांपृथ्वीमोजसेनबलेनाधिष्ठायाहमेवचराचराणिभूतानिधारयामि ॥ अहमे
वरसमयःसोमोभूत्वाव्रीह्याद्यौषधीःसंवर्द्धयामि ॥ १३ ॥

किंच ॥ अहमिति ॥ अहंवैश्वानरोभूत्वाजाठरःप्राणिनांदेहस्यांतःप्रविश्यप्राणापानाभ्यांत
दुद्दीपकाभ्यांसहितःप्राणिनांभुक्तंभक्ष्यंभोज्यंलेह्यंचोष्यंतच्चतुर्विधंमन्नंपचामि ॥ तत्रयद्दंतै
रवखंड्यावखंड्यभक्ष्यतेअपूपादितद्भक्ष्यं ॥ यत्तुकेवलंजिह्वयाविलोड्यनिगीर्यतेपायसादि
तद्भोज्यं ॥ यत्तुजिह्वायांनिःक्षिप्यरसास्वादेननिगीर्यतेतद्द्रवीभूतंगुडादितल्लेह्यं ॥ यत्तुदंष्ट्राभिः

अहंवैश्वानरोभूत्वाप्राणिनांदेहमाश्रितः ॥ प्राणापानसमायुक्तःपचाम्यन्नंचतुर्विधं ॥ १४ ॥

निःपीड्यसारांशंनिगीर्यविशिष्टंत्यज्यते ॥ यथेक्षुदंडादितच्चोष्यमिति ॥ १४ ॥ किंच ॥ सर्वस्येति
सर्वस्यप्राणिजातस्यहृदिसंगम्यांतर्यामिरूपेप्रविष्टोहं ॥ अतएवमत्तएवहेतोःप्राणिमात्रस्य
पूर्वानुभूतार्थविषयास्मृतिर्भवति ॥ ज्ञानंविषयेंद्रियसंप्रयोगजंभवति ॥ अपोहनंचतयोः
प्रमोषोभवति ॥ वेदैश्चसर्वैस्तत्तद्देवतादिरूपेणाहमेववेद्यः ॥ वेदांतकृत्संप्रदायप्रवर्तकश्च

ज्ञानदोगुरुरहमित्यर्थः ॥ वेदार्थविदप्यहमेव ॥ १५ ॥ इदानीं तद्धामपरमं ममेति ॥ दुक्तंस्वकीयंसर्वो
त्तमंतत्व ॥ स्वरूपंदर्शयति ॥ द्वाविमाविति ॥ त्रिभिः ॥ क्षरश्चाक्षरश्चेति ॥ द्वाविमौपुरुषौलोके
प्रसिद्धौ ॥ तावेवाह ॥ तत्रक्षरःपुरुषोनामसर्वाणिभूतानिब्रह्मादिस्थावरान्तानिशरीराणि ॥

सर्वस्यचाहंहृदिसन्निविष्टोमत्तःस्मृतिर्ज्ञानमपोहनंच ॥ वेदैश्चसर्वैरहमेववेद्योवेदा-
न्तकृद्वेदविदेवचाहं ॥ १५ ॥ द्वाविमौपुरुषौलोकेक्षरश्चाक्षरएवच ॥ क्षरःसर्वाणिभूता
निकूटस्थोक्षरउच्यते ॥ १६ ॥

अविवेकिलोकस्यशरीरेष्वेवपुरुषत्वप्रसिद्धेः ॥ कूटः ॥ राशिःपर्वतइवदेहेषुनश्यत्स्वपिनिर्वि
कारतयातिष्ठतीतिकूटस्थश्चेतनोभोक्ता ॥ सत्वक्षरः ॥ पुरुषउच्यतेविवेकिभिः ॥ १६ ॥ १४२

यदर्थमितौलक्षितौतमाह ॥ उत्तमइति ॥ एताभ्यांक्षराक्षराभ्यामन्योविलक्षणःउत्तमःपुरुषः ॥ वै
लक्षण्यमेवाहपरमश्चासावात्माचेतिचोदाहृतः ॥ उक्तःश्रुतिभिः ॥ आत्मत्वेनक्षराद्वचेतनाद्विलक्ष
णःपरमत्वेनाक्षराच्चभोक्तुर्विलक्षणइत्यर्थः ॥ परमात्मत्वमेव ॥ दर्शयति ॥ योलोकत्रयमिति ॥
यईश्वरःईशनशीलः ॥ अव्ययश्चनिर्विकारःसन्योलोकत्रयंकृत्स्नमाविश्यबिभर्तिपालयति

उत्तमःपुरुषस्त्वन्यःपरमात्मेत्युदाहृतः ॥ योलोकत्रयमाविश्यबिभर्त्यव्ययईश्वरः ॥ १७ ॥
यस्मात्क्षरमतीतोहमक्षरादपिचोत्तमः ॥ अतोस्मिलोकेवेदेचप्रथितःपुरुषोत्तमः ॥ १८ ॥

१७ ॥ एवंभूतपुरुषोत्तमत्वमात्मनोनामनिर्वचनेनदर्शयति ॥ यस्मादिति ॥ यस्मात्क्षरंजडवर्गम
तिक्रान्तोहंनित्यमुक्तत्वात् ॥ अक्षराच्चेतनवर्गादप्युत्तमश्चनियन्तृत्वात् ॥ अतोलोकेवेदेचपुरुषोत्तमःप्रथि
तःप्रख्यातोस्मि ॥ तथाचश्रुतिः ॥ सवाअयमात्मासर्वस्येशानःसर्वस्याधिपतिःसर्वमिदंप्रशास्तीत्यादि ॥ १८

एवंभूतेश्वरस्य ज्ञातुः फलमाह ॥ यो मामिति ॥ एवमुक्तप्रकारेणासंमूढो निश्चितमतिः सन्
यो मां पुरुषोत्तमं जानाति ॥ स सर्वभावेन सर्वप्रकारेण मामेव भजति ॥ ततः सर्ववित्सर्वज्ञो
भवति ॥ १९ ॥ अध्यायार्थमुपसंहरति ॥ इतीति ॥ इति अनेन संक्षेपप्रकारेण गुह्यतमं अ

यो मामेवमसंमूढो जानाति पुरुषोत्तमं ॥ स सर्वविद्भजति मां सर्वभावेन भारत ॥ १९ ॥
इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ ॥ एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत ॥ २० ॥

तिरहस्यं संपूर्णं शास्त्रमेव मयोक्तं ॥ न तु नविंशति श्लोकमध्यायमात्रं ॥ हे अनघ ॥ व्यसनशू
न्य ॥ अत एवैतदुक्तं शास्त्रं बुद्ध्वा बुद्धिमान्सम्यक्ज्ञानी स्यात् ॥ कृतकृत्यश्च स्यात् यो पि को
पि हे भारत ॥ त्वं कृतकृत्योसि इति ॥ किं वक्तव्यमिति भावः ॥ संसारशाखिनं छित्वास्पष्टं पंच
दशे प्रभुः ॥ पुरुषोत्तमयोगाख्यं परं पारमुपादिशत् ॥ २० ॥

इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे सुबोधिन्यां टीकायां पंचदशोऽध्यायः ॥ १५
आसुरीं संपदं त्यक्त्वा दैवीमेवाश्रितां नराः ॥ मुच्यंत इति निर्णेतुं तद्विवेकोऽथ षोडशे ॥ १ ॥
पूर्वाध्यायांते एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत इत्युक्तं ॥ तत्र कथं तत्त्वं बुध्यते को वा न बु

इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे पुरुषो
त्तमयोगो नाम पंचदशोऽध्यायः ॥ १५ ॥ श्रीभगवानुवाच ॥ अभयं सत्वसंशुद्धिर्ज्ञान
योगव्यवस्थितिः ॥ दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवं ॥ १ ॥

ध्यत इत्यपेक्षायां तत्वज्ञानेऽधिकारिणोऽनधिकारिणश्चेति विवेकार्थं षोडशाध्याया
रंभः ॥ निरूपिते हि कार्ये ऽधिकारिजिज्ञासा भवति ॥ तदुक्तं भट्टैः ॥ भारो यो येन वोढव्यः ॥
प्रयतीति वर्त्मो यदा ॥ तदा कस्तस्य वोढेति शक्यं कर्तुं निरूपणमिति ॥ तत्राधिकारिविशे

षणां भूतानां दैवीसंपदमाह ॥ श्रीभगवानुवाच ॥ अभयमिति त्रिभिः ॥ अभयं भयाभावः ॥ सत्त्व
स्य चित्तस्य संशुद्धिः सुप्रसन्नता ज्ञानयोगे आत्मज्ञानोपाये व्यवस्थितिः ॥ परिनिष्ठा दानं स्व
भोज्यस्यान्नादेर्यथोचितं संविभागः ॥ दमो बाह्येंद्रियसंयमः ॥ यज्ञो यथाधिकारं दर्शपूर्णमा
सादिः ॥ स्वाध्यायो ब्रह्मयज्ञादिर्जपयज्ञः ॥ तपः सप्तदशाध्याये वक्ष्यमाणं शारीरादि ॥ आर्जवमवक्रता

अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनं ॥ दया भूतेष्वलोलुत्वं मार्दवं ह्रीरचापलं ॥ २ ॥

१ ॥ किंच ॥ अहिंसेति ॥ अहिंसा परपीडावर्जनं ॥ सत्यं यथादृष्टार्थभाषणं ॥ अक्रोधस्ता
डितस्यापि चित्ते क्षोभानुत्पत्तिः ॥ त्याग औदार्यं शान्तिश्चित्तोपरतिः पैशुनं परोक्षे परदोषप्रकाश
नं तद्वर्जनमपैशुनं ॥ भूतेषु दीनेषु दया ॥ अलोलुत्वं ॥ अलोलुपत्वं वर्णलोपश्चार्षः ॥ मार्दवं मृदुत्व
मक्रूरता ॥ ह्रीः अकार्यप्रवृत्तौ लोकलज्जा ॥ अचापलं व्यर्थक्रियाराहित्यं ॥ २ ॥

किंच ॥ तेज इति ॥ तेजः प्रागल्भ्यं क्षमा परिभवादिषूत्पद्यमानक्रोधप्रतिबंधः ॥ धृतिर्दुःखादिभि
रवसीदतश्चित्तस्य स्थिरीकरणं शौचं बाह्याभ्यंतरशुद्धिः ॥ अद्रोहो जिघांसाराहित्यं ॥ अतिमानि
ता आत्मन्यतिपूज्यत्वाभिमानः ॥ तदभावो नातिमानिता ॥ एतान्यभयादीनि षड्विंशतिर्दैवीं सं
पदमभिजातस्य संभवंति देवयोग्यां सात्त्विकीं संपदमभिलक्ष्य तदाभिमुख्येन जातस्य भाविक

तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता ॥ भवंति संपदं दैवीमभिजातस्य भारत ॥ ३ ॥
दंभो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च ॥ अज्ञानं चाभिजातस्य पार्थ संपदमासुरीं ॥ ४ ॥

कल्याणस्य पुंसो भवंतीत्यर्थः ॥ ३ ॥ आसुरीं संपदमाह ॥ दंभो धर्मध्वजित्वं ॥ दर्पो धनविद्यादिनिमित्त
श्चित्तस्योत्सेकः ॥ अभिमानो व्याख्यातः ॥ क्रोधः प्रसिद्धः ॥ पारुष्यं निष्ठुरत्वं ॥ अज्ञानमविवेकः ॥ आसुरीमि
त्युपलक्षणं ॥ असुराणां राक्षसानां च या संपत्तामासुरीमभिलक्ष्य जातस्यैतानि दंभादीनि भवंतीत्यर्थः ॥ ४

गीता०स० एतयोः संपदोः कार्यं दर्शयन्नाह दैवी संपदिति ॥ दैवी या संपत्तया युक्तो मयोपदिष्टे तत्त्वज्ञानेऽ-
१४५ धिकारी ॥ आसुर्या संपदा युक्तस्तु नित्यसंसारीत्यर्थः ॥ एतच्छ्रुत्वा किमत्राधिकारी न वेति ॥
संदेहव्याकुलचित्तमाश्वासयति हे पांडव मा शुचः शोकं माकार्षीः यतस्त्वं दैवीं संपदमभिजातोसि

दैवी संपद्विमोक्षाय निबंधायासुरी मता ॥ मा शुचः संपदं दैवीमभिजातोसि पांडव ॥ ५ ॥ द्वौ ।
भूतसर्गौ लोकेस्मिन् दैव आसुर एव च ॥ दैवो विस्तरतः प्रोक्त आसुरं पार्थ मे शृणु ॥ ६ ॥

५ ॥ सर्वात्मना वर्जयितव्येत्येतद्दर्शयितुमासुरीं संपदं प्रपंचयति ॥ द्वाविति ॥ द्वौ विप्रका-
रौ भूतानां सर्गौ भवतस्तच्छृणु ॥ सुरराक्षसप्रकृत्योरेकीकारेण द्वावित्युक्तं ॥ अन्य-
त्र राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिता इत्यादिना ॥ नवमाध्यायोक्तप्रकृतित्रैविध्येनाऽ- १४५
विरोधः स्पष्टमन्यत् ॥ ६ ॥

आसुरीं विस्तरतो निरूपयति ॥ प्रवृत्तिं चेत्यादि ॥ द्वादशभिः ॥ धर्मे प्रवृत्तिं अधर्मान्निवृत्तिं च आसुर-
स्वभावा जना न जानन्ति ॥ अतः शौचमाचारः सत्यं तेषु नास्ति ॥ ७ ॥ ननु वेदोक्तयोर्धर्माधर्मयोः
प्रवृत्तिं च निवृत्तिं च कथं न विदुः कुतो धर्माधर्मयोरनंगीकरणे जगतः सुखदुःखादिव्यवस्थासंभवा-
त् ॥ कथं वा शौचाचारविषयामीश्वराज्ञामतिवर्तेरन् ॥ ईश्वरानंगीकरणे कुतो जगत उत्पत्तिः

प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः ॥ न शौचं नापि चाचारो न सत्यं तेषु विद्यते ॥ ७ ॥ अस-
त्यमप्रतिष्ठं ते जगदाहुरनीश्वरं ॥ अपरस्परसंभूतं किमन्यत्कामहैतुकं ॥ ८ ॥

स्यादेतत् आह ॥ असत्यमिति ॥ नास्ति सत्यं वेदपुराणादिप्रमाणं यस्मिन् तादृशं जगदाहुः ॥
वेदादीनां प्रमाण्यं न मतमित्यर्थः ॥ तदुक्तं ॥ त्रयो वेदस्य कर्त्तारो मुनिभंडनिशाचरा इत्यादि ॥ अ-
त एव नास्ति धर्माधर्मरूपा प्रतिष्ठा व्यवस्थाहेतुर्यस्य तत् ॥ स्वाभाविकं जगद्वैचित्र्यमाहुरित्यर्थः ॥

गीता०स०
१४६

अतो नास्तीश्वरः कर्तृव्यवस्थापकश्च यस्य तादृशं जगदाहुः ॥ तर्हि किं कुतोस्य जगत उत्पत्तिं
वदंतीत्यत आह अपरस्परसंभूतं अपरस्परश्चेत्यपरस्परं अपरस्परतः ॥ अन्योन्यतः स्त्री
पुरुषमिथुनात् किमन्यत्कारणमस्त्यन्यत्किंचित् किंतु कामहेतुकं स्त्रीपुरुषकाम एव प्रवा

एतां दृष्टिमवष्टभ्य नष्टात्मानोल्पबुद्धयः ॥ प्रभवंत्युग्रकर्म्माणः
क्षयाय जगतोहिताः ॥९॥

हरूपेण हेतुरस्येत्याहुरित्यर्थः ॥८॥ किंच ॥ एतामिति ॥ एतां लोकायतिकानां दृष्टिं दर्शन
माश्रित्य नष्टात्मानो मलिनचित्ताः संतोल्पबुद्धयः ॥ दृष्टार्थमात्रमतयः ॥ अत एवोग्रं
हिंस्रं कर्म येषां ते ॥ अहिता वैरिणो भूत्वा जगतां क्षयाय प्रभवंति ॥ उद्भवंतीत्यर्थः ॥९॥ १४६

अपिच ॥ काममिति ॥ दुःपरं पूरयितुमशक्यं काममाश्रित्य दंभादियुक्ताः संतः क्षुद्रदेवताराध
नादौ प्रवर्त्तंते ॥ कथं असद्ग्राहान्गृहीत्वा अनेन मंत्रेणैतां देवतामाराध्य महानिधीन्साधयिष्य
त्यादिदुराग्रहान्मोहमात्रेण स्वीकृत्य प्रवर्त्तंते ॥ अशुचिमद्यमांसादिविषयाणि व्रतानि येषां ते
१० किंच ॥ चिंतामिति ॥ प्रलयो मरणमेवांतो यस्यास्तां ॥ अपरिमेयां परिमातुमशक्यां चि

काममाश्रित्य दुःपूरं दंभमानमदान्विताः ॥ मोहाद्गृहीत्वासद्ग्राहान्प्रवर्त्तंतेशुचिव्रताः ॥१०॥
चिंतामपरिमेयां च प्रलयांतामुपाश्रिताः ॥ कामोपभोगपरमा एतावदिति निश्चिताः ॥११॥

न्तामाश्रिता नित्यं चिंतापरायणा इत्यर्थः ॥ कामोपभोग एव परमो येषां ते ॥ एतावदिति ॥ कामोप
भोग एव परमः पुरुषार्थो नान्यदस्तीति कृतनिश्चयाः ॥ अर्थसंचयानीहं तदस्तु तत्रेणान्वयः ॥ त
थाच बार्हस्पत्यं सूत्रं ॥ काम एवैकः पुरुषार्थ इति ॥ चैतन्यविशिष्टकायः पुरुष इति ॥११॥

अनृतं च अशौचमिति ॥ आशा एव पाशास्तेषां शतानि तैर्बद्धाः ॥ इतस्ततः आकृष्यमाणाः ॥ काम-
क्रोधौ परमयनमाश्रयो येषां ते ॥ कामोपभोगार्थमन्यायेन चौर्यादिनार्थानां संचया-
न् राशीनीहन्ते इच्छन्ति ॥ १२ ॥ तेषां मनोराज्यं कथयन्नरकप्राप्तिमाह ॥ इदमद्येति ॥ चतुर्भिः ॥

आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ॥ ईहन्ते कामभोगार्थमन्यायेनार्थसंचयान् ॥
१२ ॥ इदमद्य मया लब्धमिदं प्राप्स्ये मनोरथं ॥ इदमस्तीदमपि मे भविष्यति पुनर्धनं ॥ १३ ॥
असौ मया हतः शत्रुर्हनिष्ये चापरानपि ॥ ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान्सुखी ॥ १४ ॥

प्राप्स्ये प्राप्स्यामि ॥ मनोरथं मनसः प्रियं ॥ शेषं स्पष्टं ॥ १३ ॥ एषां च त्रयाणां श्लोकानामि-
त्यज्ञानविमोहिताः सन्तो नरके पतन्तीति ॥ चतुर्थेनान्वयः ॥ किंच ॥ असाविति ॥ सिद्धः कृ-
तकृत्यः स्पष्टमन्यत् ॥ १४ ॥

किंच ॥ आढ्य इति ॥ आढ्यो धनादिसंपन्नः ॥ अभिजनवान् कुलीनः ॥ यक्ष्ये यागेऽप्यनुष्ठानेनापि
दीक्षितान्तरेभ्यः सकाशान्महतीं प्रतिष्ठां प्राप्स्यामि दास्यामि तावकेभ्यः ॥ मोदिष्ये हर्षं प्राप्स्यामि ॥ इ-
त्येवमज्ञानेन विमोहिता मिथ्याभिनिवेशं प्रापिताः ॥ १५ ॥ एवंभूता यत्प्राप्नुवन्ति तच्छृणु ॥ अनेकेति
अनेकेषु मनोरथेषु प्रवृत्तमनेकचित्तं तेन विभ्रान्ता विक्षिप्ताः ॥ तेनैव मोहमयेन जालेन समावृताः

आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया ॥ यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिता
: ॥ १५ ॥ अनेकचित्तविभ्रान्ता मोहजालसमावृताः ॥ प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ ॥ १६

मत्स्या इव सूत्रमयेन जालेन यन्त्रिताः ॥ एवं कामभोगेषु प्रसक्ता अभिनिविष्टाः सन्तोऽशुचौ कश्म-
ले नरके पतन्ति ॥ १६ ॥ यक्ष्य इति च यस्तेषां मनोरथ उक्तः ॥ स केवलं दंभाहंकारादिप्रधान एव न तु सा-
त्विक इति भियेन येत्याह ॥ आत्मसंभाविता इति द्वाभ्यां ॥ आत्मनैव संभाविताः पूज्यतां नीता न तु सा-

धुभिःकैश्चित् ॥ अतएवस्तब्धाअनम्राधनेनयोमानोमदश्चताभ्यामन्विताःसंतःतेनाममात्रेण
येयज्ञाः ॥ यद्वा ॥ दीक्षितःसोमयाजीत्येवमादिनाममात्रसिद्धयेयेयज्ञास्तैर्यजंते ॥ कथंदंभेननतु
श्रद्धयाअविधिपूर्वकंयथाभवतितथा ॥ १७ ॥ अविधिपूर्वकत्वमेवप्रपंचयति ॥ अहंकारमिति

आत्मसंभाविताःस्तब्धाधनमानमदान्विताः ॥ यजंतेनामयज्ञैस्तेदंभेनाविधिपूर्वकं ॥ १७ ॥
अहंकारंबलंदर्पंकामंक्रोधंचसंश्रिताः ॥ मामात्मपरदेहेषुप्रद्विषंतोभ्यसूयकाः ॥ १८ ॥

अहंकारादीन्संश्रिताःआत्मपरदेहेषुस्वविदेहेषुचचिदंशेनस्थितंमांप्रतिद्विषंतोयजंते
दंभयज्ञेषुश्रद्धायाअभावादात्मनोदेहस्यैवपीडाभवति ॥ तथापश्वादीनामप्यविधिनाहिंसा
यांचैतन्यद्रोहमात्रमेवावशिष्यतइतिप्रद्विषंतइत्युक्तं ॥ अभ्यसूयकाःसन्मार्गवर्ति-
नांगुणेषुदोषारोपकाः ॥ १८ ॥

तेषांचकदाचिदप्यासुरस्वभावप्रच्युतिर्नभवतीत्याह ॥ तानिति ॥ द्वाभ्यां ॥ तानहंमांद्विषतःक्रूरान्संसारेषुजन्ममृ-
त्युमार्गेषु ॥ तत्राप्यासुरीष्वेवातिक्रूरासुव्याघ्रसर्पादियोनिष्वजस्रमनवरतंक्षिपामि ॥ तेषांपापकर्मणांतादृ-
शंफलंददामीत्यर्थः ॥ १९ ॥ किंच ॥ आसुरीमिति ॥ मांअप्राप्यैवेत्येवकारेणमत्प्राप्तिशंकाकुतस्तेषां ॥ मत्प्रा-

तानहंद्विषतःक्रूरान्संसारेषुनराधमान् ॥ क्षिपाम्यजस्रमशुभानासुरीष्वेवयोनिषु ॥ १९ ॥ आसुरींयोनि-
मापन्नामूढाजन्मनिजन्मनि ॥ मामप्राप्यैवकौंतेयततोयांत्यधमांगतिं ॥ २० ॥ त्रिविधंनरकस्येदंद्वारंनाशन-
मात्मनः ॥ कामःक्रोधस्तथालोभस्तस्मादेतत्त्रयंत्यजेत् ॥ २१ ॥ प्त्युपायंसन्मार्गमप्यप्राप्यततोप्यधमांगतिंकृ-
मिकीटादियोनिंयांतीत्युक्तं ॥ शेषंस्पष्टं ॥ २० ॥ उक्तानामासुरदोषाणांमध्येसकलदोषमूलभूतंदोषत्रयंस-
र्वथावर्जनीयमित्याह ॥ त्रिविधमिति ॥ कामःक्रोधोलोभश्चेदंत्रितयंत्रिविधंनरकस्यद्वारं ॥ अतएवात्म-
नोनाशनंनीचयोनिप्रापकं ॥ तस्मादेतत्त्रयंसर्वात्मनात्यजेत् ॥ २१ ॥

गीता॰स॰ त्यागे च विशेषमाह ॥ एतैरिति ॥ तमसो नरकस्य द्वारभूतैरेतैस्त्रिभिः कामादिभिर्मुक्तो नरस्त्वात्मनः
१४९ श्रेयः साधनं तपोयोगादिकमाचरति तत तस्मान्मोक्षमाप्नोति ॥२२॥ कामादित्यागश्च स्वधर्माचरणं वि
ना न भवतीत्याह ॥ यः इति ॥ शास्त्रविधिं वेदविहितं धर्ममुत्सृज्य यः कामकारतो यथेच्छं वर्त्तते स सिद्धिं

एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः ॥ आचरत्यात्मनः श्रेयस्ततो याति परां गतिं ॥२२॥ यः शास्त्र
विधिमुत्सृज्य वर्त्तते कामकारतः ॥ न स सिद्धिमवाप्नोति न सुखं न परां गतिं ॥ २३ ॥ तस्माच्छास्त्रं प्रमाणं
ते कार्याकार्यव्यवस्थितौ ॥ ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्त्तुमिहार्हसि ॥ २४ ॥
तत्त्वज्ञानं न प्राप्नोति । न च

सुखं न च उपशमं न च परां गतिं मुक्तिं प्राप्नोति ॥ २३ ॥ फलितमाह ॥ तस्मादिति ॥ इदं कार्यमिदमकार्यमि
त्यवस्थायां तव शास्त्रं श्रुतिस्मृतिपुराणादिकमेव प्रमाणं ॥ अतः शास्त्रविधानोक्तं कर्म ज्ञात्वा इह कर्मा
धिकारे वर्त्तमानो यथाधिकारं कर्म कर्त्तुमर्हसि । तन्मूलत्वात्तच्छुद्धिः सम्यक् ज्ञानं मुक्तानामित्यर्थः ॥ २४ ॥ १४९

देवे दैत्ये च संपत्तिः संविभागेन षोडशे ॥ तत्त्वज्ञानेऽधिकारस्तु सात्विकस्येति दर्शितं ॥ १ ॥ इति श्रीभगव
द्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे टीकायां सुबोधिन्यां षोडशोऽध्यायः ॥
१६ ॥ उक्ताधिकारहेतूनां श्रद्धा सुख्या तु सात्विकी ॥ इति सप्तदशे गौणः श्रद्धाभेदस्त्रिधोच्यते ॥ १ ॥
पूर्वाध्यायान्ते यः शास्त्रविधिमुत्सृज्य वर्त्तते कामकारतः ॥ न स सिद्धिमवाप्नोतीत्यनेन शास्त्रोक्तविधिमुत्सृ

इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे दैवासुरविभागसंप
त्तियोगो षोडशोऽध्यायः ॥ १६ ॥ अर्जुन उवाच ॥ ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः ॥ १

त्सृज्य कामकारेण वर्त्तमानस्य ज्ञानेऽधिकारो नास्तीत्युक्तं ॥ तत्र शास्त्रविधिमुत्सृज्य वर्त्तते कामकारतः न स सि
तत्र शास्त्रविधिमुत्सृज्य कामकारं विना श्रद्धया प्रवर्त्तमानानां किमधिकारोऽस्ति नास्ति वेति बुभुत्सयाऽर्जुन उ
वाच ॥ य इति ॥ ये शास्त्रमुत्सृज्य यजन्ते इत्यनेन शास्त्रार्थं बुद्ध्वा तमुल्लंघ्य वर्त्तमाना न गृह्यन्ते ते तेषां श्रद्धया यजनानुप

गीता०स० पत्तेः ॥ आस्तिक्यबुद्धिर्हि श्रद्धानचासौशास्त्रार्थज्ञानवतांशास्त्रविरुद्धेऽर्थेसंभवति । तानेवाधिकृत्यत्रिवि
१५० धाभवतिश्रद्धायजंतेसात्विकादेवानित्याद्युत्तरावुपपत्तेश्च अतोनात्रशास्त्रातिलंघिनोगृह्यंते । अपितुले
शबुद्ध्यावाऽऽलस्याद्वाशास्त्रार्थज्ञानेप्रयत्नमकृत्वाकेवलमाचारपरंपरावशेनैवश्रद्धयाकंचिद्देवता
राधनादौप्रवर्तमानागृह्यंते । अतोयमर्थः । येशास्त्रविधिमुत्सृज्यदुःखबुद्ध्याऽऽलस्यादेवकेवलमाचारप्रा

तेषांनिष्ठातुकाकृष्णसत्वमाहोरजस्तमः ॥१॥

माण्येनश्रद्धयान्विताः संतोयजंते तेषांतुकानिष्ठाकास्थितिः आश्रयः तानेवविशेषेणपृच्छति । किंसत्वं ।
आहोस्विद्राजसः अथवातमः । इतितेषांतादृशीदेवपूजादिप्रवृत्तिः किंसत्वसंश्रिताराजसंश्रितावातमःसंश्रि
ज तावेत्यर्थः श्रद्धायाःसात्विकत्वात्क्लेशबुद्ध्याः आलस्येनचशास्त्रानादरस्यच । राजसतामसत्वात्संदे
हयदिसत्वभावसंश्रितास्तर्हितेषामपिसात्विकत्वाद्यथोक्तात्मज्ञानेऽप्यधिकारःस्यादन्यथानेतिप्रश्नतात्पर्यार्थः ॥१॥ १५०

अत्रोत्तरंश्रीभगवानुवाच । त्रिविधेति ॥ अयमर्थः ॥ शास्त्रतत्त्वज्ञानतःप्रवर्तमानानांपरमे
श्वरपूजाविषयासात्विकीएषविशेषेवश्रद्धालोकाचारमात्रेणतुवर्तमानानांदेहिनांयाश्र
द्धासात्विकीराजसीतामसीतामसीचेतित्रिविधाभवति । तत्रहेतुः ॥ स्वभावजास्वभावःपूर्वजन्म
संस्कारः ॥ तस्माज्जातास्वभावजास्वभावमन्यथाकर्तुंसमर्थाहिशास्त्रोक्तविवेकज्ञानेनतन्नि

श्रीभगवानुवाच ॥ त्रिविधाभवतिश्रद्धादेहिनांसास्वभावजा । सात्विकीराजसीचैवतामसी
चेतितांशृणु ॥२॥

षांनास्ति । अतःकेवलंपूर्वस्वभावेनकेवलंश्रद्धाभवति । तामिमांत्रिविधां
श्रद्धांशृणु ॥ तदुक्तं ॥ व्यवसायात्मिकाबुद्धिरिति ॥२॥ ननुचश्रद्धासात्विकीवसत्वकार्यत्वेनत
थैवश्रीभगवतात्रयोदशेप्रतिनिर्दिष्टत्वात् । यथोक्तंसमोदमस्तितिक्षेज्यासमः । सत्यंदयास्मृतिः । तुष्टि
स्त्यागोस्पृहाश्रद्धाह्रीर्दमादिस्वनिवृत्तिरित्येताःसत्वस्यवृत्तयः ॥ अतःकथंतस्यास्त्रैविध्यमुच्य

तेसत्वतयापिरजस्तमोयुक्त ॥ पुरुषाश्रयत्वेनरजसोमिश्रत्वेनसत्वस्यत्रैविध्यंघटतइत्याह ॥ स
त्वानुरूपासत्वतारतम्यानुसारिणीसर्वस्यविवेकिनोऽविवेकीनोवालोकस्यश्रद्धाभवति ॥
तस्मादयंपुरुषःलौकिकःश्रद्धामयःश्रद्धाविकारः ॥ त्रिविधयाश्रद्धयाविक्रियतइत्यर्थः ॥ तदे
वाह ॥ योयच्छ्रद्धः याद्दशीश्रद्धायस्यसताद्दशीश्रद्धायुक्तएवसः ॥ यःपूर्वंसत्वोत्कर्षेणसा

सत्वानुरूपासर्वस्यश्रद्धाभवतिभारत ॥ श्रद्धामयोयंपुरुषोयोयच्छ्रद्धःसएवसः ॥३॥

त्विकश्रद्धयायुक्तःपुरुषःसपुनस्ताद्दशःस्वसंस्कारेणसात्विकश्रद्धाएवभवति ॥ यस्तुरज
सउत्कर्षेणराजसश्रद्धायुक्तःपुरुषःसपुनस्ताद्दशएवभवति ॥ यस्तुतमसउत्कर्षेणतामस
श्रद्धायुक्तःसपुनस्ताद्दशएवभवतिलोकाचारमात्रेणप्रवर्तमानेष्वेवंसात्विकराजसतामस
श्रद्धाव्यवस्थाशास्त्रजनितविवेकज्ञानयुक्तानांतुस्वभावविजयेनसात्विकेवश्रद्धेतिप्रकरणार्थः ३ ॥

सात्विकादिभेदमेवकार्यभेदेनप्रपंचयति ॥ यजंतइति ॥ सात्विकाजनाःसत्वप्रकृतीन्देवानेवयजंतेपूजयं
ति ॥ राजसास्तुरजःप्रकृतीन्यक्षान्राक्षसांश्चयजंते ॥ एतेभ्योन्येतुविलक्षणास्तामसाजनास्तामसानेव
प्रेतान्भूतगणांश्चयजंते ॥ सत्वादिप्रकृतीनांतत्तद्देवतानांतुपूजाहविभिस्तत्तत्पूजकानांसात्विकत्वादिज्ञा
तव्यमित्यर्थः ॥४॥ राजसतामसेषुपुनर्विशेषांतरमाह ॥ अशास्त्रविहितमिति ॥ द्वाभ्यां ॥ शास्त्रविधिमजानंतो

यजंतेसात्विकादेवान्यक्षरक्षांसिराजसाः ॥ प्रेतान्भूतगणांश्चान्येयजंतेतामसाजनाः ॥४॥
अशास्त्रविहितंघोरंतप्यंतेयेतपोजनाः ॥ दंभाहंकारसंयुक्ताःकामरागबलान्विताः ॥५॥

पिकेचित्प्राचीन
पुण्यसंस्कारेणसात्विकाएवभवंति ॥ केचित्तुमध्यमाराजसाभवंति ॥ अधमास्तुतामसाभवंति ॥ येपुनर
त्यंतमंदभाग्यामतानुषंगतःपाखंडसंगेनतदाचारानुवर्तिनःसंतःअशास्त्रविहितंघोरंभूतभयंकरंतप
स्तप्यंतेकुर्वंति ॥ तत्रहेतवः ॥ दंभाहंकाराभ्यांयुक्ताः ॥ तथाकामोभिलाषःरागआसक्तिःबलमाग्रहःएतै

रन्विताः संतः तानासुरनिश्चयान्विद्धीत्युत्तरेणान्वयः ॥५॥ किंच कर्षयंत इति । शरीरस्थं प्रारंभकत्वे
न देहे स्थितं भूतानां पृथिव्यादीनां ग्रामं समूहं कर्शयंतः वृथैवोपवासादिभिः कृशं कुर्वन्तोऽचेतसोऽ
विवेकिनः मां चांतर्यामितयांतः शरीरस्थं देहमध्ये स्थितं च कर्शयंति । मदाज्ञालंघनेनैव कर्शयंतः
संत एव तपस्यंति । तानासुरनिश्चयान् । आसुरोतिक्रूरो निश्चयो येषां तान् ॥६॥ आहारादिभेदादपि

कर्षयंतः शरीरस्थं भूतग्राममचेतसः । मां चैवांतःशरीरस्थं तान्विद्ध्यासुरनिश्चयान् ॥६॥ आहार
स्त्वपि सर्वस्य त्रिविधो भवति प्रियः । यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु ॥७॥

सात्विकादिभेदं दर्शयितु
माहेति । आहारस्त्वित्यादि त्रयोदशभिः । सर्वस्यापि जनस्याप्याहारोऽन्नादिः स तु यथायथं त्रिविधः
प्रियो भवति । तथा यज्ञतपोदानानि च त्रिविधानि भवंति । तेषां च वक्ष्यमाणमिमं भेदं शृणु । एतत्तु राज
सतामसाहारयज्ञादिपरित्यागेन सात्विकाहारयज्ञादिसेवया सत्ववृद्धौ यत्नः कर्तव्य इत्येतदर्थं कथ्यते ॥७॥ १५२

तत्राहारत्रैविध्यमाह । आयुरिति । त्रिभिः । आयुर्जीवितं सत्वमुत्साहः बलं शक्तिः आरोग्यं रोगराहि
त्यं सुखं चित्तप्रसादः प्रीतिरभिरुचिः । आयुरादीनां विवर्धनाः विवृद्धिकराः रस्याः रसवंतः स्निग्धाः स्नेहयु
क्ताः । स्थिराः रसांशेन चिरकालावस्थायिनः हृद्या दृष्टमात्रा एव हृदयंगमाः । एवंभूता आहारा भक्ष्यभो
ज्यादयः सात्विकस्य प्रियाः ॥८॥ तथा । कट्विति । अतिशब्दः कट्वादिषु सप्तस्वपि संबध्यते । अति

आयुःसत्वबलारोग्यसुखप्रीतिविवर्धनाः । रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्विकप्रियाः ॥८॥
कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः । आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥९॥

कटुर्निंबादिः । अत्यम्लोतिलवणोत्युष्णश्च प्रसिद्धः । अतितीक्ष्णः मरीच्यादिः । अतिरूक्षः कंगुको
द्रवादिः ॥ अतिकट्वादयश्चाहारा राजसस्येष्टाः प्रियाः दुःखं तात्कालिकं हृदयसंतापादिः शोकः प
श्चाद्भावि दौर्मनस्यं । आमयो रोगः एतानि प्रददतीति प्रयच्छंति ॥९॥

तथा यातयाममिति ॥ यतो यामः प्रहरो मध्ये पक्वस्यौदनादेस्तत् यातयामं शैत्यावस्थां प्राप्तमि-
त्यर्थः ॥ गतरसं निःपीडितसारं पूतिदुर्गंधं पर्युषितं दिनांतरपक्वं उच्छिष्टमन्यभुक्तावशिष्टं ॥ अ-
मेध्यमभक्ष्यं कलंजादि ॥ एवंभूतं भोजनं भोक्तुं तामसस्य प्रियं ॥ १० ॥ यज्ञोपि त्रिविधः तत्र

यातयामं गतरसं पूति पर्युषितं च यत् ॥ उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियं ॥ १० ॥ अफ-
लाकांक्षिभिर्यज्ञो विधिदृष्टो य इज्यते ॥ यष्टव्यमेवेति मनः समाधाय स सात्विकः ॥ ११ ॥

सात्विकं यज्ञमाह ॥ अफलाकांक्षिभिरिति त्रिभिः ॥ फलाकांक्षारहितैः पुरुषैर्विधिना दृष्टः अ-
वश्यतया विहितो यो यज्ञः ॥ इज्यते अनुष्ठीयते ॥ यः स सात्विको यज्ञः कथमिज्यते ॥ यष्टव्य-
मेवेति ॥ यज्ञानुष्ठानमेव कार्यं नान्यत् फलं साधनीयमित्येवं पुनः समाधाय एकाग्रं कृत्वे-
त्यर्थः ॥ ११ ॥

राजसं यज्ञमाह ॥ अभिसंधायेति ॥ फलमभिसंधायोद्दिश्य यत् इज्यते यज्ञः क्रियते दंभार्थं यज्ञं राजसं
विद्धि ॥ १२ ॥ तामसं यज्ञमाह ॥ विधिहीनमिति ॥ विधिहीनमिति ॥ विधिहीनं शास्त्रोक्तविधिशून्यं ॥ अ-
सृष्टान्नं ब्राह्मणादिभ्यो न सृष्टं न निष्पादितमन्नं यस्मिंस्तं ॥ मंत्रैर्हीनं यथोक्तदक्षिणारहितं च ॥ श्रद्धाशू-

अभिसंधाय तु फलं दंभार्थमपि चैव यत् ॥ इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसं ॥ १२ ॥ वि-
धिहीनमसृष्टान्नं मंत्रहीनमदक्षिणं ॥ श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥ १३ ॥ देवद्वि-
जगुरुप्राज्ञपूजनं शौचमार्जवं ॥ ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥ १४ ॥

न्यं यज्ञं तामसं परिचक्षते कथयंति सृष्टाः ॥ १३ ॥ तपसः सात्विकादिभेदं दर्शयितुं प्रथमं तावच्छारीरा-
दिभेदेन त्रैविध्यमाह ॥ देवद्विजेति ॥ त्रिभिः प्राज्ञा गुरुव्यतिरिक्ताः अन्येपि तत्वविदः ॥ देवब्राह्मणा-
दिपूजनं शौचादिकं शारीरं निवर्त्यं तप उच्यते ॥ १४ ॥ वाचिकं तप आह ॥ अनुद्वेगेति ॥ उद्वेगं न भयं

गीता०स०
१५४

नकरोतीत्यनुद्वेगकरं वाक्यं सत्यं च श्रोतुः । प्रियं च हितं तथा परिणामे सुखकरं स्वाध्यायाभ्यसनं
वेदाभ्यासश्च वाचा निवर्त्तत तपः स्मृतं ॥ १५ ॥ मानसं तप आह । मनःप्रसाद इति । मनसः प्रसादः
इति । मनसः प्रसत्तिः स्वच्छता सौम्यत्वमक्रूरता । मौनं मुनेर्भावः मननमित्यर्थः । आत्मनो विनिग्रहो ।

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् । स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥ १५ ॥ मनः
प्रसादः सौम्यत्वं मौनमात्मविनिग्रहः । भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ॥ १६ ॥ श्रद्धया परया
तप्तं तपस्तत्त्रिविधं नरैः । अफलाकांक्षिभिर्युक्तैः सात्विकं परिचक्षते ॥ १७ ॥ विषयेभ्यः प्रत्याहारः

भावसंशुद्धिः । व्यवहारे मायाराहित्यं इत्येतन्मानसं तपः ॥ १६ ॥ तदेवं शारीरं वाङ्मनोभिर्निर्वर्त्यं त्रिवि
धं तपो दर्शितं तस्य त्रिविधस्यापि तपसः सात्विकादिभेदेन त्रैविध्यमाह । श्रद्धयेति । त्रिभिः तत्त्रि
विधमपि तपः श्रेष्ठया श्रद्धया फलाकांक्षयाशून्यैर्युक्तैरेकाग्रीभूतैर्नरैस्तप्तं तत्सात्विकं ॥ १७ ॥ १५४

राजसमाह । सत्कारेति । सत्कारः साधुकारः साधुरयमिति तापस इत्यादिवाक्पूजा मान्यप्र
त्युत्थानाभिवादनादि दैहिकी पूजा अर्थलाभादि एतदर्थं दंभेन च यत्तपः क्रियते अत एव चलम
नित्यं अध्रुवं च क्षणिकं यदेवंभूतं तपः । तदिह राजसं प्रोक्तं ॥ १८ ॥ तामसं तप आह मूढेति ॥

सत्कारमानपूजार्थं तपो दंभेन चैव यत् । क्रियते तदिदं प्रोक्तं राजसं चलमध्रुवं ॥ १८ ॥ मूढ
ग्राहेणात्मनो यत्पीडया क्रियते तपः । परस्योत्सादनार्थं वा तत्तामसमुदाहृतं ॥ १९ ॥ दात
व्यमिति यद्दानं दीयतेऽनुपकारिणे । देशे काले च पात्रे च तद्दानं सात्विकं स्मृतं ॥ २० ॥

मूढग्राहेणाविवेककृतेन दुराग्रहेणात्मनः पीडया यत्तपः । क्रियते परस्योत्सादनार्थं वा अ
न्यस्य विनाशार्थं अभिचाररूपं तत्तामसमुदाहृतं कथितं ॥ १९ ॥ पूर्ववत्प्रतिज्ञातमेव दानस्य त्रै
विध्यमाह । दातव्यमिति । दातव्यमित्येवं निश्चयेन यद्दानं दीयते । अनुपकारिणे प्रत्युपका

रःसमर्थायदेशेकुरुक्षेत्रादौकालेग्रहणादौपात्रेचेति । देशकालसाहचर्यात्तत्पात्रमाप्रयुक्ताया
त्रस्तुतायतपःश्रुतादियुक्तायब्राह्मणायेत्यर्थः । यद्वा । पात्रइतिचतुर्थ्यर्थेवैषापात्रेरक्षकायेत्यर्थः
सहिसर्वस्मादापद्गणाद्दातारंपातीतियदेवंभूतंदानंतत्सात्त्विकं ॥२०॥ राजसंदानमाह । यत्त्विति
कालान्तरेममप्रत्युपकारंकरिष्यतीत्येवमर्थंफलंवास्वर्गादिकमुद्दिश्ययत्पुनर्दानंदीयते । परिक्लि

यत्तुप्रत्युपकारार्थंफलमुद्दिश्यवापुनः । दीयतेचपरिक्लिष्टंतद्राजसमुदाहृतं ॥२१॥
अदेशकालेयद्दानमपात्रेभ्यश्चदीयते । असत्कृतमवज्ञातंतत्तामसमुदाहृतं ॥२२॥

ष्टंपरिक्लेशयुक्तंयथाभवत्येवंतद्दानंराजसमुदाहृतं ॥२१॥ तामसंदानमाह । अदेशइति । अदेशे
अशुचिस्थाने । अकालेऽशौचसमये । अपात्रेभ्योविटनटादिभ्योयद्दानंदीयते । देशकालपात्रसंप
त्तावपियदसत्कृतंपादप्रक्षालनादिसत्काररहितं । अवज्ञातंतिरस्कारयुक्तंएवंभूतंदानंतामसमुदाहृतं २२ १५५

ननुनैवंविचार्यमानेसर्वमपियज्ञतपोदानादिराजसतामसप्रायमेवेतिव्यर्थोयज्ञादिप्रयासइत्याशं
क्यतथाविधस्यापिसात्त्विकतापादनप्रकारंदर्शयितुमाह । ॐतत्सदिति । ब्रह्मणःपरमात्मनोनि
र्देशोनामव्यपदेशःस्मृतःशिष्टैः । तत्रतावदोमिति । ब्रह्मेत्यादिश्रुतिप्रसिद्धेमितिब्राह्मणोनाम
जगत्कारणत्वेनातिप्रसिद्धत्वाद्विदुषांपरोक्षत्वाच्चतच्छब्दोऽपिब्रह्मणोनामपरमार्थसत्त्वसाधुत्वा

ॐतत्सदितिनिर्देशोब्रह्मणस्त्रिविधस्मृतः । ब्राह्मणास्तेनवेदाश्चयज्ञाश्चविहिताःपुरा ॥२३॥

दिभिःसच्छब्दोब्रह्मणोनाम । अयंत्रिविधोऽपिनामनिर्देशोविगुणमपिसगुणीकर्तुंसमर्थइ
त्याशयेनस्तौति । तेनत्रिविधेनब्रह्मणोनिर्देशेनब्राह्मणावेदाश्चयज्ञाश्चपूर्वंसृष्ट्यादौविहि
ताविधात्रानिर्मिताःसगुणीकृतावा । यद्वा । यस्यायंत्रिविधोनिर्देशस्तेनपरमात्मनाब्राह्मणा
दयोऽतिपवित्रतयासृष्टास्तस्मादस्यायंनिर्देशोऽतिप्रशस्तइत्यर्थः ॥२३॥

इदानींप्रत्येकमोंकारादीनांप्राशस्त्यंदर्शयिष्यन्नोंकारस्यतावदाह ।। तस्मादिति ।। यस्मादेवंब्र
ह्मणोनिर्देशःप्रशस्तस्तस्मादोमित्युदाहृत्यउच्चार्यकृतावेदवादिनांयज्ञाद्याःशास्त्रोक्ताःक्रियाः
सततंसर्वदाङ्गवैकल्येपिप्रकर्षेणवर्त्तंतेसगुणाभवतीत्यर्थः ।। २४ द्वितीयंनामप्रस्तौति ।।

तस्मादोमित्युदाहृत्ययज्ञदानतपःक्रियाः ।। प्रवर्त्तंतेविधानोक्ताःसततंब्रह्मवादि
नां ।। २४ ।। तदित्यनभिसंधायफलंयज्ञतपःक्रियाः ।। दानक्रियाश्चविविधाः
क्रियंतेमोक्षकांक्षिभिः ।। २५ ।। तदिति ।। तदित्युदाहृत्यातिपूर्वस्यानुषंगः ।। तदित्युदा
हृत्यमुमुक्षुभिर्मोक्षकांक्षिभिःपुरुषैःफलाभिसंधिमकृत्वायदियज्ञाद्याःक्रियाःक्रियंते ।।
ततश्चित्तशोधनद्वारेणफलसंकल्पत्यागेननमुमुक्षुत्वंसंपादनत्वात्तत्कृत्यत्वात्तच्छब्द
निर्देशःप्रशस्तइत्यर्थः ।। २५ ।। ।। ।।

सच्छब्दप्राशस्त्यमहसद्भावइति ।। द्वाभ्यां ।। सद्भावेस्त्वस्तित्वेदेवदत्तस्यपुत्रादिकमास्तीत्यस्मिन्न
र्थेसाधुत्वेचदेवदत्तस्यपुत्रादिश्रेष्ठमित्यस्मिन्नर्थेसदित्येतत्पदंप्रयुज्यतेप्रशस्तेमांगल्येलौकेवि
वाहादिकर्मणिचसदिदंकर्मेतिसच्छब्दोयुज्यतेसंगच्छतइतिवा ।। २६ ।। किंच ।। यज्ञइति ।। यज्ञादिषु
यास्थितिःतात्पर्येणावस्थानं ।। तदपिसदित्युच्यते ।। यस्यचेदंनामत्रयंसएवपरमात्माफलंयस्य

सद्भावेसाधुभावेचसदित्येतत्प्रयुज्यते ।। प्रशस्तेकर्मणितथासच्छब्दःपार्थयुज्यते ।। २६ ।।
यज्ञेतपसिदानेचस्थितिःसदितिचोच्यते ।। कर्मचैवतदर्थीयंसदित्येवाभिधीयते ।। २७ ।।

तदर्थीयंकर्मपूजोपहारगृहांगणपरिमार्जनोपलेपनरंगमालिकादिकाक्रियातत्सिद्धयेपर
त्यक्तंमक्रियतेध्यानजपादिकृतेवाधनार्पणादिविषयंतत्कर्मतदर्थीयंतच्चातिव्यवहितमपि
सदित्येवाभिधीयते ।। यस्मादेवंमतिप्रशस्तंनामत्रयंतस्मादेतत्सर्वसर्वकर्मसाद्गुण्यापादकंकीर्त्तयेदि

तिनात्पर्यार्थः। अत्रवाचार्यवाह्रतुपपत्त्याविधिः। कल्प्यतेविधेयंसूयतेवस्त्विति न्यायात्। अपरेतु
सवन्तेनेविधानोक्ताः कियंतेमोक्षकांक्षिभिरित्यादिवर्तमानोपदेशः समभिव्याहृतत्वादिवद्विधित
यापरिणामनीयमित्याहुः। तत्तुसद्भावेचेत्यादिषुप्राप्तार्थत्वात्सन्नसंगच्छतइतिपूर्वोक्तक्रमेणविधिकल्प
नैवज्यायसी॥२७॥ इदानीमसर्वकर्मसुशुद्धयेवप्रवृत्त्यर्थमश्रद्धयाकृतंसर्वंनिंदति। अश्रद्धयेति। अश्र

अश्रद्धयाहुतंदत्तंतपस्तप्तंकृतंचयत्। असदित्युच्यतेपार्थनचतत्प्रेत्यनोइह॥२८॥ इतिश्रीभगवद्गी
तासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेत्रिगुणविभागोसप्तदशोऽध्यायः॥१७॥

द्धयाहुतंहवनंदत्तंदानंतप्तंसंनिर्वर्तितंतपः यच्चान्यदपिकृतंकर्मतत्सर्वमसदित्युच्यते। यतस्तत्प्रेत्यलो
कान्तरेनफलतिविगुणत्वात्। नोइहनचास्मिन्लोकेफलतियशस्करं॥२८॥ रजस्तमोमयींत्यक्त्वाश्रद्धांस
त्त्वमयींश्रितः। तत्वज्ञानेधिकारीस्यादितिसप्तदशोस्थितं॥१॥ इतिश्रीभगवद्गीतासूप०ब्रह्मविद्यायांटीकायांस
प्तदशोध्यायः॥१७॥

न्यासत्यागविभागेनसर्वगीतार्थसंग्रहं। स्पष्टमष्टादशेप्राह परमार्थविनिर्णये॥१॥ अत्रचसर्वक
र्माणिमनसासंन्यस्यास्तेसुखंवशी। संन्यासयोगयुक्तात्मेत्यादिषुकर्मसंन्यासउपदिष्टः तथायुक्तःक
र्मफलासंगंनित्यतृप्तोनिराश्रयः। सर्वकर्मफलत्यागंततःकुरुयतात्मवानित्यादिषुचफलमात्रत्यागेन
कर्मानुष्ठानमुपदिष्टंनचपरस्परविरुद्धंसर्वज्ञःपरमकारुणिकोभगवानुपदिशेत्। अतःकर्मसंन्या

अर्जुनउवाच संन्यासस्यमहाबाहोतत्त्वमिच्छामिवेदितुं। त्यागस्यचहृषीकेशपृथक्केशिनिसूदन॥१॥

सस्यतत्त्वानुष्ठानस्याविरोधप्रकारंबुभुत्सुः अर्जुनउवाच। संन्यासेति। हेहृषीकेश सर्वेंद्रियनियन्तः केशिनि
सूदन। केशिनाम्नोहिमहतोहयाकृतेर्दैत्यस्ययुद्धेसुखंव्यादायभक्षयितुमागच्छतोन्यंतंव्यात्तेमुखेवाम
बाहुंप्रवेश्यतत्क्षणमेवविवर्द्धितेनतेनैवबाहुनाकर्कटिकफलवत्तंविदार्यनिषूदितवान्। अतएव
हेमहाबाहोसंन्यासस्यत्यागस्यचतत्त्वंपृथग्वेदितुमिच्छामि॥१॥

अन्तरं ॥ श्रीभगवानुवाच ॥ काम्यानामिति ॥ पुत्रकामो यजेत स्वर्गलोककामो यजेतेत्येवमादि काम्योपबंधेन विहितानां काम्यानां कर्मणां न्यासं परित्यागं संन्यासं कवयो विदुः सम्यक् फलैः सह सर्वकर्मणामपि न्यासं संन्यासं पंडिता विदुः जानंतीत्यर्थः सर्वेषां काम्यानां नित्यनैमित्तिकानां च कर्मणां फलत्यागमात्रं निपुणा विचक्षणाः प्राहुः न तु स्वरूपतः कर्मत्यागं ॥ ननु नित्यनैमित्तिकानां फला

श्रीभगवानुवाच ॥ काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः ॥ सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ॥ २ ॥

श्रवणाविदेद्यमानस्य फलस्य कथं त्यागः स्यात् ॥ न हि वंध्यायाः पुत्रत्यागः संभवति ॥ उच्यते यद्यपि स्वर्गकामः पशुकाम इत्यादिवत् अहरहः संध्यामुपासीत यावज्जीवमग्निहोत्रं जुहोतीत्यादिषु फलविशेषो न श्रूयते तथापि श्रूयते च नित्यादिषु फलं ॥ सर्व एते पुण्यलोका भवंति ॥ कर्मणा पितृलोक इति तस्मादुपयुक्तमुक्तं सर्वकर्मफलत्यागमिति ॥ २ ॥ १५८

न तु च फलत्यागेन पुनरपि निष्फलेषु कर्मसु प्रवृत्तिरेव स्यात् ॥ तत्र सर्वेषामपि कर्मणां संयोगपृथक्त्वेन विविदिषार्थतया विनियोगात् ॥ तथा च श्रुतिः ॥ तमेतमात्मानं वेदानुवचनेन ब्राह्मणा विविदिषंति ॥ यज्ञेन दानेन तपसानाशकेनेति ॥ अतः प्रतिपदोक्तं सर्वं सफलं बंधकत्वेन

॥ त्याज्यं दोषवदित्येके ॥

त्यक्ता विविदिषार्थं सर्वकर्मानुष्ठानं यावदेतदेव ॥ विषयादिच नित्यानित्यवस्तुविवेकेन निवृत्य देहाद्यभिमानमत्या बुद्धेः प्रत्यक्प्रवणतातावत्यर्थं तत्सत्त्वशुद्ध्यर्थं ज्ञानाविरुद्धं यथोचितमावश्यकं कर्म कुर्वतस्तत्फलत्याग एव च कर्मत्यागो नाम न स्वरूपेण ॥ तथा च स्मृतिः ॥ कुर्वन्ते

गीता०म०
१५९

वेह कर्माणि जिजीविषेच्छतं समाः इति ॥ ततः परं तु सर्वकर्मनिवृत्तिः स्वत एव भवति ॥ तदुक्तं ॥ नै
कर्मसिद्धौ ॥ प्रत्यक्प्रवणतां बुद्धेः ॥ कर्माण्युत्पाद्य शुद्धितः ॥ कृतार्थान्यस्तमायान्ति प्रा
वृषिते घना इति ॥ तदुक्तं भगवता ॥ यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ॥ आत्मन्येव

कर्म प्राहुर्मनीषिणः ॥ १

च संतुष्टस्तस्य कार्यं न विद्यत इति ॥ वसिष्ठेन चोक्तं ॥ न कर्माणि त्यजेद्योगी कर्मभिस्त्यज्य
ते ह्यसौ ॥ कर्मणो मूलभूतस्य संकल्पस्यैव नाशनः इति ॥ ज्ञाननिष्ठाविक्षेपकत्वमात्रा
त्त्यजेद्वा ॥ तदुक्तं भगवता ॥ तावत्कर्माणि कुर्वीत न निर्विद्येत यावता ॥ मत्कथाश्रवणादौ च १५९

श्रद्धा यावन्न जायते ॥ ज्ञाननिष्ठो विरक्तो वा मद्भक्तो वानपेक्षकः ॥ सलिंगानाश्रमांस्त्यक्त्वा चरेद
विधिगोचर इत्यादि ॥ त्याज्यमिति ॥ प्रसंगेन प्रकृतिमनुसरामः ॥ अपि दुःखफलत्वागमात्रा
मेव शास्त्रार्थो न कर्मत्याग इत्येतदेवमतांतरविशेषेण दृढीकर्तुं मतभेदं दर्शयति ॥ त्याज्य
मिति ॥ दोषवद्धिंसादिदोषत्वेन बंधकं इति ॥ हेतोः सर्वमपि कर्म त्याज्यमिति ॥ एके सांख्याः आ

यज्ञदानतपःकर्म ॥ १

हुः ॥ मनीषिण इत्यस्य भावः ॥ न हिंस्यात्सर्वभूतानीति निषेधः ॥ पुरुषस्यानर्थहेतुर्हिंसे
त्याह ॥ अग्नीषोमीयं पशुमालभेतेत्यादि ॥ प्राकरणिको विधिस्तु हिंसायाः ॥ क्रतूपकारक
त्वमाह ॥ अतो भिन्नविषयत्वेन सामान्यविशेषन्यायागोचरत्वात् ॥ द्रव्यसाध्येषु चेत्सर्वेष

पिकर्मसु हिंसादेः ॥ संभवात्सर्वमपि कर्मत्याज्यमेवेति ॥ तदुक्तं ॥ दृष्टवदानुश्रविकः स
ह्यविशुद्धः ॥ क्षयातिशययुक्त इति ॥ अपरे तु मीमांसका यज्ञादिकं कर्म न त्याज्यमिति प्रा
हुः ॥ अयं भावः ॥ क्रत्वर्थापि सती हिंसा पुरुषेणैव कर्तव्या सामान्योद्देशेनापि क्रत्वा ॥

न त्याज्यमिति चापरे ॥ ३

पुरुषस्यैवं प्रकर्तव्यहेतुरेव ॥ तथा हि ॥ विधिर्विषयस्य तदुपदेशेनानुष्ठानं विधत्ते मादृ
यं जनकत्वाद्द्वेषत्वं स्यान्न त्वेवं विधेर्निषेधस्य तादर्थ्यमपेक्षितं प्राप्तिमात्रापेक्षितत्वात् ॥
अन्यथाज्ञानप्रमादिकृतदोषाभावप्रसंगात् ॥ तदेवं समानविषयत्वेन सामान्यशास्त्रवि
शेषेणाबाधात्वात् सिद्दीपत्वां अतो नित्यं ॥ यज्ञादिकर्म न त्याज्यमिति ॥ ३ ॥ १६०

अनेन विधिनिषेधयोः समानबलवत्तावार्यते ॥ सामान्यविशेषन्यायं संसपादयितुं ॥ एवं म
तभेदमुपन्यस्य स्वमतं कथयितुमाह ॥ निश्चयमिति ॥ तत्रैव विप्रतिपत्तित्यागे इति ॥ स्वयमे
व चनात् शृणु ॥ त्यागस्य लोकप्रसिद्धत्वात् ॥ मितथ्रोतव्य केन प्रकीर्तितः ॥ त्रैविध्यं च नियत
स्य तु संन्यासः कर्मण इत्यादिना वक्ष्यति ॥ प्रथमं तावन्निश्चयमाह ॥ ४ ॥ यज्ञदानेति ॥ द्वाभ्यां ॥

निश्चयं शृणु मे तत्र त्यागे भरतसत्तम ॥ त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः ॥ ४ ॥
यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत् ॥ यज्ञो दानं तपश्चैव पावनानि मनीषिणां ॥ ५ ॥

मनीषिणां विवेकिनां पावनानि चित्तशुद्धिकराणि येन प्रकारेण कृतान्येतानि पावनानि भवंति ॥ ५
येन प्रकारेण कृतान्येतानि पावनानि भवंति ॥ तं प्रकारं दर्शयन्नाह ॥ एतानीति ॥ यानि यज्ञादि
कर्माणि मया पावनानीत्युक्तं ॥ एतान्येव कर्तव्यानि कथं संगं कर्तव्याभिनिवेशं त्यक्त्वा केवलमी

गीता॰स॰ अपरसाधनतयाकर्त्तव्यानिफलानित्यक्त्वाकर्त्तव्यानिइतिनिश्चितं॥मेमतं॥अतएवोत्तमं॥६॥
१६१ प्रतिज्ञातंत्यागस्यत्रैविध्यमिदानींदर्शयितिनियतस्येति॥त्रिभिः॥काम्यस्यकर्मणोबंधकत्वात्
सोयुक्तः॥नियतस्यतुनित्यस्यपुनःएवकर्मणःसंन्यासस्त्यागोनोपपद्यते॥सत्वशुद्धिद्वारेणमोक्ष

एतान्यपितुकर्म्माणिसंगंत्यक्त्वाफलानिच॥कर्त्तव्यानीतिमेपार्थनिश्चितंमतमु
त्तमं॥६॥नियतस्यतुसंन्यासःकर्म्मणोनोपपद्यते॥मोहात्तस्यपरित्यागस्तामसः
परिकीर्त्तितः॥७॥

हेतुत्वात्॥अतस्तस्यपरित्यागउपादेयेपित्याज्यमित्येवंलक्षणान्मोहादेवभवेत्॥सच १६१
मोहस्यतामसत्वात्तामसःपरिकीर्त्तितः॥७॥

राजसंत्यागमाह॥दुःखमिति॥अकर्त्तात्मबोधंविनाकेवलंदुःखमित्येवंज्ञात्वाशरीरायासभयान्नित्यंक
र्मत्यजेदितियत्॥तादृशस्त्यागोराजसःदुःखस्यराजसत्वात्॥अतस्तंराजसंत्यागंकृत्वाराजसःपुरुष
स्त्यागस्यफलंज्ञाननिष्ठालक्षणंनैवलभेतेत्यर्थः॥८॥सात्विकंत्यागमाह॥कार्यमिति॥कार्यमित्येवबु
द्ध्यानियतंअवश्यकंकर्त्तव्यतयाविहितंकर्मसंगंफलंचत्यक्त्वाक्रियतइतितादृशस्त्यागःसात्विकोमतः

दुःखमित्येवयत्कर्म्मकायक्लेशभयात्त्यजेत्॥सकृत्वाराजसंत्यागंनैवत्यागफलंलभेत्॥८॥
कार्यमित्येवयत्कर्मनियतंक्रियतेऽर्जुन॥संगंत्यक्त्वाफलंचैवसत्यागःसात्विकोमतः॥९॥

एवंभूतसात्विकत्यागःसात्विकोमतः॥९॥एवंभूतसात्विकत्यागपरिनिष्ठितस्यलक्षणमाह॥नद्वेष्टी
तिसत्वेसमाविष्टःसत्वेनसंव्याप्तःसात्विकःत्यागीअकुशलंदुःखावहंशिशिरेप्रातःस्नानादिकंकर्मन
द्वेष्टिकुशलेचसुखकरेकर्मणिनिदाघेमध्याह्नस्नानादौनानुषज्जतेप्रीतिंनकरोतीति॥तत्रहेतुः॥मेधावी

वी स्थिरबुद्धिः यतः परिभवादिमहदपि दुःखं सहते । स्वर्गादिसुखं च त्यज्यते । अतः किं यदेतत् । तात्कालि
कं सुखं दुःखं चेत्येवमनुसंधानवानित्यर्थः । अत एव छिन्नः संशयो मिथ्याज्ञानं दैहिकसुखदुःखयोरु
पादित्सापरिजिहीर्षालक्षणं यस्य सः ॥१०॥ नन्वेवंभूतात्कर्मफलत्यागाद्वरं सर्वकर्मत्यागः । तत्राह

न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते ॥ त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः ॥१०॥
न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः ॥ यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते ॥११॥

तिकर्मविक्षेपाभावेन ज्ञाननिष्ठा सुखं संपद्यते । तत्राह नेति । देहभृता देहात्माभिमानवता निः
शेषेण सर्वाणि कर्माणि त्यक्तुं न हि शक्यं । तदुक्तं । न हि कश्चित् । क्षणमपि जातु तिष्ठत्यकर्म
कृत् इत्यादिना । तस्माद्यस्तु कर्माणि कुर्वन्नेव कर्मफलत्यागी स एव मुख्यः त्यागीत्यभिधीय
ते ॥११॥ ॥ ॥ ॥

एवंभूतस्य कर्मफलत्यागस्य फलमाह । अनिष्टमिति । अनिष्टं नारकित्वं इष्टं देवादिलोकप्रा
प्तिं अनिष्टमिष्टमिश्रं मनुष्यत्वं एवं त्रिविधं पापस्य पुण्यस्य चोभयमिश्रस्य च कर्मणो यत्फलं प्र
सिद्धं तत्सर्वमत्यागिनां सकामानामेव प्रेत्य परत्र भवति । तेषां त्रिविधकर्मसंभवात् । न तु संन्या
सिनां क्वचिदपि भवति । संन्यासिशब्देनात्र फलत्यागसाम्यात्प्राकृताः कर्मफलत्यागिनोपि गृह्यं

अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलं । भवत्यत्यागिनां प्रेत्य न तु संन्यासि
नां क्वचित् ॥१२॥

ते । अनाश्रितः कर्मफलं कार्यं कर्म करोति यः । स संन्यासी च
योगी चेत्येवमादौ च फलत्यागिषु संन्यासशब्दप्रयोगदर्शनात् । तेषां सात्विकानां पापासंभवा
त् । ईश्वरार्पणेन च पुण्यफलस्य त्यक्तत्वात् । त्रिविधमपि कर्मफलं न भवतीत्यर्थः ॥१२॥

ननु च एवं कर्म कुर्वतः कर्मफलं कथं न भवेदित्याशंक्य संगत्यागिनो निरहंकारस्य सतः कर्मफ-
लेन लेपो नास्तीत्युपपादयितुमाह ॥ पंचैतानीति पंचभिः ॥ सर्वकर्म्मणां सिद्धये निष्पत्तये इमा-
नि वक्ष्यमाणानि पंच कारणानि मे वचनात् निबोध जानीहि ॥ आत्मनः कर्तृत्वाभिमानं निषेध्याव

पंचैतानि महाबाहो कारणानि निबोध मे ॥ सांख्ये कृतान्ते प्रोक्तानि सि-
द्धये सर्वकर्म्मणां ॥१३॥

अवश्यमेतानि ज्ञातव्यानीति तेषां स्तुत्यर्थमाह ॥ सम्यक् ख्यायते ज्ञायते परमात्मनेति सांख्यं ॥
कृतं कर्म तस्यान्तः समाप्तिरस्मिन्निति कृतान्तः तस्मिन् वेदान्तसिद्धान्त इत्यर्थः ॥ यद्वा संख्या-
यन्ते गण्यन्ते तत्त्वान्यस्मिन्निति सांख्यं कृतः अन्तो निर्णयो यस्मिन्निति कृतान्तं सांख्यं शास्त्रमेव त-
स्मिन् प्रोक्तानि ॥ अतः सम्यक् निबोधेत्यर्थः ॥१३॥ १६३

तान्येवाह ॥ अधिष्ठानमिति ॥ अधिष्ठानं शरीरं कर्ता चिज्जडग्रंथिरहंकारः अयमिवं अनेकप्रकारं करणं च-
क्षुः श्रोत्रादि ॥ विविधाश्च कार्यतः स्वरूपतश्च पृथग्भूताश्चेष्टाः प्राणापानादीनां व्यापाराः ॥ अत्र तत्रैव
दैवं च पंचमं कारणं चक्षुराद्यनुग्राहक आदित्यादि सर्वप्रेरकोन्तर्यामी वा ॥ १४ ॥ एतेषामेव सर्वकर्महेतु-
त्वमाह ॥ शरीरेति ॥ यथोक्तैः पंचभिः आरभ्यमाणं कर्म त्रिविधं तत्रभव्य शरीरवाङ्मनोभिरित्युक्तं ॥ शारी-

अधिष्ठानं तथा कर्ता करणं च पृथग्विधं ॥ विविधाश्च पृथक् चेष्टा दैवं चैवात्र पंचमं ॥१४॥
शरीरवाङ्मनोभिर्यत्कर्म्म प्रारभते नरः ॥ न्याय्यं वा विपरीतं वा पंचैते तस्य हेतवः ॥१५॥

रं वाचिकं मानसं च त्रिविधं कर्मेति प्रसिद्धेः ॥ शरीरादिभिर्यथावत्कर्म धर्म्यं वा अधर्म्यं वा करोति ।
नरः तस्य सर्वस्य कर्मणः एते पंच हेतवः ॥१५॥ ततः किमत आह ॥ तत्रेति ॥ सर्वत्र सर्वस्मिन् कर्मणि
एते पंच हेतवः ॥ इत्येवं सति केवलं निरुपाधिकमसंगमात्मानं तु यः कर्तारं पश्यति ॥ शास्त्राचार्योपदे-

गीता०स० शाभ्यासंस्कृतबुद्धित्वात्दुर्मतिरसौनसपश्यति ॥१६॥ कस्तर्हि सुमतिर्यस्यकर्मलेपोनास्तीत्युक्तमि-
१६४ त्यपेक्षायामाह ॥ यस्येति ॥ कृतोहंकर्त्तेत्येवंभूतोभावोभिप्रायोयस्यनास्ति ॥ यद्वा ॥ अहंकृतोहंकारस्ययः
स्वभावः ॥ कर्तृत्वाभिनिवेशोयस्यनास्ति ॥ शरीरादीनामेवकर्मकर्तृत्वालोचनादित्यर्थः ॥ अतएवयस्यबु-
द्धिर्नलिप्यते ॥ इष्टानिष्टबुद्ध्याकर्मसुनसज्जते ॥ अतएवंभूतोदेहादिव्यतिरिक्तात्मदर्शीसइमाल्लो-

तत्रैवंसतिकर्तारमात्मानंकेवलंतुयः ॥ पश्यत्यकृतबुद्धित्वान्नसपश्यतिदुर्मतिः ॥१६॥ यस्य
नाहंकृतोभावोबुद्धिर्यस्यनलिप्यते ॥ हत्वापिसइमाल्लोकान्नहंतिननिबध्यते ॥१७॥

कान्सर्वानपिप्राणिनोलोकदृष्ट्याहत्वापिविविक्तयासुदृष्ट्या हत्वापिविविक्तयास्वदृष्ट्यानहं-
तिनचतत्फलैर्विबध्यतेबंधंप्राप्नोति ॥ किंपुनःसत्वधाराव्यपरोक्तानीत्यत्रिहेतुभिःकर्मभि-
स्तस्यबंधशंकेत्यर्थः ॥ तदुक्तं ॥ ब्रह्मण्याधायकर्माणिसंगंत्यक्त्वाकरोतियः ॥ लिप्यतेनसपापेनेति ॥१७ १६४

हत्वापिनहंतिनबध्यतइत्येतदेवोपपादयितुंकर्मचोदनायाः ॥ कर्माश्रयस्यचकर्मफलादीनांचत्रिगु-
णात्मकत्वान्निर्गुणस्यात्मनः ॥ तत्संबंधोनास्तीत्यभिप्रायेणकर्मचोदनांकर्माश्रयंचाह ॥ ज्ञानमिति
ज्ञानमितत्साधनमेतदितिनिबोध ॥ ज्ञेयंइष्टसाधनंकर्मपरिज्ञाता ॥ एवंभूतज्ञानाश्रयः ॥ एवंत्रिविधा
कर्मचोदनाचोद्यतेप्रवर्त्यते ॥ अनयेति ॥ चोदनाज्ञानादित्रितयंकर्मप्रवृत्तिहेतुरित्यर्थः ॥ यद्वा ॥

ज्ञानंज्ञेयंपरिज्ञातात्रिविधाकर्मचोदना ॥ करणंकर्मकर्तेतित्रिविधःकर्मसंग्रहः ॥१८॥

चोदनेतिविरुच्यते ॥ तदुक्तंभट्टैः ॥ चोदनाचोपदेशश्चविधिश्चैकार्थवाचिनः ॥ इतिनतत्स्वाय-
मर्थः ॥ उक्तलक्षणंत्रिगुणात्मकंज्ञानादित्रयमवलंब्यकर्मविधिःप्रवर्त्ततइति ॥ तदुक्तं ॥ त्रैगु-
ण्यविषयावेदाइति ॥ तथाचकरणंसाधकतमंकर्मचकर्तुरीप्सिततमं ॥ कर्ताक्रियानिव-
र्तकः ॥ कर्मसंगृह्यतेऽस्मिन्निति कर्मसंग्रहः करणादित्रिविधंकारकंक्रियाश्रयइत्यर्थः ॥ संप्रदा-

गीता०स० १६५

नादिकारकत्रयं परंपरया निवर्तकं केवलं न तु साक्षात् क्रियायास्त्वाश्रयत्वात् करणादित्रितयमेव क्रि-
याश्रय इत्युक्तं ॥ १८ ॥ ततः किमत आह ज्ञानमिति ॥ गुणाः सम्यक्कार्यभेदेन संख्यायंते प्र-
तिपाद्यंतेऽस्मिन्निति गुणसंख्यानं सांख्यशास्त्रं तस्मिन् ज्ञानं कर्म क्रिया कर्ता च प्रत्येकं सत्वा-
दिगुणभेदेन त्रिविधमेवोच्यते ॥ तान्यपि ज्ञानादीनि वक्ष्यमाणानि यथावच्छृणु त्रिविधमेवेत्येवकारेण गु-

ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः ॥ प्रोच्यते गुणसंख्याने यथावच्छृणु तान्यपि ॥ १९ ॥

णत्रयादिव्यतिरेकेणात्मनः स्वतः कर्मादिप्रतिषेधार्थः ॥ चतुर्दशेऽध्याये तत्र सत्त्वं निर्मलत्वादित्यादि-
ना गुणानां बंधकत्वादिप्रकारेण निरूपितः ॥ सप्तदशेऽध्याये यजंते सात्विका देवानित्यादिना गुणकृत-
त्रिविधस्वभावं परित्यज्य सात्विकाहारादिसेवया सात्विकः स्वभावः संपादनीय इत्युक्तं इह तु क्रिया-
कारकफलादीनामात्मकं संबंधो नास्तीति दर्शयितुं सर्वेषां त्रिगुणात्मकत्वं वितरतिविशेषो ज्ञातव्यः ॥ १९ ॥ १६५

तत्र तत्त्वज्ञानस्य सात्विकादित्रैविध्यमाह सर्वभूतेष्विति त्रिभिः ॥ सर्वभूतेषु ब्रह्मादिस्थावरांतेषु विभक्तेषु परस्-
परं व्यावृत्तेषु अविभक्तमनुस्यूतं ॥ एकमव्ययं निर्विकारं भावं परमात्मतत्त्वं येन ज्ञानेनेक्षते आलोचयति
तत्ज्ञानं सात्विकं विद्धि ॥ २० ॥ राजसं ज्ञानमाह ॥ पृथक्त्वेन तु यज्ज्ञानं नित्यस्यैव विवरणं सर्वेषु भूतेषु देहेषु
नानाभावान् वस्तुत एवानेकान् क्षेत्रज्ञान् पृथग्विधान् सुखदुःखादिरूपेण किंचिज्ज्ञत्वादिना वेत्ति तत्

सर्वभूतेषु येनैकं भावमव्ययमीक्षते ॥ अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्विकं ॥ २० ॥ पृथक्त्वेन तु यज्ज्ञानं
नानाभावान् पृथग्विधान् ॥ वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसं ॥ २१ ॥ यत्तु कृत्स्नवदेकस्मिन्कार्ये सक्तमहैतुकं
अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतं ॥ २२ ॥ ज्ञानं राजसं विद्धि ॥ २१ ॥ तामसं ज्ञानमाह यत्त्विति ॥ एकस्मिन्
कार्ये देहे प्रतिमादौ वा ॥ कृत्स्नवत्परिपूर्णमिव सक्तमिति एतावानेवात्मा ईश्वरो वेत्यभिनिवेशयुक्तं अहैतु-
कं निरुपपत्तिकं ॥ अतत्त्वार्थवत् परमार्थावलंबनं ॥ अत एवाल्पं तुच्छमल्पविषयत्वादल्पफलत्वाच्चापदे

शं एवंभूतं ज्ञानं तत्तामसमुदाहृतं ॥२२॥ इदानीं त्रिविधं कर्माह । नियतमिति । त्रिभिः । नियतं नित्यतया विहितं
संगाभिनिवेशशून्यं । अरागद्वेषपुत्रादिप्रीत्या शत्रुद्वेषेण च यत्कृतं न भवति । फलं प्राप्तुमिच्छतीति फलप्रेप्सुः
तद्भिन्नेन कर्त्रा यत्कृतं कर्म तत्सात्त्विकमुच्यते ॥२३॥ राजसं कर्माह । यत्त्विति । यत्तु कर्म कामेप्सुना प्राप्तु ।

नियतं संगरहितमरागद्वेषतः कृतं । अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते ॥२३॥ यत्तु कामेप्सुना
कर्म साहंकारेण वा पुनः । क्रियते बहुलायासं तद्राजसमुदाहृतं ॥२४॥ अनुबंधं क्षयं हिंसामनवे
क्ष्य च पौरुषं । मोहादारभ्यते कर्म यत्तत्तामसमुदाहृतं ॥२५॥

मिथ्याहंकारेण वा मत्समः कोन्यः श्रोत्रि
य इत्येवं निरूढाहंकारयुक्तेन वा क्रियते । यच्च पुनर्बहुलायासं अतिक्लेशयुक्तं तत्कर्म राजसमुदाहृ
तं ॥२४॥ तामसं कर्माह । अनुबंधमिति । अनुबंधं पश्चाद्भावि शुभाशुभं क्षयं वित्तव्ययं हिंसां परपी
डां च पौरुषं स्वसामर्थ्यं चानवेक्ष्य अपर्यालोच्य । केवलं मोहादेव यत्कर्म आरभ्यते तत्तामसमुदाहृतं ॥२५॥

कर्तारं त्रिविधमाह । मुक्तसंग इति त्रिभिः । मुक्तसंगः त्यक्ताभिनिवेशः । अनहंवादी गर्वोक्तिरहितः । धृतिर्धैर्यमु
त्साह उद्यमः ताभ्यां समन्वितः संयुक्तः । आरब्धस्य कर्मणः सिद्धावसिद्धौ च निर्विकारः हर्षविषादशून्यः
एवंभूतः कर्ता सात्त्विक उच्यते ॥२६॥ राजसं कर्तारमाह । रागी पुत्रादिषु प्रीतिमान् कर्मफलप्रेप्सुः । कर्मफ

मुक्तसंगोनहंवादी धृत्युत्साहसमन्वितः । सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते ॥२६॥ रागी कर्म
फलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः । हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः ॥२७॥ अयुक्तः प्राकृतः
स्तब्धः शठो नैष्कृतिकोऽलसः । विषादी दीर्घसूत्री च कर्ता तामस उच्यते ॥२८॥

लकामी लुब्धः परस्वाभिलाषी
हिंसात्मको मारकस्वभावः । अशुचिः विहितशौचशून्यः । लाभालाभयोर्हर्षशोकाभ्यां समन्वितः कर्ता राजसः प
रिकीर्तितः ॥२७॥ तामसं कर्तारमाह । अयुक्त इति । अयुक्तः अनवहितः प्राकृतो विवेकशून्यः स्तब्धोऽनम्रः शठः
शक्तिमनवेक्ष्यकारी नैष्कृतिकः परावमानी । अलसोऽनुद्यमशीलः विषादी शोकशीलः । अद्य श्वो वा यो वा कार्यं त

त्मानं पिन संपादयति। सेवा पियः स्मृतो वर्त्मस्तु ता। एवं विधः कर्ता तामसः। कर्तुस्त्रैविध्येनैव तु ज्ञानोरपि त्रैविध्यमुक्तं
कर्म त्रैविध्येन चेज्ञेयस्यापि त्रैविध्यमुक्तं। वेदितव्यं बुद्धेस्त्रैविध्येन करणस्यापि उक्तं भविष्यति। २८। इदा
नीं बुद्धेर्धृतेश्च त्रैविध्यं प्रतिजानीते। बुद्धेरिति स्पष्टार्थः। २९। तत्र बुद्धेस्त्रैविध्यमाह। प्रवृत्तिं चेति त्रिभिः

बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु। प्रोच्यमानमशेषेण पृथक्त्वेन धनंजय। २९। प्र
वृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये। बंधं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्विकी। ३०।
यया धर्ममधर्मं च कार्यं चाकार्यमेव च। अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी। ३१।

प्रवृत्तिं धर्मे निवृत्तिमधर्मे यस्मिन्देशे काले यत्कार्यं अकार्यं च भयाभये कार्याकार्यनिमित्तौ च
यौ नर्थौ कार्यं बंधः कथं मोक्ष इति या बुद्धिः अंतःकरणं वेत्ति सा सात्विकी। तया उभावत्वे ज्ञाति वक्रये
करणे कर्तृतोपचारः काष्ठानि पचंतीवत्। ३०। राजसीं बुद्धिमाह। ययेति। अयथावत्संदेहात्वेनेत्यर्थः स्पष्टमन्यत्। ३१। १६७

तया अधर्ममिति। विपरीतग्राहिणी बुद्धिस्तामसीत्यर्थः। बुद्धिरंतःकरणं पूर्वोक्तं। ज्ञानं तद्वृत्तिः धृतिर
पि तद्वृत्तिरेव। यद्वा। अंतःकरणस्य धर्मिणो बुद्धिरप्यध्यवसायलक्षणा वृत्तिरेव इच्छाद्वेषादितद्वृत्तीनां
बहुत्वेपि धर्माधर्मे नियसाधनत्वेन प्राधान्यादेतासां त्रैविध्यमुक्तं धृतेरपि ज्ञानं चेदन्यासां। ३२। इदानीं धृतेस्त्रै

अधर्मं धर्ममिति या मन्यते तमसावृता। सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी। ३२।
धृत्या यया धारयते मनःप्राणेंद्रियक्रियाः। योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्विकी। ३३।
यया तु धर्मकामार्थान्धृत्या धारयतेऽर्जुन। प्रसंगेन फलाकांक्षी धृतिः सा पार्थ राजसी। ३४।

विध्यमाह। धृत्येति। त्रिभिः। योगेन चित्तैकाग्र्येण हेतुनाव्यभिचारिण्या विषयांतरमनाश्रयंत्या
यया धृत्या मनसः प्राणेंद्रियाणां च क्रिया धारयते नियच्छति सा धृतिः सात्विकी। ३३। राजसीं धृतिमाह। ययेति
ति। यया धृत्या धर्मार्थकामान्प्राधान्येन धारयते न विमुंचति तत्प्रसंगेन फलाकांक्षी भवति सा राजसी धृतिः ३४

तामसीं धृतिमाह । यथेति ॥ दुष्टा अविवेकबहुला मेधा यस्य स दुर्मेधाः पुरुषो यया धृत्या स्वप्रादीन्न
विमुंचति पुनः पुनरावर्त्तयति स्वप्नोऽत्र निद्रा सा धृतिस्तामसी ॥ ३५ ॥ सुखस्य त्रैविध्यं प्रतिज्ञातं तेनेसुख
मित्यर्द्धेन स्पष्टार्थः । तत्र सात्विकं सुखमाह । अभ्यासादिति सार्द्धेन यत्र यस्मिन्सुखेऽभ्यासात्क्षिति । प्रथि

यया स्वप्नं भयं शोकं विषादं मदमेव च । न विमुंचति दुर्मेधा धृतिः सा पार्थ तामसी ॥ ३५ ॥ सु
खं त्विदानीं त्रिविधं शृणु मे भरतर्षभ । अभ्यासाद्रमते यत्र दुःखान्तं च निगच्छति ॥ ३६ ॥ यत्तदग्रे विषमिव
परिणामेऽमृतोपमं । तत्सुखं सात्विकं प्रोक्तमात्मबुद्धिप्रसादजं ॥ ३७ ॥

माद्रमते न तु विषयसुखवत्सहसा
रतिं प्राप्नोति यस्मिंश्च मम मायामूढ दुःखस्यान्तं अवसानं नितरां गच्छति ॥ ३६ ॥ कीदृशं तत्तदाह यदिति यत्तत्किमपि
अग्रे प्रथमं विषमिवायमनः संयमाधीनत्वात् दुःखावहमिव भवति परिणामे त्वमृततसदृशं । आत्मविषया बुद्धिः १६०
आत्मबुद्धिस्तस्याः प्रसादो रजस्तमोमलत्यागेन स्वच्छतयावस्थानं ततो यातं यत्सुखं तत्सात्विकं प्रोक्तं योगिभिः ॥ ३७ ॥

राजसं सुखमाह । विषयेंद्रियेति । विषयाणामिंद्रियाणां च संयोगाद्यत्प्रसिद्धं तत्सुखं राजसं स्मृतं ॥
३८ ॥ तामसं सुखमाह । यदग्र इति ॥ अग्रे प्रथमे क्षणे ॥ अनुबंधे च पश्चादपि यत्सुखं । आत्म
नो मोहकरं तदेवाह । स्त्रीसंगादिसुखं अमृतं उपमायस्य ताहशं भवति । निद्रा च आलस्यं च प्र
मादश्च कर्तव्यार्थावधानराहित्येन मनोराज्यं एतेभ्य उत्पन्नं इति यत्सुखं तत्तामसं समुदाहृतं ॥ ३९

विषयेंद्रियसंयोगाद्यत्तदग्रेऽमृतोपमं । परिणामे विषमिव तत्सुखं राजसं स्मृतं ॥ ३८ ॥
यदग्रे चानुबंधे च सुखं मोहनमात्मनः । निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतं ॥ ३९ ॥

अनुक्तमपि संगृह्णन् प्रकरणार्थमुपसंहरति ॥ न तदस्तीति ॥ एभिः प्रकृतिसंभवैः सत्वादि
भिस्त्रिभिर्गुणैर्मुक्तं हीनं सत्वं प्राणिजातमन्यद्वा यत्तस्मात् पृथिव्यां मनुष्यादिषु दिवि देवेषु ना
कापि नास्तीत्यर्थः ॥ ४० ॥ ननु च यद्येवं सर्वमपि क्रियाकारकफलादिकं प्राणिजातं च त्रिगुणात्

त्मकमेव कथं तर्हि अस्य मोक्ष इत्यपेक्षायां स्वस्वाधिकारविहितैः। कर्मभिः परमेश्वराराधनात्
तत्प्रसादलब्धज्ञानेन मोक्ष इत्येवं सर्वगीतार्थसारं संगृह्य तद्दर्शयितुं प्रकरणान्तरमारभते॥ ब्राह्मणेत्या
दिकं यावत्समाप्तिः॥ हे परन्तप॥ शत्रुतापन॥ ब्राह्मणानां क्षत्रियाणां विशां च शूद्राणां कर्मा

न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः॥ सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः॥४०॥
ब्राह्मणक्षत्रियविशां शूद्राणां च परंतप॥ कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः॥
॥४१॥

णि च विभक्तानि प्रकर्षेणाभागतो विहितानि शूद्राणां समाजात्तस्य करणं द्विज
त्वाभावेन वैश्यात्तल्लक्षणाविभागोपलक्षणमाह॥ स्वभावः सात्विकादिः॥ प्रभवति प्रादुर्भ
वति यैः सत्त्वगुणैरुपलक्षणं भूतैः॥ यस्य स्वभावः॥ पूर्वजन्मसंस्कारः॥ तस्माद्वा प्रादुर्भूतैरित्य
र्थः॥ तत्र सत्त्वप्रधानाः श्रूद्राः॥४१॥

तत्र ब्राह्मणस्य स्वाभाविकानि कर्माण्याह॥ शम इति॥ शमश्चित्तोपरमः॥ दमो बाह्येन्द्रियोपरमः॥
तपः पूर्वोक्तं शारीरादि॥ शौचं बाह्याभ्यंतरं क्षांतिः क्षमा॥ आर्जवं अवक्रता॥ ज्ञानं शास्त्रीयं॥
विज्ञानमनुभवः॥ आस्तिक्यं अस्ति परलोक इति निश्चयः॥ एतच्छमादि ब्राह्मणस्य स्वभावाज्जातं क

शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च॥ ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजं॥४२॥
शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनं॥ दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजं॥४३॥ कृ
षिगोरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजं॥ परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजं॥४४॥

र्म॥४२॥ क्षत्रियस्य स्वाभाविकं कर्माह॥ शौर्यं पराक्रमः॥ तेजः प्रागल्भ्यं॥ धृतिः धैर्यं॥ दाक्ष्यं कौ
शलं॥ युद्धे चाप्यपलायनं॥ अपराङ्मुखता॥ दानं औदार्यं॥ ईश्वरभावो नियमनशक्तिः॥ एतत्
क्षत्रियस्य स्वभावजं कर्म॥४३॥ वैश्यशूद्रयोः कर्माह॥ कृषीति॥ कृषिः कर्षणं॥ गा रक्षतीति

गीता०स० गौरक्षः । तस्य भावो गौरक्ष्यं पशुपाल्यमित्यर्थः । वाणिज्यं क्रयादि तद्वैश्यमावजं ॥ ४४ ॥ एवंभूतस्य
१७० ब्राह्मणादिकर्मणो ज्ञानत्वाप्तिप्रकारमाह । स्वेस्वेनेति । स्वकर्मपरिनिष्ठितो यथा येन प्रकारेण
तत्त्वज्ञानं लभते तं प्रकारं शृणु ॥ ४५ ॥ तमेवाह । यत इति । यतोऽन्तर्यामिनः परमेश्वरात् भूतानां प्राणिनां प्रवृत्ति

स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः । स्वकर्मनिरतः सिद्धिं यथा विंदति तच्छृणु ॥ ४५ ॥ यतः प्रवृत्तिर्भू
तानां येन सर्वमिदं ततं । स्वकर्म्मणा तमभ्यर्च्य सिद्धिं विंदति मानवः ॥ ४६ ॥ श्रेयान्स्वधर्मो विगुणः परधर्मा
त्स्वनुष्ठितात् । स्वभावनियतं कर्म्म कुर्वन्नाप्नोति किल्बिषं ॥ ४७ ॥

श्चेष्टा भवति । येन च कारणात्मना सर्वमिदं विस्तृ
तं व्याप्तं तमीश्वरं स्वकर्मणाभ्यर्च्य पूजयित्वा सिद्धिं लभते मनुष्यः ॥ ४६ ॥ स्वकर्म्मणेति विशेषणफलमा
ह । श्रेयानिति । विगुणोपि स्वधर्म्मः सम्यगनुष्ठितात् परधर्मात् श्रेयान् श्रेष्ठः । न च बंधुवधादियुक्तात् युद्धादेः
स्वधर्माद्भिक्षाटनादि परधर्म्मः श्रेष्ठ इति मंतव्यं । यतः स्वभावेन पूर्वोक्तेन नियतं नियमेनोक्तं कर्म कुर्वन् किल्बिषं १७०
नाप्नोति ॥ ४७ ॥

यदि पुनः मां स्वयं दृष्ट्वा स्वधर्म्मे हिंसादिलक्षणं दोषं मत्वा परधर्म्मं श्रेष्ठं मन्यसे । तर्हि सदोषत्वं परध
र्म्मेपि तुल्यमित्याशयेनाह । सहजमिति । सहजं स्वभावविहितं कर्म सदोषमपि न त्यजेत् । हि य
स्मात् सर्वेप्यारंभाः । दृष्टादृष्टार्थानि सर्वाण्यपि कर्माणि दोषेण केनचिदावृताः । व्याप्ता एव । स
हजेन धूमेनाग्निरावृतः । तद्वत् यथाग्नेर्धूमरूपं दोषमपहृत्य प्रताप एव तमः शीतादि

सहजं कर्म कौंतेय सदोषमपि न त्यजेत् । सर्वारंभा हि दोषेण धूमेनाग्निरिवावृताः ॥ ४८ ॥

निवृत्तये सेव्यते । तथा कर्म्मणोपि दोषांशं विहाय गुणांश एव सत्त्वशुद्धये सेव्यत इत्यर्थः ॥
४८ ॥ ननु कथं कर्माणि क्रियमाणे दोषांशप्रहाणेन गुणांश एव संपद्यत इत्यपेक्षायामाह
असक्तेति । असक्ता संगशून्या बुद्धिर्यस्य जितात्मा निरहंकारः । विगतस्पृहः । विगतास्पृहा
फलविषया इच्छा यस्मात् स एवंभूतः सन् सत्यागः सात्त्विको मत इत्येवं पूर्वोक्तेन कर्मासक्तित्यागत्

फलयोस्त्यागलक्षणेन संन्यासेन नैष्कर्म्यसिद्धिं सर्वकर्मनिवृत्तिलक्षणां सिद्धिं सत्वशुद्धिं गच्छति।
यद्यपि संगफलयोस्त्यागेन कर्मानुष्टानमपि नैष्कर्म्यमेव कर्तृत्वाभिनिवेशाभावात्॥ तदुक्तं
नैव किंचित्करोमीति युक्तो मन्येत तत्ववित् इत्यादिश्लोकचतुष्टयेन॥ तथाप्यनेनोक्तलक्ष-
णेन संन्यासेन परमां नैःकर्म्यसिद्धिं सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशीत्येवं-

असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः॥ नैःकर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति॥
४९॥ सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे॥ समासेनैव कौंतेय निष्ठा ज्ञानस्य या परा॥५०॥

लक्षणां परमहंस्यां परंपरं पर्यायां प्राप्नोति॥४९॥ एवंभूतस्य परमहंसस्य ज्ञाननिष्ठया ब्रह्मभा-
वप्रकारमाह॥ सिद्धिं प्राप्तमिति॥ षड्भिः॥ नैःकर्म्यसिद्धिं प्राप्तः सन् यथा येन प्रकारेण ब्रह्म प्रा-
प्नोति तया तं प्रकारं संक्षेपेणैव मे वचनात् निबोध॥५०॥

तदेवाह॥ बुद्ध्येति॥ उक्तेन प्रकारेण विशुद्धया पूर्वोक्तया सात्विकबुद्ध्या युक्तः॥ धृत्या सात्वि-
क्या स्वात्मानं तामेव बुद्धिं नियम्य निश्चलां कृत्वा शब्दादीन्विषयांस्त्यक्त्वा तद्विषयौ रागद्वेषौ
च व्युदस्य बुद्ध्या विशुद्धया युक्त इत्यादीनां ब्रह्मभूयाय कल्पत इति तृतीयेनान्वयः॥५१॥ किंच

बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च॥ शब्दादीन्विषयांस्त्यक्त्वा रागद्वे-
षौ व्युदस्य च॥५१॥ विविक्तसेवी लघ्वाशी यतवाक्कायमानसः॥ ध्यानयोगप-
रो नित्यं वैराग्यं समुपाश्रितः॥५२॥ ॥ ॥

विविक्तेति॥ विविक्तसेवी॥ शुचिदेशशुद्धये समय वस्यायी लघ्वाशी मितभोजी॥ एतैरुपायैर्य-
तवाक्कायमानसः॥ संयतवाक्देहचित्तो भूत्वा नित्यं सर्वदा ध्यायेन योगो ब्रह्मसंस्पर्शः तत्परः
सन् ध्यानाविच्छेदार्थं पुनः पुनर्दृष्टवैराग्यं सम्यगुपाश्रितो भूत्वा॥५३॥

किंच ॥ अहंकारमिति ॥ ततश्च विरक्तोऽहमित्याद्यहंकारं बलं दर्पं योगं बजात् दुर्मार्गप्रवृत्तिलक्षणं प्रारब्धवशात् प्राप्यमाणेष्वपि विषयेषु कामं परिग्रहं च विमुच्य विशेषेणात्यक्त्वा बन्धोपनेषु निर्ममः सन् शांतः परमामुपशान्तिं प्राप्तो ब्रह्मभूयाय ब्रह्माहमिति नैश्चल्येनावस्थानाय क-

अहंकारं बलं दर्पं कामं क्रोधं परिग्रहं ॥ विमुच्य निर्ममः शांतो ब्रह्मभूयाय कल्पते ॥ ५३ ॥
ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति ॥ समः सर्वेषु भूतेषु मद्भक्तिं लभते परां ॥ ५४ ॥

ल्पते योग्यो भवति ॥ ब्रह्माहमित्येवं नैश्चल्येन ॥ ५३ ॥ अवस्थानस्य फलमाह ॥ ब्रह्मभूतः ॥ ब्रह्मण्यवस्थितः प्रसन्नचित्तो नष्टं न शोचति ॥ न चाप्राप्तं कांक्षति देहाद्यभिमानाभावात् ॥ अत एव सर्वेषु भूतेष्वपि समानः सन् ॥ रागद्वेषादिकृतविक्षेपाभावात्सर्वभूतेषु मद्भावनालक्षणां परां भक्तिं भजते ॥ ५४ ॥ ॥

ततश्च भक्त्या मामिति ॥ तयानयपरया भक्त्या तत्त्वतो मामभिजानाति ॥ कथंभूतं ॥ यावान्सर्वव्यापी यश्चास्मि सच्चिदानंदघनः तं तथाभूतं मामेव तत्त्वतो ज्ञात्वा तदनंतरं तस्य ज्ञानस्याप्युपरमे सति मां विशते ॥ परमानंदरूपो भवतीत्यर्थः ॥ ५५ ॥ स्वकर्मभिः परमेश्वराराधनादुक्तं मोक्षप्रकारं सुपसं-

भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः ॥ ततो मां तत्त्वतो ज्ञात्वा विशते तदनंतरं ॥ ५५ ॥
सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः ॥ मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययं ॥ ५६ ॥
चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः ॥ बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव ॥ ५७ ॥

हरति ॥ सर्वकर्माणीति ॥ सर्वकर्माणि नित्यानि नैमित्तिकानि काम्यानि च कर्माणि पूर्वोक्तैः क्रमेण मद्व्यपाश्रयः कुर्वाणः ॥ अहमेव व्यपाश्रयः ॥ आश्रयणीयः ॥ न तु स्वर्गादिफलं यस्य सः मत्प्रसादाच्छाश्वतं अनादिं अव्ययं नित्यं सर्वोत्कृष्टं पदं प्राप्नोति ॥ ५६ ॥ यस्मादेवं तस्मात्त्वमपि ॥ सर्वक-

गीता०स०
१७३

र्माणि चेतसा मयि संन्यस्य समर्प्य मत्परः। अहमेव परः प्राप्य पुरुषार्थो यस्य सः। व्यवसायात्मि
कया बुद्ध्या योगमाश्रित्य संततं कर्मानुष्ठानेपि ब्रह्मार्पणं ब्रह्म हविरित्यादि ध्यानेन मय्येव चित्तं यस्य त
थाभूतो भव ॥५७॥ ततो यद्भविष्यति तच्छृणु। मच्चित्त इति। मच्चित्तः सन् मत्प्रसादात्सर्वाणि दुर्गाणि दुस्तरा
णि दुःखानि तरिष्यसि विपक्षे दोषमाह। अथ चेद्यदि पुनः त्वमहंकारात् कर्तृत्वाभिमानात् मदुक्तमेतन्न श्रो

मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि। अथ चेत्त्वमहंकारान्न श्रोष्यसि विनङ्क्ष्यसि ॥५८॥ यदहं
कारमाश्रित्य न योत्स्य इति मन्यसे। मिथ्यैव व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ॥५९॥

ष्यसि तर्हि विन
ङ्क्ष्यसि। पुरुषार्थाद्भ्रंशसि ॥५८॥ कामं विनंक्ष्यामि न तु बंधुभिर्युद्धं करिष्यामीति चेत्तत्राह। यदिति। म
दुक्तमनादृत्य केवलमहंकारमेवावलंब्य युद्धं न करिष्यामीति त्वं यन्मन्यसेऽध्यवस्यसि एष तेऽध्यवन
प्रकृतिस्त्वां रजोगुणरूपेण परिणता सती त्वां नियोक्ष्यति। सोपि मिथ्यैव स्वस्वतंत्रत्वाभावात्। तदेवाह युद्ध्य
वर्त्तयिष्यत्येव सत्यमेव ॥५९॥ १७३

किंच। स्वभावेति। स्वभावः क्षत्रियहेतुः। पूर्वकर्मसंस्कारस्तस्माज्जातेन स्वकीयेन कर्मणा
शौर्यादिना पूर्वोक्तेन निबद्धो नियंत्रितस्त्वं मोहाद्यत् युद्धलक्षणं कर्म लक्षणं कर्तुं नेच्छसि
अवशोपि तत्कर्म करिष्यस्येव ॥६०॥ तदेवं श्लोकद्वयेन सांख्यादिमतेन प्रकृतिपारतंत्र्यं
कर्मपारतंत्र्यं चोक्तं। इदानीं स्वमतमाहेश्वर इति। अर्जुनेति। द्वाभ्यां। सर्वभूतानां

स्वभावजेन कौंतेय निबद्धः स्वेन कर्मणा। कर्तुं नेच्छसि यन्मोहात्करिष्य
स्यवशोपि तत् ॥६०॥

हृदयमध्ये ईश्वरोंतर्यामी तिष्ठति। किं कुर्वन् सर्वाणि भूतानि मायया निजशक्त्या भ्रामयन्
यानिजशक्त्या भ्रामयन् तत्तत्कर्मसु प्रवर्त्तयन् यथा दारुयंत्रं समारूढानि कृत्रिमाणि भू
तानि सूत्रधारो लोके भ्रामयति। तद्वदित्यर्थः। यद्वा। यंत्राणि शरीराणि आरूढानि भूतानि देहा

हाभिमानिनो जीवान् भ्रामयन्नित्यर्थः॥ तथा च॥ श्वेताश्वतराणां मंत्रः॥ एको देवः॥ सर्वभू
तेषु गूढः सर्वव्यापी सर्वभूतांतरात्मा॥ कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो नि
र्गुणश्च॥ अंतर्यामिब्राह्मणे मेवमंतरो यमयति यमात्मा न वेद यस्यात्मा शरीरं राषतवस्था।

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति॥ भ्रामयन्सर्वभूतानि यंत्रारूढानि मा
यया॥ ६१॥ तमेव शरणं गच्छ सर्वभावेन भारत॥ तत्प्रसादात्परां शांतिं
स्थानं प्राप्स्यसि शाश्वतं॥ ६२॥

त्मांतर्यामिश्रुत्यादि॥ ६१॥ यस्मादेवं सर्वे जीवाः परमेश्वरस्य परतंत्रास्तस्मात्॥ त
मिति॥ तस्मादहंकारं परित्यज्य सर्वभावेन सर्वात्मना तमीश्वरमेव शरणं गच्छ॥ ततश्च
तस्यैव प्रसादात्परमामुपशांतिं स्थानं च पारमेश्वरं नित्यं प्राप्स्यसि॥ ६२॥ १७८

सर्वगीतार्थमुपसंहरन्नाह॥ इतीति॥ अनेन प्रकारेण सर्वज्ञेन परमकारुणिकेन मया ज्ञानमाख्यातं
उपदिष्टं गुह्यात् गोप्यात् रहस्यमंत्रयोगात् ज्ञानादपि गुह्यतरं॥ एतन्मयोपदिष्टं गीतार्थशास्त्रम
शेषतो विमृश्य पर्यालोच्य पश्चाद्यथेच्छसि तथा कुरु॥ एतस्मिन्पर्यालोचिते सति तवैव मोहो निव
र्तिष्यत इति भावः॥ ६३॥ अतिगंभीरगीताशास्त्रमशेषतः पर्यालोचितुमशक्नुवतः कृपयास्व

इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया॥ विमृश्यैतदशेषेण यथेच्छसि तथा कुरु॥ ६३॥
सर्वगुह्यतमं भूयः शृणु मे परमं वचः॥ इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितं॥ ६४॥

यमेव तस्य सारं संगृह्य कथयति॥ सर्वगुह्यतममिति॥ त्रिभिः॥ सर्वेभ्योपि गुह्येभ्यो गुह्यतमं मे
वचः॥ तत्र तत्रोक्तमपि भूयः पुनरपि वक्ष्यमाणं शृणु॥ पुनः पुनः कथने हेतुमाह॥ दृढमत्यंतमे
व त्वमिष्टः प्रियोसि॥ इति मत्वा तत एव हेतोस्ते हितं वक्ष्यामि यद्वा॥ त्वं ममेष्टोसि मतो वक्ष्यमा

णं च दृढं सर्वप्रमाणोपेतमिति ॥ निश्चित्य ततस्ते वक्ष्यामीत्यर्थः ॥ इदमतिरिति केचित्पठंति ६४
तदेवाह ॥ मन्मना इति ॥ मन्मना भव मच्चित्तो भव मम भक्तो भव ॥ मद्याजी च मद्यजनशी-
लो भव मामेव नमस्कुरु एवं वर्तमानस्त्वं मत्प्रसादात्लब्धज्ञानो मामेवैष्यसि ॥ अतः सं-

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ॥ मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोसि मे ॥ ६५
सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ॥ अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शु-
चः ॥ ६६ ॥

शयं मा कार्षीस्त्वं हि प्रियोसि ॥ अतः सत्यं यथा भवत्येवमहं प्रतिज्ञां करो-
मि ॥ ६५ ॥ ततोपि गुह्यतममाह ॥ सर्वधर्मानिति ॥ मद्भक्त्यैव सर्वं भविष्यतीति दृढविश्वा-
सेन विधिकैंकर्यं त्यक्त्वा मदेकशरणं भव ॥ एवं वर्तमानः कर्मत्यागनिमित्तं पापं स्यादि-
ति मा शुचः ॥ शोकं मा कार्षीः ॥ यतस्त्वां मदेकशरणं सर्वपापेभ्योहं मोचयिष्यामि ॥ ६६ ॥ १७५

एवं गीतार्थतत्त्वमुपदिश्य तत्संप्रदायप्रवर्तने नियममाह ॥ इदमिति ॥ इदं गीतातत्त्वं ते त्वया अतपस्काय
स्वधर्मानुष्ठानहीनाय न वाच्यं ॥ न चाभक्ताय गुरावीश्वरे च भक्तिशून्याय कदाचिदपि न वाच्यं ॥ न चाशु-
श्रूषवे परिचर्यामकुर्वते श्रोतुमनीहते वा वाच्यं मां परमेश्वरं यो भ्यसूयति मनुष्यदृष्ट्या दोषारोपेण निंद-
ति ॥ ६७ ॥ एतैर्दोषैर्विरहितेभ्यो गीताशास्त्रोपदेष्टुः फलमाह ॥ मद्भक्तेभ्यो यो वक्ष्यति मयि परां भक्तिं क-

इदं ते नातपस्काय नाभक्ताय कदाचन ॥ न चाशुश्रूषवे वाच्यं न च मां योभ्यसूयति ॥ ६७ ॥
य इदं परमं गुह्यं मद्भक्तेष्वभिधास्यति ॥ भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः ॥ ६८ ॥

रोति ततो निःसंशयः सन्मामेव प्राप्नोति ॥ ६८ ॥ किंच ॥ न चेति ॥ तस्मात् मम भक्तेभ्यो गीताशास्त्र-
स्य व्याख्यातुः सकाशात् अन्यो मनुष्येषु मध्ये कश्चिदपि मम प्रियकृत्तमः अत्यंतं परितोषकर्ता ना-
स्ति न च कालांतरे भविता भविष्यति ॥ मयि मम तस्मादन्यः प्रियतरोन्यो भुवि नाभुविता वास्ति न च का-

गीता०स०
१७६

ज्ञानं तेन भविता भविष्यतीत्यर्थः॥ ६९॥ पठतः फलमाह॥ अध्येष्यत इति॥ आवयोः कृष्णार्जुनयो
रिमं धर्म्यं धर्मादनपेतं संवादं योऽध्येष्यते जपरूपेण पठिष्यति॥ तेन पुंसा सर्वयज्ञेभ्यः श्रेष्ठे
न ज्ञानयज्ञेनाहमिष्टः स्यां भवेयमिति॥ मम मेयं मतिरिति॥ यद्यप्यसौ गीतार्थमबुध्यमाना

न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः॥ भविता न च मे तस्मादन्यः प्रियतरो भुवि॥ ६९
अध्येष्यते च य इमं धर्म्यं संवादमावयोः॥ ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः॥ ७०॥

एवं केवलं जपति॥ तथापि मम वस्तुतः शृण्वतो मामेवासौ प्रकाशयति॥ इति बुद्धिर्भवतीति॥
यथा लोके यदृच्छयापि कदाचित्कश्चित्कस्यचिन्नाम गृह्णाति॥ तदासौ मामेवाह्वयतीति मत्वा त
त्पार्श्वमागच्छति॥ तथाहमपि तस्य संनिहितो भवेयं॥ अत एव च अजामिलं त्राते बंधुपुत्ररवा
नो कथंचिन्नामोच्चारणमात्रेण प्रसन्नोस्मि तथैव तस्यापि प्रसन्नो भवेयमिति भावः॥ ७०॥ १७६

अन्यस्य जपतो योन्यः कश्चिच्छृणोति तस्यापि फलमाह॥ श्रद्धावानिति यो नरः श्रद्धायुक्तः केवलं शृणु
यात् अश्रद्धावानपि कश्चित्तत्किंसु चेर्जयति॥ अवकं जपतीति वादोषहर्षिं करोति॥ तच्चाहत्यर्थमाह॥ अ
नसूयश्च असूया रहितः शृणुयात्सोपि सर्वैः पापैर्मुक्तः सन् अश्वमेधादिपुण्यकृतां लोकान्प्राप्नुया

कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा॥ कच्चिदज्ञानसंमोहः प्रनष्टस्ते धनंजय॥ ७२॥ श्रद्धावानन्स
यश्च शृणुयादपि यो नरः॥ सोपि मुक्तः शुभाल्लोकान्प्राप्नुयात्पुण्यकर्मणां॥ ७२॥ अर्जुन उवाच
नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत॥ स्थितोस्मि गतसंदेहः करिष्ये वचनं तव॥ ७३॥ त ७१ मम

कृपावीक्षानुपपन्नेपि तु न रूपदेष्टव्यामीत्याशयेनाह॥ कच्चिदिति प्रश्नार्थे। अज्ञानसंमोहस्तत्त्वाज्ञानकृतो विपर्ययः
स प्रनष्टः॥ ७२॥ कृतार्थः सन्नर्जुन उवाच॥ नष्ट इति॥ आत्मविषयो नष्टो यतो यमहमस्मीति स्वरूपस्मृतिस्त्वत्प्र
सादान्मया लब्धा अतः स्थितोस्मि युद्धायोद्यतोस्मि॥ गतो धर्मविषयः संदेहो यस्य सोहं तवाज्ञां करिष्यामीति॥ ७३॥

तदेवं धृतराष्ट्रं प्रति श्रीकृष्णार्जुनसंवादं कथयित्वा प्रस्तुतं कथामुपसंहरन्॥ संजय उवाच॥ इतीति
रोमहर्षणं रोमांचकरं संवादं अश्रौषं श्रुतवानहं स्पष्टमन्यत्॥७४॥ आत्मनस्तद्दुर्लभं संभाव-
माह॥ व्यासप्रसादादिति॥ भगवता व्यासेन दिव्यं चक्षुः श्रोत्रादि मह्यं दत्तं॥ अतो व्यासस्य प्रसा-

संजय उवाच॥ इत्यहं वासुदेवस्य पार्थस्य च महात्मनः॥ संवादमिममश्रौषमद्भुतं रोमहर्षणं॥
७४॥ व्यासप्रसादाच्छ्रुतवानेतद्गुह्यमहं परं॥ योगं योगेश्वरात्कृष्णात्साक्षात्कथयतः स्वयं॥७५
राजन्संस्मृत्य संस्मृत्य संवादमिममद्भुतं॥ केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः॥७६॥

दात्तदहं श्रुतवानस्मि किं तदित्यपेक्षायामाह॥ परं योगं परत्वमाक्रिकरोति॥ योगेश्वरात्
श्रीकृष्णात्स्वयमेव साक्षात्कथयतः श्रुतवानिति॥७५॥ किंच॥ राजन्निति॥ हृष्यामि रोमांचि-
तो भवामि हर्षं चाप्नोमीति वा स्पष्टमन्यत्॥७६॥

किंच॥ तच्चेति॥ विश्वरूपं निर्दिष्टमिति स्पष्टमन्यत्॥ अथ जयं पुत्राणां राज्यशंकां परित्यजेत्याशये-
नाह॥ यत्रेति॥ यत्र येषां पक्षे योगेश्वरः श्रीकृष्णो वर्तते॥ यत्र पार्थो गांडीवधरस्तत्र श्रीः॥ राज्यलक्ष्मीः त-
त्रैव विजयः॥ तथैव विभूतिरुत्तरोत्तरा वृद्धिश्च॥ नीतिर्नयोपि तत्रैव ध्रुवा निश्चितेति सर्वत्रैव संबध्य-
ते॥ इति मम निश्चयः॥ अत इदानीमपि तावत्सपुत्रस्त्वं श्रीकृष्णं शरणमुपेत्य पांडवान्प्रसाद्य सर्वस्वं

तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः॥ विस्मयो मे महान्राजन्हृष्यामि च पुनः पुनः॥७७॥

चतेभ्यो निवेद्य पुत्रप्राणरक्षणं कुर्विति भावः॥७७॥ भगवद्भक्तियुक्तस्य तत्प्रसादात्मबोधतः॥ सुखं
बंधविमुक्तिः स्यादिति गीतार्थसंग्रहः॥ तथाहि॥ पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया॥ भक्त्या
त्वनन्यया शक्य अहमेवंविधोऽर्जुनेत्यादौ भगवद्भक्तेर्मोक्षं प्रति साधकतमत्वश्रवणात्॥ तदेकांतभ-
क्तिरेव तत्प्रसादात्मज्ञानावांतरव्यापारमात्रयुक्ता मोक्षहेतुरिति स्फुटं प्रतीयते ज्ञानस्य भक्तेरवांतरव्या-

परत्वमेवमुक्तं । तेषां सततयुक्तानां भजतां प्रीतिपूर्वकं ॥ ददामि बुद्धियोगं तं येन मामुपयांति ते ॥ मद्भक्तएत
द्विज्ञाय मद्भावायोपपद्यत इत्यादिवचनात् ॥ न च ज्ञानमेव भक्तिरित्युक्तं ॥ समः सर्वेषु भूतेषु मद्भक्तिं लभ
ते परां ॥ भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः ॥ इत्यादौ भेदेन निर्देशात् ॥ न च तमेव विदित्वाति
मृत्युमेति नान्यः पंथा विद्यते ॥ नायेति श्रुतिविरोधः शंकनीयः ॥ भक्त्यवांतरव्यापारत्वात् ज्ञानस्य नहिक

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ॥ तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ ७८ ॥

ष्टो वा च पतीत्युक्ते ज्वालानां नमसाधनत्वमुक्तं भवति ॥ यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ॥ तस्यै
ते कथिता ह्यर्थाः प्रकाशंते महात्मनः ॥ देहांते देवः परं ब्रह्म तारकं व्याचष्टे यमेवैष वृणुते तेन लभ्य
इत्यादिश्रुतिस्मृतिपुराणवचनान्येव संति सर्वमंजसा निर्भवंति तस्माद्भगवद्भक्तिरेव मोक्षहेतुरिति
प्रसिद्धं ॥ तेनैव दत्तया मत्या तद्गीताविवृतिः कृता ॥ स एव परमानंदस्तया प्रीणातु माधवः ॥ ७८ ॥ ॥ १७८

परमानंदपादाब्जरजः श्रीधारिणाविना ॥ श्रीधरस्वामियतिना कृता गीतासुबोधिनी ॥ २ ॥ स
प्रागल्भ्यं बत नाधिजीगति भगवद्गीतानदंतर्गतं तत्त्वं प्राप्तुमुपैति किं गुरुकृपापीयूषदृष्टिं विना
स्वंबु स्वांजलिना निरस्य जलधेराद्दित्सुरंतर्मणीनावज्रेषु न किं निमज्जति जनः सत्कर्ण

इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
मोक्षयोगो नामाष्टादशोऽध्यायः ॥ १८ ॥ इति श्रीभगवद्गीता श्रीधरविरचितायो
कृष्णार्जुनसंवादः समाप्तः ॥ १ ॥ शुभं भवतु ॥ श्रीरस्तु ॥ कल्याणमस्तु ॥ ॥

धारं विना ॥ ३ ॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसं
वादे सुबोधिन्यां टीकायां श्रीधरविरचितायां नामाष्टादशोऽध्यायः ॥ १८ ॥ गीता ॥ समाप्ताः ॥ १

गीता०स०
१७१८

0
371

॥ ॥इतिगीता[illegible]ग्रंथः॥१॥

१७१८